'मास्टर' मणिमालायाः सप्तचत्वारिंशत्संख्यको मणिः (कर्मकाण्डविभागे एकादशो मणिः)

अथ

# रुद्रयागप्रयोगः

प्रारम्भः ।

पं० श्रीवायुनन्दनमिश्रेण समुद्भासितः ।

मूल्यम् ॥)

अस्य पुनर्मुद्रणे सर्वे ऽधिकारा राजशासनानुसारेण प्रकाशयित्रा स्वायत्तीकृताः ।

तालाब की मट्टी
राजद्वार की मट्टी
गोशाला की मट्टी
५ऽ यव
ऽ२ गेहूँ
ऽ१ धान्य
ऽ। तिल्ली
ऽ। ककुनी
ऽ। श्यामा
ऽ१ चना
वटपत्र
गूलरपत्र
पीपरपत्र
पाकरपत्र
आम्रपत्र
सोना-७
हीरा-७
मोती-७

पुखराज-७
नीलम-७
कमंडलु १
तामे का कलश बड़ा १
कलश छोटा ६
लोटा पीतल का
कलश के वास्ते १८
पूर्णपात्र के गगरा १
कांसे की थाली २
कांसे का कटोरा बड़ा१
बटलोही बड़ी चरु के १
करछुल पीतलकीबड़ी १
सँड़सीपीतर की बड़ी१
अभिषेकपीतलका बड़ा१
वरणी का लोटा २५
पंचपात्र २५
आचमनी २५
अर्घा २५

तष्टा ताँबे का २५
कटोरी कांसे की ५०
ताँबेका पत्र१६अंगुललंबा
१६ अं० चौड़ा १ करवा
पीतल का २
घंटी पीतल की छोटी२१
घुघुरू २१
पीताम्बर तरना उपरना१
रेशमी वस्त्र १। गज
सिल्क की धोती ५
सिल्क का दुपट्टा ५
धोती २०
अँगोछा २५
धोती चढ़ाने को १०
अँगोछा-१०
मलमल थान २
तूल लाल १ थान
„ पीला १ थान

„ हरा १ थान
„ काला १ थान
कंबलासन २५
कुशासन २५
गोमुखी २५
रुद्राक्षमाला २५
पवित्री सुवर्ण की २५
जनेऊ जोड़ा ५०
चन्दवा पचरंगावेदीके ५
प्रधानप्रतिमा सोनेकी
शिव पार्वती का १६मासे
का या ४० मासे का
चाँदीकाबैल१०मासेका
चांदीकासिंहासनछत्र १
पूजन पात्र पीतल का
वास्तु प्रतिमा १। मासेका
योगिनी प्रतिमा त्रिकोण ३
पौने ४ मासे का

क्षेत्रपाल प्रतिमा१।मासे१
सुवर्ण शलाका १
सुवर्ण टुकड़ा छोटा ८०
१ चांदी की कटोरी
१६ पेना
१६ चँवर
=) लालरंग
=) पीलारंग
=) हरारंग
=) कालारंग
ऽ॰ तीनताग का सूत
लोहेकाकांटा नागफनी ४
पीढ़ा ३ आम का
२८अं० लंबा२४अं० चौड़ा
६ अंगुल ऊँचा खंभा
बड़ा ४ आठहाथ या ६
हाथ का
खंभा छोटा ५ हाथ या

७ हाथ का १२
खंभाकेऊपरकीलकड़ी१६
ऊपरकेछाजनकीलकड़ी१६
शिखर (लट्टु) आमका १
द्वार ४ कीलकड़ी १६
वटकी२लकड़ी७हाथकी
लंबी१ लकड़ी३॥हाथकी१
पीपल की २ लं० ७
हाथ, ३॥ हाथ की लं० १
पाकड़ की २ लंबी ७
हाथ की, ३॥ हाथ की १
गूलर की २ लंबी ७
हाथ की, ३॥ हाथ की १
चटाई सिरकी फूस वाध
पतराबांस २० बड़ा बाँस
१केलाखंभातोरण८०हाथ
रुद्र
तिल१।ऽ,घी१ऽ,शर्करा१ऽ

# रुद्रयागसम्भाराः

१) केसर
२) कस्तूरी
।) रोरी
।) नारा
S२ अबीर
S॥ बुक्का
S॥ मेंहदी की बुकनी
S॥ हरदी की बुकनी
S० पीली सरसो
)। मुरा
)। जटामासी
)। बच
)। कूट
)। बालछड़ीदा
)। हरदी

)। दारुहरदी
)। कचूर ( वा सोंठ )
)। चंपा
)। नागरमोथा
पुष्पमाला २००
धूपबत्ती २००
दीपबत्ती २००
S। कपुर
S। शहद
S~ सिन्दूर
S१ सोपाड़ी
१७ नारियल
S~ लवंग
।) लायची
=) जावित्री

=) जायफल
।S पंचमेवा
S५-दूध
S२-दही
गोबर
गोमूत्र
S॥ अग्निहोत्रभस्म
पान ५ ढोली
।S५ पेड़ा
।S बतासा
ऋतुफल
घोड़ा के स्थान की मट्टी
हाथी के स्थान की मट्टी
दीमक की मट्टी
संगम की मट्टी

महारुद्र
तल३३S,घी२S,शर्करा२S
अतिरुद्र
तिल७५S,घी.४S,शर्करा४S
उरदी ।S५
पापड़ S।~
चावल २ मन।
मदार की लकड़ी १०८
पलास १०८
खैर की १०८
चिचिड़ा की १०८
पीपल की १०८
गूलर की १०८
शमी की १०८
त्रिशूल काष्ठ का ४
गूलर की दतुवन
दूर्वा—

कुशा—
स्रुवा १
स्रुची १
प्रणीता १
प्रोक्षणी १
स्फ. १
वसोर्धारा १
अरणी २
मंथा १
उपमंथा १
सूत की रस्सी १
मृगचर्म १
कम्बल १
कंडा सूखा
नारियल की जटा
फुकनी १
मट्टी की कराही २५

कच्चा ईंटा १०००
पक्का ईंटा १०००
बांसका खौरा २
बांस की डलिया ५
लालटेन १
रूई S० मीठातेल S२॥
सलाई २
हड़िया ५
परई २०
कसोरा १००
दीया ४००
दियरी २५०
दियट काठका ५
पत्तल ४००
आम की लकड़ी होमके
५० मन
इति सम्भाराः।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ नत्वा विनायकं देवं शंकरं रेणुकान्तथा ॥ मोरेश्वराख्यपितरं श्रौतस्मार्तविशारदम् ॥ १ ॥ याज्ञिकानां सुबोधाय सारमुद्धृत्य ग्रन्थतः ॥ रुद्रानुष्ठानप्रयोगस्संक्षिप्तो रच्यते मया ॥ २ ॥ अथ देवयाज्ञिककाशीदीक्षितरुद्रकल्पद्रुमरुद्रानुष्ठानकौमुदीत्यादिग्रंथान्समालोक्य तेभ्यः सारांशमादाय माध्यन्दिन्यादिसर्ववाजसनेयीशाखानुसारेण होमात्मकरुद्रानुष्ठानप्रयोग उच्यते ( तत्रादौ रुद्रभेदाः पद्मपुराणे ) षडङ्गैकादशीरुद्री रुद्रैश्चैकादशरुद्रतः ॥ एकादशभिरेताभिर्महारुद्रस्तु कथ्यते ॥ एकादशमहारुद्रैरतिरुद्र इतीरितः ॥ ( अन्यत्रापि ) शृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते ॥ रुद्राः पञ्चविधाः प्रोक्ता दैशिकैरुत्तरोत्तरम् ॥ साङ्गस्त्वाद्यो रूपकाख्यः सशीर्षो रुद्र उच्यते ॥ एकादशगुणैस्तद्वद्रुद्रसंज्ञो द्वितीयकः ॥ एकादशभिरेताभिस्तृतीयो लघुरुद्रकः ॥ लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः ॥ पंचमः स्यान्महारुद्रैरेकादशभिरन्तिमः ॥ अतिरुद्रः समाख्यातः सर्वेभ्यो ह्युत्तमोत्तम इति ॥ अत्र रुद्रशब्दवाच्यो महेशः रुद्रशब्दनिरुक्तिमाह ( बौधायनः ) रुत् पापं दुःखं द्रावयतीति रुद्रः ( अन्यत्र स्मृतिसंग्रहे ) विना महेश्वरं देवं नान्यस्त्रातुमघौघत इति ॥



## ( अथ रुद्रजपादौ फलमाह )

यः शतरुद्रियमधीते सोऽग्निपूतो भवति ॥ स वायुपूतो भवति स सुरापानात्पूतो भवति स सुवर्णस्तेयात्पूतो भवति गुरुतल्पगमनात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति ॥ स कृत्याकृत्यात्पापात्पूतो भवति ॥ तस्मादविमुक्तमाश्रितो भवति ॥ यः श्रद्धया युतो नित्यं शतरुद्रियमभ्यसेत् ॥ अग्निदाहात्सुरापानाद्दुष्कृत्याचरणात्तथा ॥ मुच्यते ब्रह्महत्याया इति कैवल्यशाखिन इति मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा ॥ भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैरिति । सर्वेष्वपि हि धर्मेषु रुद्राध्यायजपः परः ॥ रुद्राध्यायी विमुच्यते जन्मसंसारबन्धनात् ( स्मृतिमहार्णवेस्मृतिदर्पणे च ) लिङ्गार्चनं रुद्रजाप्यन्तथा चैकादशीव्रतम् ॥ वाराणस्यां च मरणं मुक्तिरेषा चतुर्विधा ॥ रुद्रजापी शिवः साक्षाच्चतुराश्रमधर्मकः ॥ तस्मात्सर्वं परित्यज्य रुद्रजापी भवेत्सदा (वायुपुराणे) अनपत्यत्वदोषेषु शाकिन्यादिग्रहेषु च ॥ सर्वज्वरविनाशाय रुद्रजाप्यो न संशयः ॥ रोगवान्पाप्मनांश्चैव रुद्रं जप्त्वा जितेन्द्रियः ॥ रोगात्पापात्प्रमुक्तोऽसावतुलं सुख- १

मश्नुते ॥ इति ॥ ( रुद्रजपाद्यारम्भकालस्तु पाराशरेणोक्तः ) वैशाखे श्रावणे मासे चाश्विने मार्गशीर्षके ॥ माघफाल्गुनयोर्वापि सिते पक्षे शुभे दिने ॥ रुद्रारम्भः प्रकर्त्तव्यः पुत्रपौत्रादिवृद्धय इति ॥ कार्तिके स्वर्णलाभः स्यादिति केचित् ॥ ( वर्ज्यानि तु संग्रहे ) अनध्यायतिथिं रिक्तान्तथा षष्ठीं विहाय च ॥ इतरासु च कर्त्तव्यो रुद्रारम्भः शुभप्रदः ॥ अनध्याये च संध्यायामपराह्णे कथञ्चन ॥ स्त्रियां रजस्वलायां च रुद्रारम्भो न सिद्धिद इति ( रत्नमालायाम् ) सोमसौम्यगुरुशुक्रवासराः सर्वकर्मसु भवन्ति सिद्धिदाः ॥ निष्कामतया रुद्रानुष्ठाने तु यदैव श्रद्धोत्पद्यते तदैव रुद्रारम्भः कार्यः न श्वः श्वमुपासीत को हि मनुष्यः श्वो वेद इति श्रुतेः ॥ श्वः कालसम्बन्धिजीवनं को वेद को नाम जानीयात् ॥ आयुषोऽस्थिरत्वादिति श्रुत्यर्थः ( परशुरामोपि ) यदैव जायते वित्तं चित्तं श्रद्धासमन्वितम् ॥ तदैव पुण्यकालोयं यतोऽनियतजीवितम् ॥ अतः सर्वेषु कालेषु जपस्यारम्भणं शुभमिति ( दीपिकायामपि ) ईश्वराराधनार्थं वाथ वा पापापनुत्तये ॥ यदि रुद्राद्यनुष्ठानं न मुहूर्तादि चिन्तयेदिति ॥ काम्ये तु शुभकाले एव प्रारम्भः ॥ अथ कुण्डमंडपादेर्होमांगत्वात् कुंडमंडपादिकरणं कुंडसिद्ध्याद्यनुसारेण कर्त्तव्यम् ॥



इदं च कुण्डमण्डपकरणं होमाङ्गमेव ॥ अनावश्यकं च करणे फलाधिक्यम् । अकरणे तु न वैगुण्यं कुण्डाभावे स्थण्डिलं वा कार्यम् ॥ नित्यं नैमित्तिकं होमं स्थण्डिले वा समाचरेत् ॥ इति शारदातिलकोक्तेः ॥ कुण्डमेवंविधानं स्यात्स्थण्डिलं वा समाश्रयेदिति प्रपंचसारोक्तेः ॥ यद्यपि काम्ये कुण्डं नित्यं तथापि कुण्डे वा स्थण्डिलेपि चेत्याचार्योक्तेर्नित्यहोमादौ कुण्डस्थण्डिलयोर्विकल्पः कुण्डमण्डपकरणपक्षे मध्यभागे कुण्डकरणे तु कुण्डादीशान्यां मण्डपमध्य एव रुद्रवेदी कार्या ( तदुक्तं ) गर्त्तस्योत्तरपूर्वेण स्थंण्डिलं हस्तमात्रकम् ॥ द्विवप्रं चतुरस्रं च वितस्त्युच्छ्रायसम्मितमिति ॥ गर्तात्कुंडादीशान्यामित्यर्थः ॥ तत्र द्व्यङ्गुलोच्छ्रायः प्रथमो वप्रः । त्र्यङ्गुलोच्छ्रायो द्वितीयः । विस्तारस्तु द्वयोरर्धङ्गुलमेव ॥ वप्रोपरि सप्ताङ्गुलोच्छ्रायहस्तविस्तृता च सुश्लक्ष्णा कार्या वप्रैः सह द्वादशाङ्गुलोन्नता भवति ॥ ( रुद्रकल्पद्रुमः ) नारायणभट्टास्तु मण्डपे च मध्यभागे कुण्डं कार्यम् ॥ मध्यभाग एव कुण्डमिति साधितमन्यत्रेत्याहुः ॥ इदमेव युक्ततरम् ॥ २
गृहस्येशानभागे च मण्डपं कारयेद्बुधः ॥ दशद्वादशभिर्हस्तैः षोडशैर्वा समन्ततः ॥ १ ॥

चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतम् ॥ कुण्डं तन्मध्यभागे तु कारयेच्चतुरस्रकम् ॥ २ ॥ वितस्तिद्वयखातं तत्कुण्डं सचतुरस्रकम् ॥ इति ज्योतिर्वशिष्ठसंहितायाम् ॥ मध्ये तु मण्डपस्यापि कुण्डं कुर्याद्विचक्षणः इति ॥ ततः प्रधानवेदीदक्षिणतो ग्रहवेदी कार्या ॥ कुण्डनैर्ऋत्यां वास्तुवेदीं कुर्यादिति ॥ कुंडआग्नेयां योगिनीवेदी वायव्यां क्षेत्रपालवेदी कार्या ॥ तत्रादौ रुद्रयागारम्भदिनात्पूर्वदिने असम्भवे तस्मिन्दिने वा अधिकारसिद्ध्ये यजमानो यथासम्भवं प्रायश्चित्तं कुर्यात् ॥

## अथ सर्वप्रायश्चित्तप्रयोगः ।

तत्र प्रायश्चित्तपूर्वदिने घृतं प्राश्योपोष्य विप्रान् पर्षदत्वेनोपवेश्य कृतस्नानोऽशक्तश्चेदार्द्रवासस्साङ्गं प्रोक्ष्य वाससी परिधायाचम्य बद्धशिखः कृततिलकः कुशोपग्रहः पूर्वाभिमुखः कर्तोपविश्याचम्य प्राणायामं कृत्वा संकल्प कुर्यात् ॥ ॐ तत्सदद्येत्यादि स्मृत्वा गोत्रः शर्माहं अमुकरुद्रयागाधिकारार्थं मत्सकलपातकनिवृत्त्यर्थं च विष्णुपूजनपूर्वकं देहशुद्ध्यर्थं अमुकप्रायश्चित्तं करिष्ये ॥ तत्रादौ आवाहनादिषोडशोपचारैः पंचोपचारैर्वा विष्णुं संपूज्य ॥ ततः क्लिन्नवासाः पर्षदं प्रदक्षिणीकृत्य



धरण्यां साष्टाङ्गं प्रणमेत् ॥ ततः पर्षदा पृच्छन्ति ॥ किन्ते कार्यं वदास्माकं किं वा मृगयसे द्विज ॥ तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः ॥ अस्माकं चैव सर्वेषां सत्यमेव परं बलम् ॥ यदि त्वं रक्षसे नित्यं नियतं प्राप्स्यते भवान् ॥ यथागतोस्यसत्येन न त्वं शुद्ध्यसि कर्हिचित् ॥ एवं तैस्समनुज्ञातः सर्वं तु ह्युपदेशतः ॥ ब्राह्मणनामग्रे प्रार्थना ॥ समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ॥ अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥ १ ॥ आपद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः ॥ समस्ततीर्थाम्बुपवित्रमूर्तयो रक्षन्तु मां ब्राह्मणापादपांसवः ॥ २ ॥ विप्रौघदर्शनात्क्षिप्रं क्षीयन्ते पापराशयः ॥ वन्दनान्मंगलावाप्तिरर्चनादच्युतं पदम् ॥ ३ ॥ आधिव्याधिहरन्नृणां मृत्युदारिद्र्यनाशनम् ॥ श्रीःपुष्टिकीर्तिदं वंदे विप्राणां पादपङ्कजम् ॥ ४ ॥ इति स्तुत्वा ॥ विप्रैः किं ते कार्यं मिथ्या मावादीः सत्यमेव वदेति पृष्टः ॥ द्वादशाब्दं ३६० षडब्दं १८० त्र्यब्दं ९० सार्द्धाब्दं ४५ अब्दं ३० एते पक्षाः यथाशक्ति स्वर्णादिप्रत्याम्नायद्वारा कुर्यात् ॥ ततो गोवृषनिष्क्रयद्रव्यसंकल्पः ॥ देशकालौ संकीर्त्य अमुकगोत्रोत्पन्नः अमुकशर्माऽहं अमुकप्रायश्चित्ताङ्गत्वेन गोवृषयोर्निष्क्रयीभूतं द्रव्यं स्वर्णं रजतं वा सभ्येभ्यो

ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ तेन श्रीपापापहा महाविष्णुः प्रीयताम् ॥
प्रार्थना ॥ गवामंगेषु तिष्ठान्ति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके
परत्र च ॥ इति संकल्पितगोवृषनिष्क्रयद्रव्यं सभ्याग्रे निधाय वदेत् ॥ अमुकगोत्रो-
त्पन्नः अमुकशर्म्मा मम जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञातकामाकामसकृदस-
कृत्कृताकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातका-
तिपातकोपपातकगुरुलघुस्थूलसूक्ष्मपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रं-
शकरप्रकीर्णकपातकानां मध्ये संभावितानां पापानां निरासार्थमनुग्रहं कृत्वा
प्रायश्चित्तमुपादिशन्तु भवन्तः इति प्रार्थना ॥ सर्वे धर्मविवेक्तारो गोप्तारः
सकलाः द्विजाः ॥ मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ॥ मया कृतं महाघोरं
ज्ञातमज्ञातकिल्बिषम् ॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छत ॥ पूज्यैः कृतपवि-
त्रोऽहं भवेयं द्विजसत्तमैः इति प्रार्थयित्वा ॥ मामनुगृह्णन्तु भवन्त इति प्रणमेत् ॥
ततः सभ्यैरुपदिष्टो यथाशक्ति उत्तममध्यमाधमादिपक्षांश्च विचार्यास्मिन्पक्षेऽयं
समर्थः इति निश्चिते कर्ता ॥ ततः अमुकप्रायश्चित्ताङ्गत्वेन निबंधसभ्यानुवादकानां
पूजनं करिष्ये ॥ चंदनपुष्पादिभिः पुस्तके सरस्वतीपूजां सभ्यानुवादकपूजां कृत्वा ॥

रु० पूजाङ्गत्वेन किंचिद्द्रव्यं निधाय अनुवादकाय प्रभृतिरूपां दक्षिणां पापानुसारेण प्र०
४ दद्यात् ॥ ततः सभ्याः पुस्तकवाचनपूर्वकमनुवादकस्याग्रे कथयेयुः अनुवादकश्च
कर्तारं प्रति वदेत् ॥ तद्यथा ॥ सभ्यैरुपदिष्टोऽनुवादकः अमुकगोत्रस्यामुकशर्मणः तव
जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञातकामाकामसकृदसकृत्कृतकायिकवाचिकमा-
नसिकसांसार्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकगुरुलघु-
स्थूलसूक्ष्मपातकसंकरीकरणमलिनकिरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानां
मध्ये संभावितानां पापानां निरासार्थं पर्षदुपादिष्टं अमुकप्रायश्चित्तं सुवर्णप्रत्याम्नायं
वा रजतप्रत्याम्नायद्वारा प्राच्योदीच्याङ्गसहितं त्वया आचरितव्यं तेन तव शुद्धिर्भ-
विष्यति अतस्त्वं सर्वेभ्यः पातकेभ्यः कृतार्थो भविष्यसि ॥ इति त्रिरुपदिशेत् ॥
कर्ता ॥ ॐ भवदनुग्रहः इत्यङ्गीकृत्य प्रणम्य अनुवादकं विसृजेत् ॥ कस्यांचिद्रिक्तायां
तिथौ तद्दिने कृतमाध्याह्निकः सायाह्ने गंगादौ तीर्थे गृहे वा ॥ देशकालौ संकीर्त्य
अमुकगोत्रोत्पन्नः अमुकशर्माहं मम जन्मप्रभृत्यादि० निरासार्थेत्यन्तं रुद्रयागाधि- ४
कारार्थं सभ्योपदिष्टमदः प्रायश्चित्तं प्राच्योदीच्याङ्गसहितममुकप्रत्याम्नायेन ( सुव-
र्णरजतप्रत्याम्नायेन ) अहं आचरिष्ये ॥ तथा वपनं दंतधावनं पंचगव्यादिदशवि-

धस्नानानि च करिष्ये ॥ इति संकल्प्य प्रार्थयेत् ॥ शृणु भो त्वमिदं विप्र
तुल्यमादिश्यते व्रतम् ॥ तत्ते यत्नेन कर्त्तव्यं अन्यथा तद्वृथा भवेत् ॥ ततः शिरसि
हस्तं निधाय ॥ आत्मनः शुद्धिकामो वा पितॄणां तृप्तिहेतवे ॥ वपनं कारयिष्यामि
तीरेऽहं तव जाह्नवी ॥ यानि कानि च पपानि ब्रह्महत्यासमानि च ॥ केशानाश्रित्य
तिष्ठान्ति तस्मात्केशान्वपाम्यहम् ॥ महापापोपपापाभ्यां केशलोमनखा द्विजाः ॥
क्षुरादिछिन्नसर्वाङ्गास्ते मे दोषाः पतन्त्यधः ॥ इति श्लोकान्पठित्वा ॥ शिखाकक्षोप-
स्थवर्ज्यन्नखलोमकेशानादौ क्रमेणोदक्संस्थं वपनम् ॥ अत्र वपनाङ्गं स्नानम् ॥ इत्युक्तं
रुद्रकल्पद्रुमे ॥ क्षौरान्तं द्वादश गण्डूषान्कृत्वा ॥ दन्तकाष्ठं गृहीत्वा अभिमंत्रयेत् ॥
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥
ततो दन्तान्धावयित्वा ॥ ॐ अन्नाद्यायव्यूहध्वꣳ सोमोराजायमागमत् ॥ स मे मुखं
प्रमार्क्षते यशसा च भगेन च ॥ मुखदौर्गन्ध्यनाशाय दन्तानां च विशुद्धये ॥ ष्ठीवनाय
च गात्राणां कुर्वेहं दन्तधावनम् ॥ ततः काष्ठान्तरेण जिह्वामुल्लिख्य द्वादशगण्डूषा-
न्कृत्वा ॥ जलाशयं गत्वाऽप्सु निमज्य भस्मादिदशविधस्नानानि कुर्वीत ॥ तानि
यथा ॥ प्रायश्चित्ताङ्गभस्मस्नानं करिष्ये ॥ तत्रादौ भस्मग्रहणम् ॥ ॐ ईशानः

रु० सर्वविद्यानामीश्वरः सर्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मेऽअस्तु प्र०
९ सदाशिवोम् ॥ इति शिरसि ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो
रुद्रः प्रचोदयात् ॥ इति मुखे ॥ ॐ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः
सर्वसर्वेभ्यो नमस्ते ऽअस्तु रुद्ररूपेभ्यः इति हृदये ॥ ॐ वामदेवाय नमो ज्येष्ठाय
नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलाय नमो
बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः इति गुह्ये ॐ सद्योजातं
प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवेनातिभवे भवस्व मां भवोद्भवाय
नमः ॥ इति पादयोः ॐ इति सर्वाङ्गेषु ॥ ॐ प्रसद्य भस्मना योनिमपश्च पृथिवी-
मग्ने ॥ सꣳसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः इति भस्मस्नानम् ॥ आचम्य ॥
ततः प्रायश्चित्तांगत्वेन गोमयस्नानं करिष्ये ॥ ततो गोमयग्रहणम् ॥ ॐ मानस्तोके-
तनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोवधीर्हवि- ६
ष्मन्तःसदमित्वाहवामहे ॥ अग्रमग्रं चरन्तीनामोषधीनां रसं वने ॥ तासां वृषभप-
त्नीनां पवित्रं कायशोधनम् ॥ इत्यभिमंत्र्य सूर्याय प्रदर्श्य ॥ दक्षिणहस्तेन शिरः-

प्रभृति नाभ्यन्तं वामहस्तेन नाभितः पादान्तं त्रिरनुलिम्पेत् ॥ ततः प्रायश्चित्ता-
ङ्गत्वेन मृत्तिकास्नानं करिष्ये ॥ ततो मृत्तिकाग्रहणम् ॥ ॐ स्योनापृथिविनोभवानृ-
क्षरानिवेशनि ॥ यच्छानःशर्म्मसप्रथाः ॥ ॐ गंधद्वारामित्याभिमंत्र्य ॥ ततः सूर्याय
प्रदर्श्य ॥ ॐ नमोमित्रस्यव्वरुणस्यचक्षसेमहोदेवायतदृतᳬ सपर्य्यत ॥ दूरेदृशेदेव-
जातायकेतवेदिवस्पुत्रायसूर्य्यायशᳬसत ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥
समूढमस्यपाᳬसुरेस्वाहा ॥ इति गोमयवदनुलिप्य ॥ ततः प्रायश्चित्ताङ्गत्वेन
शुद्धोदकस्नानं करिष्ये ॥ ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्वः
पुनन्तु ॥ विश्वᳬ हिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतऽएमि ॥ इति शुद्धोदक-
स्नानम् ॥ ततः प्रायश्चित्ताङ्गत्वेन गोमूत्रस्नानं करिष्ये ॥ ॐ तत्सवितुरिति ॥
ततः प्रायश्चित्ताङ्गत्वेन गोमयस्नानं करिष्ये ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमा-
नोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्वाह-
वामहे ॥ इति गोमयस्नानम् ॥ ततः प्रायश्चित्ताङ्गत्वेन पय स्नानं करिष्ये ॥ ॐ

क० आप्यायस्वसमेतुतेव्विश्वतः सोमवृष्ण्यम् ॥ भवाव्वाजस्यसङ्गथे ॥ इति पयःस्ना- प्र०
६ नम् ॥ ततः प्रायश्चित्ताङ्गत्वेन दधिस्नानं करिष्ये ॥ ॐ दधिक्राव्णोऽअकारिषञ्जि-
ष्णोरश्वस्यव्वाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूᳬषितारिषत् ॥ इति दधि-
स्नानम् ॥ ततः प्रायश्चित्ताङ्गत्वेन घृतस्नानं करिष्ये ॥ ॐ घृतंघृतपावानःपिबतव्व-
साव्वसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशः प्रदिशऽआदिशोव्विदि-
शऽउद्दिशोदिग्भ्यःस्वाहा ॥ ततः प्रायश्चित्ताङ्गत्वेन कुशोदकस्नानं करिष्ये ॥
ॐ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ सरस्वत्यैव्वाचोयन्तु-
र्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ ॥ १ ॥ ॐ देवस्यत्वा० ॥
सरस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥ २ ॥ ॐ देव-
स्यत्वा० ॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येन ६
व्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिञ्चामि ॥ ३ ॥

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १ ॥ ॐ योवः
शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ २ ॥ ॐ तस्माऽअरङ्गमा-
मवोयस्यक्षयायाजिन्वथ ॥ आपोजनयथाचनः॥ ३ ॥ ॐ पुनन्तुमापितरः सोम्यासः
पुनन्तुमापितामहाःपुनन्तुप्रपितामहाः ॥ पवित्रेणशतायुषा ॥ पुनन्तुमापितामहाः
पुनन्तुप्रपितामहाः पवित्रेणशतायुषाव्विश्वमायुर्व्यश्नवै ॥ ४ ॥ ॐ अग्नऽआयूꣳ-
षिपवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ५ ॥ पुनन्तुमादेवजनाः
पुनन्तुमनसाधियः ॥ पुनन्तुव्विश्वाभूतानिजातवेदः पुनीहिमा ॥ ६ ॥ पवित्रेण
पुनीहिमाशुक्रेणदेवदीद्यत ॥ अग्नेक्रत्वाक्रतूँरनु ॥ ७ ॥ ॐ यत्तेपवित्रमर्च्चिष्य-
ग्ग्नेव्विततमन्तरा ॥ ब्रह्मतेनपुनातुमा ॥ ८ ॥ ॐ पवमानः सोऽअद्यनः पवित्रेण
विचर्षणिः ॥ यः पोतासपुनातुमा ॥ ९ ॥ उभाभ्यान्देवसवितः पवित्रेणसवेनच ॥
२ मांपुनीहिव्विश्वतः ॥ १० ॥ वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्न्वो-

क० ७ व्वीतपृष्ठाः ॥ तयामदन्तः सधमादेषुव्वयꣳस्यामपतयोरयीणाम् ॥ ११ ॥ स्वादि- प्र०
ष्ठयामदिष्ठयापवस्वसोमधारया ॥ इन्द्रायपातवेसुतः ॥ १२ ॥ ततो नद्यां प्रवाहा-
भिमुखोऽन्यत्र सूर्याभिमुखो निमज्जेत् ॥ ततः जलमध्ये अघमर्षणं कृत्वा ॥ ॐ
ऋतंचसत्यंचाभिद्धेति त्रिः पठेत् ॥ ततः स्नानाङ्गतर्पणम् ॥ ॐ भूर्देवाँस्तर्पयामि ॥
ॐ भुवर्देवाँस्तर्पयामि ॥ ॐ स्वर्देवाँस्तर्पयामि ॥ ॐ भूर्भुवः स्वर्देवांस्तर्पयामि ॥ ततः
कण्ठं कृत्वा ॥ ॐ भूर्ऋषींस्तर्पयामि ॥ ॐ भुवर्ऋषींस्तर्पयामि ॥ ॐ स्वर्ऋषींस्तर्प-
यामि ॥ ॐ भूर्भुवःस्व र्ऋषींस्तर्पयामि ॥ अपसव्यम् ॥ ॐ भूः पितॄँस्तर्पयामि ॥
ॐ भुवः पितॄँस्तर्पयामि ॥ ॐ स्वः पितॄँस्तर्पयामि ॥ ॐ भूर्भुवः स्वः पितॄँस्तर्पयामि ॥
सव्यम् ॥ ॐ ब्रह्मादयो देवास्तृप्यन्तु ॥ कण्ठी ॥ कृष्णवैशंपायनादय ऋषयस्तृप्यन्तु ॥
अपसव्यम् ॥ कव्यवाडादयो दिव्यपितरस्तृप्यन्तु ॥ अमुकगोत्राः अस्मत्सर्वे
पित्रादयस्तृप्यन्तु ॥ ततः यन्मया दूषितं तोयं शरीरमलसंभवम् ॥ तस्य पापस्य
शुद्ध्यर्थं यक्ष्माणं तर्पयाम्यहम् ॥ ततः सव्यमाचम्य जलादुत्क्रम्य ॥ ॐ आपोऽअस्मान्मा- ७
तरः शुन्धयन्तुघृतेननोघृतप्वः पुनन्तु ॥ विश्वꣳ० हिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यः

शुचिरापूतऽएमि वरुणाय नमः जपेत् ॥ ततो यथोक्तधौते वाससी यज्ञोपवीतं च परिधायाचम्य ॥ यत्रैतत्स्नानं गृहे भवति तत्रैतावत्कर्म वर्ज्यम् ॥ ततः आचम्य देशकालौ संकीर्त्य० अङ्गीकृतप्रायश्चित्ताङ्गत्वेन विष्णुपूजनपूर्वकं विष्णुश्राद्धं करिष्ये ॥ इति संकल्प्य ॥ शालिग्रामशिलायां श्वेतचन्दनादिभिर्विष्णुं संपूज्य ॥ देशादि स्मृत्वा विष्णुप्रीत्यर्थं प्रायश्चित्ताङ्गं विष्णुश्राद्धसम्पत्तये श्रीविष्णूद्देशेन युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयीभूतं द्रव्यं रजतं चन्द्रदैवतं चतुर्भ्यो ब्राह्मणेभ्यो यथाविभागं विभज्य दातुमहमुत्सृजे ॥ तेन पापापहा महाविष्णुः प्रीयताम् ॥ ततः पूर्वोच्चारित० पूर्वाङ्गगोदानमहं करिष्ये ॥ गोनिष्क्रयद्रव्यमादाय ॥ देशकालौ संकीर्त्य० अमुकगोत्रः अमुकशर्माहं प्रायश्चित्तपूर्वाङ्गतया विहितं गोदानप्रत्याम्नायद्वारा यथाशक्ति गोनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दातुमहमुत्सृजे ॥ प्रार्थना ॥ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ॥ गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ ततो व्याहृतिभिराज्येनाष्टोत्तरशतमष्टाविंशति वा होमं करिष्ये ॥ तत्र पञ्चभूसंस्कारपूर्व-

कृ० कविदनामाग्नेः प्रतिष्ठापनं करिष्ये ॥ तद्यथा ॥ रत्निमात्रस्थण्डिले कुशैः परिसमूह्य ॥ प्र०

८ तान्कुशानैशान्यां परित्यजेत् ॥ गोमयोदकाभ्यामुपलिप्य ॥ स्फ्येनोल्लिख्य ॥ अनामिकाङ्गुष्ठेन मृदमुद्धृत्य ॥ जलेनाभ्युक्ष्य ॥ ॐ अग्निन्दूतंपुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँऽआसादयादिह इत्यग्निं स्थापयेत् ॥ ब्रह्मवरणम् ॥ अस्मिन्व्याहृत्यादिहवनकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मीति प्रतिवचनम् ॥ ततः कुशकण्डिका ॥ अग्नेर्दक्षिणतः ब्रह्मासनम् ॥ अग्नेरुत्तरतः प्रणीतासनद्वयम् ॥ ब्रह्मासने ब्रह्मोपवेशनं अत्र त्वं मे ब्रह्मा भव ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य प्रथमासने निधाय ब्रह्मणो मुखमवलोक्य द्वितीयासने निदध्यात् ॥ ततः परिस्तरणम् ॥ आग्नेयादीशानान्तम् । ब्रह्मणोऽग्निपर्यन्तम् । नैर्ऋत्याद्वायव्यान्तम् ॥ अग्नितः प्रणीतापर्यन्तम् ॥ अग्नेरुत्तरतः पात्रासादनम् ॥ पवित्रच्छेदनार्थं कुशत्रयम् ॥ पवित्रार्थं कुशपत्रद्वयम् ॥ प्रोक्षणीपात्रम् । आज्यस्थाली । संमार्जनकुशाः पञ्च । उपयमनकुशाः सप्त । समिधस्तिस्रः ॥ स्रुवः ॥ आज्यम् ॥ ८
मंत्रसाधितपञ्चगव्यम् ॥ ब्रह्मकूर्चम् । पूर्णपात्रम् । पवित्रकरणम् ॥ तत्र क्रमः ॥

ह्रयोरुपरि त्रीणि निधाय ह्रौं मूलेन प्रदक्षिणीकृत्य त्रिभिश्छिन्द्य ह्रौं ग्राह्यौ त्रिस्त्याज्यः। सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय ॥ त्रिरुत्पवनम् ॥ प्रोक्षण्या सव्यहस्तकरणम् ॥ त्रिरुदिङ्गनम् ॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् ॥ प्रोक्षणीजलेनासादितवस्तुसेचनम् ॥ अग्निप्रणीतयोर्मध्ये प्रोक्षणीं निधाय ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ आधिश्रयणम् ॥ ज्वलदुल्मुकेन पर्यग्निकरणम् इतरथावृत्तिः ॥ स्रुवप्रतपनम् । संमार्गकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमार्ज्य ॥ प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणदेशे निदध्यात् ॥ आज्यमुद्वास्याग्नेरुत्तरतः प्रणीतापश्चिमतो निधाय ॥ आज्योत्पवनम् ॥ आज्यावेक्षणम् ॥ सत्यपद्रव्ये तन्निरसनम् ॥ पुनः प्रोक्षण्युत्पवनम् ॥ आज्यमग्नेः पश्चिमतो निधाय उपयमनकुशान्वामहस्ते कृत्वा घृताक्ताः समिधस्तिस्रः दक्षिणहस्तेनादायोत्तिष्ठन्प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ क्षिपेत् ॥ ततः प्रोक्षण्युदकेन सपवित्रकरेण ईशानादि अग्नेः प्रदक्षिणं पर्युक्ष्य पवित्रयोः प्रणीतासु निधानम् ॥ दक्षिणजान्वाच्य ब्रह्मणान्वारब्धः स्रुवेणाज्याहुतीर्जुहोति ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये० ॥ इति हुतशेषस्य प्रोक्षणीपात्रे



प्रक्षेपः ॥ एवं सर्वत्र ॥ ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय० ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये० ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय० ॥ अनन्वारब्धः ॥



## अथ व्याहृतिहोमः ।

अष्टोत्तरशतमष्टाविंशतिर्वा ॥ ॐ भू० स्वाहा ॥ इदमग्नये० ॥ ॐ भुवः स्वाहा ॥ इदं वायवे० ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय० ॥ ॐ भूर्भुवः स्वः स्वाहा इदं प्रजापतये० ॥ एवं सप्तविंशतिवारं कृतेऽष्टोत्तरशतमाहुतयः ॥ सप्तवारं कृते अष्टाविंशतिराहुतयः ॥ ततो ब्रह्मकूर्चेन पञ्चगव्यहोमः ॥ ॐ इरावतीधेनुमतीहि भूतꣳ० सूयवसिनीमनवेदशस्या ॥ व्यस्कभ्नारोदसीव्विष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः स्वाहा ॥ इदं पृथिव्यै० ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ इदं विष्णवे० ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानो गोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्वा

हवामहे स्वाहा ॥ इदं रुद्राय० ॥ उदकोपस्पर्शः ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तु पीतये ॥ शंयोरभिस्रवन्तुनः स्वाहा ॥ इदमद्भ्यो० ॥ ( ब्रह्मयज्ञानं प्रथमंपुरस्ता-द्विसीमतः सुरुचोव्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्याव्विष्ठाः सतश्चयोनिमसतश्च व्विवः स्वाहा ॥ इदं ब्रह्मणे० ) ॥ इति केचित्पठन्ति ॥

## अथ कूर्चहोममूलवचनस्त्वेवमाहुतिचतुष्टयम् ।

ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते नमम ॥ ॐ भूः स्वाहा ॥ इदमग्नये० ॥ ॐ भुवः स्वाहा ॥ इदं वायवे० ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय० ॥ ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोव्वह्नितमः शोशुचानोव्विश्वाद्वेषाᳬसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणᳬरराणोव्वीहिमृडीकᳬसुहवोनऽएधिस्वाहा ॥ इदमग्नीवरुणाभ्यां० ॥ ॐ अया-

क० इश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाऽअसि ॥ अयानोयज्ञंवहास्ययानोधेहि प्र०
१० भेषजᳬ स्वाहा ॥ इदमग्नये अयसे० ॥ ॐ येतेशतंवरुणयेसहस्रंयज्ञियाः पाशा
विततामहान्तः ॥ तेभिर्न्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा ॥
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ॐ उदुत्तमं
व्वरुणपाशमस्मदवाधमंव्विमध्यमᳬश्रथाय ॥ अथाव्वयमादित्यव्रतेतवानागसोऽ
अदितयेस्याम स्वाहा ॥ इदं वरुणायादित्यायादितये न मम ॥ ॐ प्रजापतये स्वाहा ॥
इदं प्रजापतये न मम ॥ संस्रवप्राशनम् । आचमनम् । पवित्राभ्यां मार्जनम् ॥
ॐ सुमित्रियानऽआपऽओषधयः सन्तु इति प्रणीतोदकेन मार्जयेत् ॥ ब्रह्मणे पूर्ण-
पात्रदानम् ॥ अद्य प्रायश्चित्ताङ्गहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थं इदं
पूर्णपात्रं सदक्षिणाकं अमुकनामगोत्राय ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे ॥
अथाग्नेः पश्चात्प्रणीताविमोकः ॥ ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयंद्विष्मः ॥ १०
ततः तारकोदये व्रतग्रहणं करिष्ये ॥ हवनशेषं पंचगव्यं पिबेत् ॥ तत्र मंत्रः ॥
यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात्पञ्चगव्यस्य दहत्यग्निरि-

येन्धनम् ॥ ततः प्रधानगोनिष्क्रयसंकल्पः ॥ देशकालौ संकीर्त्य अमुकगोत्रः अमुकशर्मा मम जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञातकामाकामसकृदसकृत्कृत-कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपात-कोपपातकलघुपातकसंकरीकरणमलिनीकरणअपात्रीकरणजातिभ्रंशकरप्रकीर्णकपात-कानां मध्ये संभावितानां पापानां निरासार्थं श्रीपरमेश्वरप्रीत्यर्थं पर्षदुपदिष्टं गोनिष्क्रयद्रव्यदानप्रत्याम्नायद्वारांगीकृतामुकप्रायश्चित्तस्य संसिद्ध्यर्थं यथायथा-नामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे ॥ प्रार्थना ॥ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ इति प्रधानसंकल्पः ॥ संकल्पितद्रव्यं अर्द्धं आचार्याय अर्द्धं सभ्येभ्यो दद्यात् ॥ अद्येत्यादि० अमुकगोत्रः अमुकशर्माहं आचीर्णस्यामुकप्रायश्चित्तस्योत्तराङ्गानि करिष्ये ॥ ततः पूर्ववत् व्याहृतिहोमं अष्टाविंशति कुर्यात् ॥ तद्यथा ॥ देशकालौ संकीर्त्य० अङ्गीकृतप्राय-श्चित्तस्योत्तराङ्गत्वेन व्याहृतिहोमं करिष्ये ॥ ॐ भूः स्वाहा ॥ इदमग्नये० ॥ ॐ भुवः स्वाहा ॥ इदं वायवे० ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय० ॥ ॐ भूर्भुवः स्वः स्वाहा ॥

रु० इदं प्रजापतये० एवं सप्तवारं कृते अष्टाविंशतिराहुतयः ॥ ततः अङ्गीकृतप्राय- प्र०
११ श्चित्तस्योत्तराङ्गत्वेन विष्णुपूजनं विष्णुश्राद्धं च करिष्ये ॥ यथोपचारैर्विष्णुं सम्पूज्य
पूजनान्ते यथाशक्ति द्रव्यमादाय देशादि स्मृत्वा श्रीविष्णुप्रीत्यर्थं प्रायश्चित्ताङ्ग-
विष्णुश्राद्धसंपत्तये श्रीविष्णूद्देशेन युग्मब्राह्मणभोजनपर्याप्तामान्नचतुष्टयनिष्क्र-
यीभूतं द्रव्यं रजतं चन्द्रदैवतं चतुर्भ्यो ब्राह्मणेभ्यो यथाविभागं विभज्य दातुमहमु-
त्सृजे ॥ तेन श्रीपापापहा महाविष्णुः प्रीयताम् ॥ ततः उत्तराङ्गगोदानम् ॥ देशादि
स्मृत्वा गोत्रः शर्मा प्रायश्चित्तस्योत्तराङ्गतया विहितं गोदानप्रत्याम्नायद्वारा यथा-
शक्तिगोनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय
दातुमहमुत्सृजे ॥ प्रार्थना ॥ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ॥ गावो
मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ ततो ब्राह्मणभोजनसंकल्पः ॥ देशकालौ
संकीर्त्य कृतस्य सर्वप्रायश्चित्तकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं ११
द्वादशसंख्याकान्ब्राह्मणान्भोजयिष्ये ॥ तेन श्रीपापापहा महाविष्णुः प्रीयताम् ॥

## अथ दश दानानि ।

गोभूतिलहिरण्याज्यं वासो धान्यगुडानि च ॥ रौप्यं लवणमित्याहुः दश दानानि पंडिताः ॥ इति रुद्रयागे प्रथमदिनकृत्यम् ॥

## अथ पञ्चाङ्गम् ।

चन्द्रादिशुभग्रहानुकूलसमये शुभे दिने कृतनित्यक्रियो यजमानः शुभासने प्राङ्मुखोपविश्य स्वदक्षिणतः पत्नीं चोपवेश्य ॥ ॐ केशवाय नमः ॥ ॐ नारायणाय नमः ॥ ॐ माधवाय नमः ॥ इति त्रिराचम्य ॥ ततः पवित्रधारणं कृत्वा ॥ ॐ पवित्रेस्थोवैष्णव्यौसवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यंतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ॥ इति ॥ ततः प्राणायामत्रयं कुर्यात् ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य ॥ हस्ते अक्षतपुष्पाणि

रु० गृहीत्वा आनोभद्रादीन्मङ्गलमन्त्रान्पठेत् ॥ ॐ आनोभद्राःक्रतवोयन्तुविश्वतोदब्धा- प्र०
१२ सोऽअपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे
॥ १ ॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाᳬरातिरभिनोनिवर्त्तताम् ॥ देवानाᳬ
सख्यमुपसेदिमाव्वयन्देवानऽआयुः प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्वयानिविदाहूमहे
व्वयं भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यमणंव्वरुणᳬसोममश्विनासरस्वतीनः
सुभगामयस्करत् ॥ ३ ॥ तन्नोव्वातोमयोभुव्वातुभेषजंतन्मातापृथिवीतत्पिताद्यौः
तद्ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाशृणुतान्धिष्ण्यायुवम् ॥ ४ ॥ तमीशानं
जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षिता
पायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाव्विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वामरुतः पृश्नि- १२
मातरः शुभंय्यावानोविदथेषुजग्मयः ॥ अग्निर्जिह्वामनवः सूरचक्षसोविश्वेनोदेवाऽ-

अवसागंमान्निह् ॥ ७ ॥ भद्रंकर्णेभिः शृणुयाम देवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरै-
रङ्गैस्तुष्टुवाᳬंसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्ति
देवायत्रांनश्चक्राजरसंन्तनूनाम् ॥ पुत्रासोयत्रपितरो भवन्तिमानोमद्ध्यारीरिषता-
युर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाऽ-
अदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ १० ॥ द्यौः शान्तिरन्तरिक्षᳬं
शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे-
देवाः शान्तिर्ब्रह्म शान्तिः सर्वᳬं शान्तिः शान्तिरेव शान्तिः सामाशान्ति-
रेधि ॥ ११ ॥ यतोयतः समीहसे ततोनोऽअभयङ्कुरु ॥ शन्नः कुरुप्रजाभ्योभयन्नः
पशुभ्यः ॥ १२ ॥ सुशान्तिर्भवतु ॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो
३ गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च

रु० प्रवेशे निर्गमे तथा ॥ सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं प्र०
१३ देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥ अभी-
प्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यम्बके गौरि नारायणि नमोऽ-
स्तु ते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥ येषां हृदिस्थो भगवा-
न्मङ्गलायतनं हरिः ॥ ७ ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ॥
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ ८ ॥ लाभस्तेषां जयस्तेषां
कुतस्तेषां पराजयः ॥ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ९ ॥ यत्र
योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मति-
र्मम ॥ १० ॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां
योगक्षेमं वहाम्यहम् ॥ ११ ॥ स्मृते सकलकल्याणभाजनं यत्र जायते ॥ पुरुषं १३
तमजं नित्यं व्रजामि शरणं हरिम् ॥ १२ ॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १३ ॥ विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च

भैरवम् ॥ वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥ १४ ॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १५ ॥ ॐ श्रीमन्महागणाधिपतये नमः ॥ ॐ लक्ष्मीनारायणाभ्यां नमः ॥ ॐ उमामहेश्वराभ्यां नमः ॥ ॐ वाणीहिरण्यगर्भाभ्यां नमः ॥ ॐ शचीपुरन्दराभ्यां नमः ॥ ॐ मातृपितृचरणकमलेभ्यो नमः ॥ ॐ इष्टदेवताभ्यो नमः ॥ ॐ कुलदेवताभ्यो नमः ॥ ॐ ग्रामदेवताभ्यो नमः ॥ ॐ स्थानदेवताभ्यो नमः ॥ ॐ वास्तुदेवताभ्यो नमः ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥ ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ कुशपुष्पफलाक्षतद्रव्यं चादाय संकल्पं कुर्यात् ॥ ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोह्नि द्वितीयपरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भूर्लोके भारतवर्षे भरतखण्डे आर्यावर्तैकदेशान्तर्गते अमुकक्षेत्रे ( वाराणसीक्षेत्रे महाश्मशाने आनन्दवने गौरीमुखे त्रिकण्टकविराजिते बौद्धावतारे इति काश्यां संकल्पे विशेषः ) वा प्रजापतिक्षेत्रे भागीरथ्या अमुकभागे ( नर्मदादि अमुकभागे



वा ) अमुकसंवत्सरे अमुकायने मार्त्तण्डे अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नः अमुकशर्मा सपत्नीकोऽहं मम कायिकाद्यखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थममुककामनासिद्ध्यर्थं वा एकषष्ट्युत्तरशतधा मंत्रविभागपक्षेण ( अमुकविभागपक्षेण वा ) घृताक्ततिलद्रव्येण हवनद्वारा सनवग्रहमखं अमुकरुद्राख्यं कर्म ( अन्ये तु लघुरुद्राख्यं महारुद्राख्यं अतिरुद्राख्यं वा ) करिष्ये इति संकल्पः ॥ तदङ्गविहितं गणेशपूजनपूर्वकं पुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनं आयुष्यमंत्रजपं नान्दीश्राद्धमाचार्यादिवरणानि च करिष्ये ॥ ततः स्वगृह्योक्तविधिना नांदीश्राद्धान्तं कुर्यात् । ( तत आचार्यादिवरणम् ) देशकालौ संकीर्त्य अमुकगोत्रः अमुकशर्माहं अमुकगोत्रममुकशर्माणं अस्मिन् रुद्रयागाख्ये कर्मणि विहितकर्म कर्तुं आचार्यं त्वामहं

वृणे इति वृणुयात् ॐ वृतोस्मि इति आचार्यो ब्रूयात् ॥ ॐ व्रतेन दीक्षामाप्नोति मंत्रं जपेत्समाचारात् ॥ प्रार्थयेत् ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥ इत्याचार्यवरणम् ॥ अस्मिन्कर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मीति प्रतिवचनम् ॥ प्रार्थना ॥ यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः ॥ तथा त्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम ॥ एवमेव सदस्यं वृत्वा प्रार्थयेत् ॥ त्वन्नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणम् ॥ आपद्विमोक्षणार्थाय सदस्यं त्वामहं वृणे ॥ एवमेव गाणपत्यं त्वां वृणे ॥ प्रार्थना ॥ वांछितार्थफलावाप्त्यै पूजितोसि सुरासुरैः ॥ निर्विघ्नं क्रतुसंसिद्ध्यै त्वामहं गणपं वृणे ॥ एवमेव उपद्रष्टारं वृत्वा प्रार्थयेत् ॥ भगवन्सर्वकर्मज्ञ सर्वधर्मभृतांवर ॥ वितते मम यज्ञेस्मिन्नुपद्रष्टा भव द्विज ॥ ततोऽष्टौ द्वारपालान्यथासंभवद्धोमार्थमृत्विजश्च जापकांश्च वृत्वा ॥ यथाविभवं तेषां आसनवस्त्राङ्गुलीयकपात्रालङ्कारचन्दनादिभिः मधुपर्कपूजां कुर्यात् ॥



## अथ देवसक्तं परशुरामेण !



भाजनं भाजनाधारं छत्रोपानत्कमण्डलुम् ॥ आसनं वसनं मुद्रा कर्णभूषोपवीतकम् ॥ एतद्दशविधं देयं पदं वरणसिद्धये ॥ पदाभावे त्रयं देयं पात्रवस्त्राङ्गुलीयकम् ॥ तदभावेऽथ ताम्बूलं दत्त्वा किंचित्प्रकल्पयेदिति (रुद्रकल्पद्रुमः) ॥ यत्र तु मधुपर्काभावस्तत्र ऋत्विग्वरणानन्तरमेव स्वस्तिवाचनं (अत्र तु परशुरामेणोक्तम्) कृत्वैव वरणं पूर्वं वाच्यं पुण्याहवाचनमिति ॥ संकल्पः ॥ देशकालकीर्तनान्ते यजमानः वृतान् ऋत्विजः मधुपर्केणाहं अर्चयिष्ये ॥ स्वशाखया मधुपर्कं कुर्यात् ॥ तद्यथा ॥ तत आचार्यादीनेकतन्त्रेणासनेषु प्राङ्मुखानुपवेश्य ॥ यजमानः स्वयं च उदङ्मुख उपविश्याचम्य प्राणानायम्य (कृताञ्जलिपुटः यजमानः) ॐ साधु भवन्तः आसतां अर्चयिष्यामो भवतः (ब्राह्मणाः) ॐ अर्चय ॥ ऋत्विक्संख्यया विष्टरान्गृहीत्वा (आचार्यः) ॐ विष्टराः विष्टराः विष्टराः (यजमानः) विष्टराः प्रतिगृह्यन्ताम् (ब्राह्मणाः) ॐ विष्टराः प्रतिगृह्णीमः ॥ ततो यजमानहस्ताद्विष्टरं गृहीत्वा ॥ ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः ॥ इमन्तमभितिष्ठामि यो मा 

कश्चाभिदासति ॥ इति मंत्रेण ब्राह्मणाः प्रत्येकं विष्टरं उदगग्रं स्वासनतले स्थापयेयुः ॥ ततो यजमानः पाद्यपात्रमादाय ( आचार्यः ) ॐ पाद्यानि पाद्यानि पाद्यानि ( यजमानः ) पाद्यानि प्रतिगृह्यन्ताम् ( ब्राह्मणाः ) पाद्यानि प्रतिगृह्णीमः ॥ ततो यजमानहस्तात्पाद्यपात्रमादाय ॥ ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ॥ इति मंत्रेण प्रथमं दक्षिणचरणं तत्पश्चाद्वामचरणं च क्रमेण स्वयं प्रक्षालयेत् ॥ ततः पूर्ववद्विष्टरान्गृहीत्वा पूर्ववन्मंत्रं पठित्वा ( ब्राह्मणाः ) स्वस्वचरणयोरधस्तादुत्तराग्रं दद्युः ( तत आचार्यः ) अर्घाः अर्घाः अर्घाः ( यजमानः ) अर्घाः प्रतिगृह्यन्ताम् ( ब्राह्मणाः ) अर्घान्प्रतिगृह्णीमः ॥ ॐ आपःस्थयुष्माभिः सर्वान्कामानवाप्नवानि ॥ इति मंत्रेण ( ब्राह्मणाः ) अर्घपात्रं शिरसाभिवन्द्य ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टास्माकंवीरामापरासेचिमत्पयः ॥ इति मंत्रं पठन्नैशान्यां दिशि जलं क्षिपेत् ॥ ततो यजमानः आचमनीयपात्रमादाय ( आचार्यः ) आचमनीयानि आचमनीयानि आचमनीयानि ( यजमानः ) आचमनीयानि प्रतिगृह्यन्ताम् ॥ ( ब्राह्मणाः ) आचमनीयानि प्रति-

रु० गृह्णीमः ॥ ततो यजमानहस्तादाचमनीयपात्रमादाय ॥ ॐ आमागन्यशसासꣳ प्र०
१६ सृजवर्चसातम्माकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टिंतनूनाम् ॥ इति मंत्रेण सकृदाचामेत् द्विः तूष्णीम् ॥ ततो यजमानः कांस्यपात्रे दधिमधुघृतानि कांस्यपात्रपिहितान्यादाय ( आचार्यः ) मधुपर्काः मधुपर्काः मधुपर्काः ( यजमानः ) मधुपर्काः प्रतिगृह्यन्ताम् ( ब्राह्मणाः ) मधुपर्कान्प्रतिगृह्णीमः ॥ यजमानहस्तस्थमेव तत्पात्रमुद्घाट्य ॥ ॐ मित्रस्यत्वाचक्षुषाप्रतीक्षे इति मंत्रेण वीक्ष्य ॥ ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ इति मंत्रेण गृहीत्वा सव्ये पाणौ निधाय दक्षिणानामिकया ॥ ॐ नमः श्यावास्यायान्नशनेयत्तऽआविद्धंतत्तेनिष्कृन्तामि ॥ इति मंत्रेण प्रादक्षिण्येन मधुपर्कमालोड्य किंचिद्भूमौ क्षिप्त्वा पुनरेवं द्विवारं अनेन मंत्रेणालोड्य भूमौ निःक्षिपेत् ( ततः पात्रं भूमौ निधाय ) ॥ ॐ यन्मधुनोमधव्यंपरमꣳ रूपमन्नाद्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोसानि ॥ इति मंत्रेणानामिकांगुष्ठाभ्यां त्रिः प्राश्य प्रतिप्राशने चैतन्मन्त्रपाठः ॥ १६
शेषमसञ्चरदेशे धारयेत् ॥ तत आचम्याङ्गानि स्पृशेत् ॥ ॐ वाङ्मऽआस्येऽस्तु ॥

इति कराग्रेण मुखालम्भनम् ॥ ॐ नसोर्मे प्राणोऽस्तु ॥ इति दक्षिणवामनासारन्ध्र-
द्वये ॥ ॐ अक्ष्णोर्मे चक्षुरस्तु इति दक्षिणवामचक्षुषी ॥ ॐ कर्णयोर्मे श्रोत्रमस्तु
इति दक्षिणवामकर्णयोः ॥ ॐ बाह्वोर्मे बलमस्तु इति दक्षिणवामजान्वोः ॥ ॐ
ऊर्वोर्मे ओजोस्तु इति युगपदूरू ॥ ॐ अरिष्टानि मेङ्गानि तनुस्तन्वा मे सह सन्तु
इति शिरःप्रभृति सर्वाङ्गाणि उभाभ्यां हस्ताभ्यामालभ्याचामेत् ॥ ततो गावः
गावः गावः इति यजमानेनोक्ते ( ब्राह्मणाः ) ॐ मातारुद्राणांदुहितावसूनाᳬस्व-
सादित्यानाममृतस्यनाभिः ॥ प्रनुवोचश्चिकितुषेजनायमागामनागामादितिंवधिष्ठमम-
चामुष्यजमानस्योभयोः पाप्मा हतः ॥ उत्सृजत्तृणान्यत्तु इत्युच्चैर्ब्रूयात् ॥ गोदानम् ॥
कृतस्य मधुपर्कादिपूजनकर्मणः साङ्गतासिद्ध्यर्थं इमानि गोनिष्क्रयभूतानि द्रव्याणि
नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ पुनः सर्वान् प्रार्थयेत् ॥ अस्य
यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ॥ सुप्रसन्नैः प्रकर्त्तव्यं कर्मेदं विधिपूर्वकम् ॥
ब्राह्मणाः सन्तु शास्तारः पापात्पान्तु समाहिताः ॥ वेदानां चैव दातारः
पातारः सर्वदेहिनाम् ॥ जपयज्ञैस्तथा होमैर्दानैश्च विविधैः शुभैः ॥ देवानां च पितॄणां

रु० च तृप्त्यर्थं याजकाः स्मृताः ॥ येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् ॥ ते मां प्र०
१७ रक्षन्तु सततं जपयज्ञे व्यवस्थिताः ॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥
रुद्रध्यानपरा नित्यं प्रसन्नमनसः सदा ॥ माश्लीलभाषणाः सन्तु मा सन्तु परनि-
न्दकाः ॥ ममाप्येते हि नियमा भवन्तु सततं द्विजाः ( रुद्रकल्पद्रुमे अत्र जलयात्रां
कुर्वन्ति इति ) ततो मण्डपपूजाद्युपयुक्तसंभारान्सम्भृत्य शुक्लाम्बरधरः शुक्ल-
माल्यानुलेपनः सपत्नीको यजमानः आचार्यः ब्रह्मर्त्विक्समन्वितो गन्धमाल्यफला-
दिभिरर्चितकलशहस्तो मंगलवाद्यघोषेण भद्रंकर्णेभिरिति वेदमंत्रघोषेण च सम-
न्वितो मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारदेशं आगत्य । तत्र चतुर्भुजां शुक्लवर्णां
कूर्मपृष्ठोपरि स्थिताम् ॥ पद्मशंखचक्रशूलधरां भूमिं ध्यात्वा ॥ उद्धृतासि वराहेण
कृष्णेन शतबाहुना ॥ दंष्ट्राग्रैर्लीलया देवि विष्णुना शंकरेण च ॥ पार्वत्या चैव गायत्र्या
स्कन्दवैश्रवणेन च ॥ यमेन पूजिते देवि धर्मस्य विजिगीषया ॥ सौभाग्यं देहि पुत्रांश्च १७
धनं रूपं च पूजिता ॥ गृहाणार्घ्यमिमं देवि सौभाग्यं च प्रयच्छ मे ॥ इत्यनेन मंत्रेणार्घ्यं
दत्त्वा स्योनापृथिविनोभवेत्यादिना धरां सम्पूज्य ॥ अर्घ्यं दत्त्वा तेनैव द्वारेण दक्षिण-

पादेन सकृत्विग्यजमानो मंडपांतः प्रविशेत् ॥ दक्षिणद्वारेण पत्नीं प्रविशेत् ॥ पूर्वद्वारेण द्रव्यानयनम् ॥ पूजासम्भारानुत्तरद्वारेण प्रवेशयेत् ॥ ततो वेद्याग्नेयकोणे कुम्भं स्थापयेत् ॥ तत आचार्यो अग्न्यायतनात्पश्चिमत उपविश्याचम्य प्राणानायम्य ॥ देशकालौ संकीर्त्य अमुकगोत्रः अमुकशर्म्माहं शरीरशुद्ध्यर्थं पुरुषसूक्तं त्रिवारमेकवारं वा जपे ॥ सहस्रशीर्षा षोडश मंत्राः ॥ पुनः आचार्यः तिथ्यादिसंकीर्तनान्ते अस्मिन् रुद्रयागाख्ये कर्मणि यजमानानुज्ञया आचार्यकर्म करिष्ये इति संकल्प्य ॥ ततो गौरसर्षपान्गृहीत्वा दिग्रक्षणं कुर्यात् ॥ तत्र मंत्राः ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः ॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन ॥ ते सर्वेप्यपगच्छन्तु यज्ञकर्म समारभे ॥ ॐ रक्षोहणंव्वलगहनंवैष्णवीमिदमहंतंव्वलगमुत्किरामियम्मेनिष्ट्योयममात्योनिचखानेदमहंतंव्वलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेदमहन्तंव्वलगमुत्किरामियम्मेस-

रु० बन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तंव्वलगमुत्किरामियम्मेसजातोयमसजातोनिचखानो- प्र०

१८ त्कृत्याङ्किरामि ॥ १ ॥ रक्षोहणोवोव्वलगहनःप्प्रोक्षामिवैष्णवान्रक्षोहणोवोव्वलगहनोवनयामिव्वैष्णवान्रक्षोहणोवोव्वलगहनोवस्तृणामिव्वैष्णवान्रक्षोहणौवांव्वलगहनाऽउपदधामिव्वैष्णवीरक्षोहणौवांव्वलगहनौपर्यूहामिवैष्णवीव्वैष्णवमसिव्वैष्णवास्थ ॥ ॥ २ ॥ रक्षसांभागोसिनिरस्तꣳ रक्षऽइदमहꣳ रक्षोभितिष्ठामीदमहꣳ रक्षोवबाधऽइदमहꣳ रक्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्रोर्णुवाथांव्वायोव्वेस्तोकानामग्निराज्यस्यव्वेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसंमारुतङ्गच्छतम् ॥ ३ ॥ रक्षोहाविश्वचर्षणिरभियोनिमयोहते ॥ द्रोणेसधस्थमासदत् ॥ ४ ॥ ततः पञ्चगव्यकरणम् ॥ ताम्रपात्रे गायत्र्या गोमूत्रम् ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ इति १८

गोमयम् ॥ ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीःप्र-

दिशं÷सन्तुमह्यम् ॥ इति पयः ॥ दधिक्राव्णोंऽअकारिषंजिष्णोरश्वस्यव्वाजिनं÷ ॥
सुरभिनोमुखांकरत्प्रणऽआयूंꣳषितारिषत् ॥ इति दधि ॥ ॐ तेजोंसिशुक्रमंस्यमृत-
मसिधामनामांसि ॥ प्रियंदेवानामनाधृष्टन्देवयजंनमसि ॥ इति आज्यम् ॥ ॐ
देवस्यंत्वासवितुःप्रंसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ इति कुशोदकम् ॥ ॐ इति
आलोडनं तेनैवाभिमन्त्रणञ्च ॥ एवं पञ्चगव्यं सम्पाद्य ॥ ततो आपोहिष्ठेति तृचेन
अद्भ्यः संभृत इत्युत्तरनारायणेन च मंडपान्तः सर्वत्र प्रोक्षयेत् ॥ ॐ आपोहिष्ठा
मयोभुवस्तानंऽऊर्जेदंधातन ॥ महेरणांयचक्षंसे ॥ ॐ योवं÷शिवतंमोरसस्तस्यं
भाजयतेहनं÷ ॥ उशतीरिंवमातरं÷ ॥ २ ॥ तस्म्माऽअरंङ्गमामवोयस्यक्षयांयजि-
न्वंथ ॥ आपोंजनयंथाचनः ॥ ३ ॥ ॐ अद्भ्यः सम्भृंतः पृथिव्व्यैरसांच्चविश्वकंर्म्मणः
समंवर्त्तताग्ग्रें ॥ तस्यत्त्वष्टांव्विदधंद्रूपमेंतितन्मर्त्त्यंस्यदेवत्वमाजानमग्ग्रें ॥ १ ॥
४ व्वेदाहमेतम्पुरुंषम्महान्तंमादित्यवंर्णन्तमंसः परस्तात् ॥ तमेवव्विदित्त्वातिंमृत्त्युमेंति

क० नान्यः पन्थांव्विद्यतेयंनाय ॥ २ ॥ प्रजापंतिश्चरतिगर्ब्भेऽअन्तरजांयमानोबहुधा प्र०
१९ व्विजांयते ॥ तस्ययोनिम्परिंपश्यन्तिधीरास्तस्मिन्हतस्थुर्ब्भुवंनानिव्विश्वां ॥ ३ ॥
योदेवेब्भ्यंऽआतपंतियोदेवानांम्पुरोहिंतः ॥ पूर्व्वोयोदेवेब्भ्योंजातोनमोंरुचायब्रा-
ह्मंये ॥ ४ ॥ रुचम्ब्राह्मञ्जनयंन्तोदेवाऽअग्ग्रेतदंब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोव्विद्यात्तस्यं
देवाऽअंसन्न्वशें ॥ ५ ॥ श्रीश्चंतलक्ष्मीश्चपत्न्यांवहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्व्यात्तम् ॥ इष्णन्निंषाणामुम्मंऽइषाणसर्व्वलोकम्मंऽइषाण ॥ ६ ॥ इति मण्डपान्तः
सर्वत्र प्रोक्षयेत् ॥ ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशंनि ॥ यच्छांनः शर्म्मसप्रथाः ॥
॥ १ ॥ ॐ महीद्यौः पृथिवीचंनऽइमंयज्ञंमिंमिक्षताम् ॥ पिपृतान्नोभरींमभिः ॥ २ ॥ इति
मंत्राभ्यां भूमिं संप्रार्थ्य ॥ स्वस्तिनऽइन्द्रेति मंत्रं वारद्वयं त्रयं वा पठेत् ॥ देवा ।
आयान्तु यातुधाना अपयान्तु । शिव देवयजनं रक्षस्वेति भूमौ प्रादेशं कुर्यात् ॥

## अथ वास्तुपूजनम् । १९

ततो वास्तुवेदीपश्चिमदिशि उपविश्याचम्य प्राणानायम्य ॥ देशकालौ

संकीर्त्य अमुकगोत्रः अमुकशर्माहं प्रारिप्सितस्य अमुकरुद्रयागकर्मणः साङ्गतासिद्धये मण्डपाङ्गवास्तुपूजनं करिष्य इति संकल्पं कुर्यात् ॥ ततः वास्तुवेद्याः ईशानादिक्रमेण वा आग्नेयादिक्रमेण चतुर्षु कोणेषु लोहशंकून्रोपयेत् ॥ तत्र मंत्रः ॥ विशन्तु भूतले नागा लोकपालाश्च सर्वतः ॥ मण्डपेऽत्रावतिष्ठन्तु आयुर्बलकराः सदा ॥ इति प्रतिरोपणमंत्रावृत्तिः ॥ ततः शंकुपार्श्वेषु सदीपदधिमाषाक्षतबलिं दद्यात् ॥ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिताः ॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ १ ॥ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः ॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ २ ॥ वायव्याधिपतिश्चैव वायव्यां ये च राक्षसाः ॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ ३ ॥ ईशान्याधिपतिश्चैव ईशान्यां ये समाश्रिताः ॥ तेभ्यो बलिं प्रयच्छामि गृह्णन्तु सततोत्सुकाः ॥ ४ ॥ ततो वास्तुवेद्यां वस्त्रं प्रसार्य सुवर्णशलाकया कुंकुमेन च नव रेखाः प्राक्पश्चिमायताः नव च दक्षिणोदगायताः कुर्यात् तद्यथा ॥ ॐ शान्तायै नमः ॥ १ ॥ ॐ यशोवत्यै नमः ॥ २ ॥ ॐ कान्तायै नमः ॥ ३ ॥ ॐ विशालायै नमः ॥ ४ ॥ ॐ प्राणवाहिन्यै नमः ॥ ५ ॥ ॐ सत्यै

रु० नमः ॥ ६ ॥ ॐ सुमत्यै नमः ॥ ७ ॥ ॐ नन्दायै नमः ॥ ८ ॥ ॐ सुभद्रायै नमः ॥ ९ ॥ प्र०
इति नव रेखाः प्रागपरायताः कृत्वा ॥ ततः । ॐ हिरण्यायै नमः ॥ १ ॥ ॐ सुव्रतायै
२० नमः ॥ २ ॥ ॐ लक्ष्म्यै नमः ॥ ३ ॥ ॐ विभूत्यै नमः ॥ ४ ॥ ॐ विमलायै नमः ॥ ५ ॥ ॐ प्रियायै नमः ॥ ६ ॥ ॐ जयायै नमः ॥ ७ ॥ ॐ बलायै नमः ॥ ८ ॥ ॐ विशोकायै नमः ॥ ९ ॥ इति नव रेखाः दक्षिणोत्तरायताः कृत्वा मध्यकोष्ठचतुष्टयं एकीकृत्य ततः कोणेषु रेखां दद्यात् ॥ तत्र ब्रह्मादीनावाहयेत् ॥ वास्तोश्चतुरस्रं शरीरं देवा आक्रम्य स्थिता इति ॥ तत्तद्देवपदे तत्तद्देवावाहनम् ॥ तत्र मध्यपदचतुष्के पीते वास्तोर्हृदये ॥ ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि ॥ १ ॥ एवं सर्वत्र । ततः पूर्वपदद्वये कृष्णे दक्षिणस्तने ॥ ॐ भू० अर्य्यम्णे नमः अर्यमाणं० ॥ २ ॥ दक्षिणपदद्वये श्वेते जठरदक्षिणे ॥ ॐ भू० विवस्वते नमः विवस्वन्तं० ॥ ३ ॥ पश्चिमपदद्वये श्वेते जठरवामभागे ॥ ॐ भू० मित्राय नमः मित्रमा० ॥ ४ ॥ उत्तरपदद्वये रक्ते
वामस्तने ॥ ॐ भू० पृथिवीधराय नमः पृथिवीधरमा० ॥ ५ ॥ आग्नेयकोणे सूत्रद्विधा- २०
कृतब्रह्मपदसंलग्नपदोत्तरार्धे कृष्णे दक्षिणहस्ते ॥ ॐ भू० सावित्राय नमः सावित्रं०

॥ ६ ॥ दक्षिणार्धे रक्ते ॥ ॐ भू० सवित्रे नमः सवितारं० ॥ ७ ॥ नैर्ऋत्ये
पूर्वपदार्धे श्वेते वृषणे ॥ ॐ भू० विबुधाधिपाय नमः विबुधाधिपं० ॥ ८ ॥
नैर्ऋत्यपश्चिमार्धे रक्ते मेढ्रे ॥ ॐ भू० जयाय नमः जयं० ॥ ९ ॥ वायव्ये
पश्चिमपदार्धे रक्ते वामहस्ते ॥ ॐ भू० राजयक्ष्मणे० राजयक्ष्माणं० ॥ १० ॥
वायव्यपूर्वपदार्धे रक्ते वामहस्ते ॥ ॐ भू० रुद्राय नमः ॥ रुद्रमावाहयामि ॥ ११ ॥
ईशानपश्चिमपदार्धे श्वेते मुखे ॥ ॐ भू० अद्भ्यो नमः अपः आवा० ॥ १२ ॥
ईशानपूर्वार्द्धे श्वेते मुखे ॥ ॐ भू० आपवत्साय नमः ॥ आपवत्सं० ॥ १३ ॥
ईशानपददक्षिणार्द्धे रक्ते शिरसि ॥ ॐ भू० शिखिने नमः शिखिनं० ॥ १४ ॥
तद्दक्षिणसार्द्धपदे पीतश्वेते दक्षिणनेत्रे ॥ ॐ भू० पर्जन्याय नमः पर्जन्यं० ॥ १५ ॥
तद्दक्षिणपीतपदद्वये दक्षिणश्रोत्रे ॥ ॐ भू० जयन्ताय० जयन्तं० ॥ १६ ॥
तद्दक्षिणपीतपदद्वये दक्षिणांसे ॥ ॐ भू० कुलिशायुधाय० कुलिशायुधं० ॥ १७ ॥
तद्दक्षिणरक्तपदद्वये दक्षिणबाहौ ॥ ॐ भू० सूर्याय नमः सूर्यमा० ॥ १८ ॥
तद्दक्षिणश्वेतपदद्वये दक्षिणबाहौ ॥ ॐ भू० सत्याय नमः सत्यं० ॥ १९ ॥

क० तद्दक्षिणकृष्णसार्द्धपदे दक्षिणकूर्परे ॥ ॐ भू० भृशाय नमः भृशं० ॥ २० ॥ प्र०
२१ तद्दक्षिणोपरि कृष्णार्द्धपदे दक्षिणप्रबाहौ ॥ ॐ भू० आकाशाय नमः आकाशं० ॥ २१ ॥
तद्दक्षिणाग्नेयकोणपदार्धे धूम्रदक्षिणप्रबाह्वावेव ॥ ॐ भू० वायवे नमः वायुं० ॥ २२ ॥
तद्दक्षिणसार्द्धपदे रक्ते दक्षिणमणिबन्धे ॥ ॐ भू० पूष्णे नमः पूषाणं० ॥ २३ ॥
तत्पश्चिमश्वेतपदद्वये दक्षिणपार्श्वे ॥ ॐ भू० वितथाय० वितथं० ॥ २४ ॥
तत्पश्चिमपीतपदद्वये दक्षिणपार्श्वे एव ॥ ॐ भू० गृहक्षताय नमः गृहक्षतं० ॥ २५ ॥
तत्पश्चिमकृष्णपदद्वये दक्षिणोरौ ॥ ॐ भू० यमाय नमः यमं० ॥ २६ ॥
तत्पश्चिमरक्तपदद्वये दक्षिणजानौ ॥ ॐ भू० गन्धर्वेभ्यो नमः गन्धर्वानावा० ॥ २७ ॥
तत्पश्चिमकृष्णसार्द्धपदे दक्षिणजंघायाम् ॥ ॐ भू० भृङ्गराजाय नमः भृंगराजं० ॥ २८ ॥
तत्पश्चिमनैर्ऋत्यदक्षिणपदार्धे पीते दक्षिणस्फिचि ॥ ॐ भू० मृगाय नमः मृगं० ॥ २९ ॥
तत्पश्चिमोत्तरार्द्धे रक्तपादयोः ॥ ॐ भू० पितृभ्यो नमः पितॄना० ॥ ३० ॥
तदुत्तरसार्द्धपदे रक्ते वामस्फिचि ॥ ॐ भू० दौवारिकाय नमः दौवारिकं० ॥ ३१ ॥ २१
तदुत्तरपदद्वये श्वेते वामजंघायाम् ॥ ॐ भू० सुग्रीवाय० सुग्रीवं० ॥ ३२ ॥

तदुत्तरपदद्वये रक्ते वामजानौ ॥ ॐ भू० पुष्पदन्ताय० पुष्पदन्तं० ॥ ३३ ॥
तदुत्तरपदद्वये श्वेते वामोरौ ॥ ॐ भू० वरुणाय० वरुणमा० ॥ ३४ ॥
तदुत्तरपदद्वये पीते वामपार्श्वे ॥ ॐ भू० असुराय० असुरं० ॥ ३५ ॥
तदुत्तरसार्द्धपदे कृष्णे वामपार्श्वे ॥ ॐ भू० शेषाय० शेषं० ॥ ३६ ॥
तदुत्तरवायव्यार्धपदे वाममणिबन्धे पीते ॥ ॐ भू० पापाय० पापं० ॥ ३७ ॥
तदुत्तरप्राक्पदार्धे वामप्रबाहौ रक्ते ॥ ॐ भू० रोगाय० रोगं० ॥ ३८ ॥
तत्प्राक्सार्द्धपदे रक्ते वामप्रबाहावेव ॥ ॐ भू० अहये नमः अहिं० ॥ ३९ ॥
तत्प्राक्पदद्वये रक्ते वामकूर्परे ॥ ॐ भू० मुख्याय० मुख्यं० ॥ ४० ॥
तत्प्राक्पदद्वये कृष्णे वामबाहौ ॥ ॐ भू० भल्लाटाय० भल्लाटं० ॥ ४१ ॥
तत्प्राक्पदद्वये श्वेते वामबाहावेव ॥ ॐ भू० सोमाय० सोमं० ॥ ४२ ॥ तत्प्राक्पदद्वये
कृष्णे वामांसे ॥ ॐ भू० सर्पाय० सर्पं० ॥ ४३ ॥ तत्प्राक्सार्द्धपदे पीते वामश्रोत्रे ॥
ॐ भू० अदित्यै नमः अदितिं० ॥ ४४ ॥ तत्प्राक्अर्धपदे पीते वामनेत्रे ॥ ॐ भू० दित्यै
नमः ॥ दितिं० ॥ ४५ ॥ ततो मण्डलोत्तरे ॥ ॐ भू० वास्तोष्पतये० वास्तोष्पतिं० ॥ ततो

रु० मण्डलाद्बहिः ईशानादिचतुर्षु कोणेषु क्रमेण चरक्यादि स्थापयेत् ॥ ॐ भू० चरक्यै० प्र०
२२ चरकीं० ॥ १ ॥ ॐ भू० विदार्यै० विदारीं० ॥ २ ॥ ॐ भू० पूतनायै० पूतनां० ॥ ३ ॥
ॐ भू० पापराक्षस्यै० पापराक्षसीं० ॥ ४ ॥ पूर्वादिक्रमेण ॥ ॐ भू० स्कन्दाय नमः
स्कन्दमा० ॥ १ ॥ ॐ भू० अर्यमणे० अर्यमाणं० ॥ २ ॥ ॐ भू० जृम्भकाय०
जृम्भकं० ॥ ३ ॥ ॐ भू० पिलिपिच्छाय० पिलिपिच्छं० ॥ ४ ॥ ( अत्र त्रिविक्रममते
लोकेशावाहनम् ) ॐ मनोजूतिरिति प्रतिष्ठाप्य ॥ मंडलदेवताभ्यो नमः इति संपूज्य ॥
मंडलादीशान्यां ॐ महीद्यौरित्यादि कलशं संस्थाप्य ॥ तत्र वरुणं संपूज्य कलशोपरि
वास्तुप्रतिमामग्न्युत्तारणपूर्वकमावाह्य पूजयेत् ॥ अथाग्न्युत्तारणम् ॥ देशकालौ
संकीर्त्य० अमुकगोत्र अमुकशर्माहं अस्यां वास्तुमूर्तौ अवघातादिदोषपरिहारार्थं अ-
ग्न्युत्तारणं देवतासान्निध्यार्थं प्राणप्रतिष्ठां च करिष्ये ॥ प्रतिमां पात्रे निधाय घृतेना-
भ्यज्य तदुपरि जलधारां पातयेत् ॥ तत्र मंत्राः ॥ ॐ समुद्रस्यत्वावकयाग्ने परिव्ययया-
मसि ॥ पावकोऽअस्मभ्यंठ० शिवोभव ॥ १ ॥ हिमस्यत्वाजरायुणाग्ने परिव्ययया- २२
मसि ॥ पावकोऽअस्मभ्यंठ० शिवोभव ॥ २ ॥ उपज्मन्नुपवेतसेवतरनदीष्वा ॥

अग्नेैपित्तमपामंसि मंडूकिताभिरागंहि सेमन्नोयज्ञम्पांवकवंर्ण्णर्ठ०शिवङ्कृधि ॥ ३ ॥ अपामिदन्न्ययंनर्ठ० समुद्रस्यं निवेशंनम् ॥ अन्न्याँस्तेऽअस्म० ॥ ४ ॥ अग्ने पावक रोचिषांमन्द्रयां देवजिह्वयां ॥ आदेवान्न्वंक्षियक्षि च ॥ ५ ॥ सनं÷ पावक दीदिवोग्ने देवाँ२ऽइहावंह ॥ उपंयज्ञर्ठ० हविश्चंनः ॥ ६ ॥ पावकयायश्चितयंन्त्या कृपाक्षामंन्नु-रुचऽउषसोनभानुनां ॥ तूर्व्वन्नयामन्नेतंशस्यनूरणऽआयों घृणेनतंतृषाणोऽअजरं÷ ॥ ७ ॥ नमंस्ते हरंसे शोचिषे नमंस्तेऽअस्त्वर्च्चिषें ॥ अन्न्याँस्ते० ॥ ८ ॥ नृषदेव्वेडंप्सु-षदेव्वेड्बर्हिंषदेव्वेड्वनसदेव्वेड्स्वर्विदेव्वेद् ॥ ९ ॥ ये देवा देवानांय्यज्ञियां यज्ञियां-नाᳫंसंवत्सरीणमुपंभागमासंते ॥ अहुतादों हविषों यज्ञेऽअस्मिन्स्वयम्पिंबन्तु मधुंनो घृतस्यं ॥ १० ॥ येदेवादेवेष्वधिं देवत्त्वमायन्न्ये ब्रह्मंणः पुरऽएतारोंऽअस्य ॥ येभ्यो नऽऋते पवंते धाम किञ्चननतेदिवो न पृंथिव्याऽअधिस्न्नुषुं ॥ ११ ॥ प्राणदाऽअंपानदाव्व्यांनदाव्वंर्च्चोदाव्वंरिवोदा? ॥ अन्न्याँस्तें अस्मत्तंपन्तु हेतयं÷

क० पावकोऽअस्मभ्यर्ठ० शिवोभंव ॥ १२ ॥ एवमग्न्युत्तारणं कृत्वा ॥ ततो मूर्तिं हस्तेन प्र०
२३ स्पृश्य प्राणप्रतिष्ठां कुर्यात् ॥ ॐ आँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोहं अस्य वास्तुमूर्तेः प्राण इह प्राणाः ॥ ॐ आँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोहं अस्य वास्तुमूर्तेः जीव इह स्थितः ॥ ॐ आँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोहं अस्य वास्तुमूर्तेः वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ ॐ मनोजूति० ॥ अस्यै प्राणाः प्रतिष्ठन्तु० ॥ इति वास्तुपुरुष प्रतिष्ठितो वरदो भव ॥ पंचामृतेन संस्नाप्य कलशोपरि स्थापयेत् ॥ ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवानः ॥ यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥ आगच्छ भगवन्वास्तो सर्वदेवैरधिष्ठितः ॥ भगवन्कुरु कल्याणं यज्ञेस्मिन्सन्निधो भव ॥ ॐ भू० वास्तुपुरुषमा० ॥ वास्तोष्पतये नमः इति पंचोपचारैः षोडशोपचारैः सम्पूज्य ॥ अर्घ्यं दद्यात् ॥ पूज्योसि त्रिषु
लोकेषु यज्ञरक्षार्थहेतवे ॥ तद्विनार्चनं सिद्ध्यंति यज्ञदानान्यनेकशः ॥ अयोने भगवन्भर्ग ललाटस्वेदसम्भव ॥ गृहाणार्घ्यं मया दत्तं वास्तोः स्वामिन्नमोऽस्तु २३

ते ॥ इत्यर्घ्यं दत्वा ॥ प्रार्थना ॥ यथा मेरुगिरेः श्रृङ्गं देवानामालयः सदा ॥ तथा
ब्रह्मादिदेवानां मम यज्ञे स्थिरो भव ॥ ततो वास्तुपश्चिमत उपविश्य पायसबलिं
दद्यात् ॥ ॐ शिखिने एष पायसबलिर्न मम ( शारदातिलके तु होमो नोक्तः ) ॥
तत ईशानादारभ्य ईशानपर्यन्तं त्रिसूत्र्या मंडपं वेष्टयेत् ॥ तत्र मंत्राः ॥ ॐ
कृणुष्वपाजꣳ प्रसितिन्न पृथ्वीं याहिराजेवामवाँ२॥ऽइभेन ॥ तृष्वीमनुप्रसितिन्द्रू-
णानोस्तासिविद्ध्य रक्षसस्तपिष्ठैः ॥ १ ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृष
ताशोशुचानꣳ ॥ तपूꣳष्यग्ने जुह्वापतङ्गानसन्दितोव्विसृजव्विष्वगुल्काः ॥ २ ॥
प्रतिस्पशो व्विसृज तूर्णितमो भवापायुर्व्विशोऽअस्याऽअदब्धꣳ ॥ योनो दूरेऽअघ-
शꣳसोयोऽअन्त्यग्ने माकिष्टेव्व्यथिरादधर्षीत् ॥ ३ ॥ उदग्नेतिष्ठ प्रत्यातनु
ष्वन्न्यमित्राꣳ२ऽओषतातिग्महेते ॥ योनोऽअरातिꣳ समिधानचक्रेनीचा तन्धक्ष्यत
सन्नशुष्कम् ॥ ४ ॥ ऊर्ध्वोभव प्रतिविद्ध्याद्ध्यस्मदा विष्कृणुष्व दैव्व्यान्यग्ने ॥

क० अवस्थिरातनुहियातु जूनाञ्जामि मजामिम्प्रमृणीहि शत्रून् ॥ ५ ॥ इति रक्षोघ्न- प्र०
२४ सूक्तम् ॥ ॐ पुनन्तुमापितरः सोम्यासः पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥
पवित्रेणशतायुषा ॥ पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥ पवित्रेणशतायुषा
व्विश्वमायुर्व्यश्नवै ॥ १ ॥ अग्नऽआयूꣳषिपवसऽआसुवोर्ज्जमिषञ्चनꣳ ॥
आरेबाधस्वदुच्छुनाम् ॥ २ ॥ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुव्वि-
श्वाभूतानिजातवेदः पुनीहिमा ॥ ३ ॥ पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत् ॥ अग्ने-
क्रत्वाक्रतूँ२रनु ॥ ४ ॥ यत्तेपवित्रमर्चिष्यग्नेव्विततमन्तरा ॥ ब्रह्मतेनपुनातुमा ॥ ५ ॥
पवमानꣳ सोअद्यनःपवित्रेणव्विचर्षणिꣳ ॥ यः पोतासपुनातुमा ॥ ६ ॥ उभाभ्यां-
न्देवसवितꣳ पवित्रेणसवेनच ॥ माम्पुनीहिव्विश्वतः ॥ ७ ॥ व्वैश्वदेवीपुनतीदेव्व्या-
गाद्यस्यामिमाबह्व्यस्तन्न्वोव्वीतपृष्ठाꣳ ॥ तयामदन्तꣳ सधमादेषुव्वयꣳस्यामपतयो- २४
रयीणाम् ॥ ८ ॥ इति पावमानसूक्तं वास्तुपूजनान्तं द्वितीयदिनकृत्यञ्च समाप्तम् ॥

## अथ मण्डपपूजनम् ।

आचम्य प्राणानायम्य ॥ देशकालौ संकीर्त्य ॥ अमुकगोत्रः अमुकशर्माहं करिष्यमाणसनवग्रहमखअमुकरुद्रयागकर्मणि मण्डपपूजां करिष्ये ॥ तत्रादौ षोडशस्तम्भपूजा ॥ ततो मध्यवेदीशानस्तम्भे रक्तवर्णं ब्रह्माणं पूजयेत् ॥ एह्येहि विप्रेन्द्र पितामहादौ हंसाधिरूढ त्रिदशैकवन्द्य ॥ श्वेतोत्पलाभास कुशाम्बुहस्त गृहाण पूजां भगवन्नमस्ते ॥ हंसपृष्ठसमारूढ देवतागणपूजित ॥ ईशकोणस्थितं स्तम्भमलङ्कुरु जगत्पते ॥ आवाहयाम्यहं देवं देवेशं च प्रजापतिम् ॥ अनेकव्रतकर्तारं सर्वेषां च पितामहम् ॥ विश्वरूपं निराधारं निरालम्बं निरामयम् ॥ आगच्छ देवदेवेश स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः ॥ ॐ भू० ब्रह्मन्निहागच्छ
५ इह तिष्ठ ब्रह्मणे नमः ब्रह्माणं आवाहयामि ॥ ततो गंधादिभिः सम्पूज्य ॥ नमस्कारः ॥ विद्याधाराय वेदाय ज्ञानगम्याय सूरये । कमण्डल्वक्षमालास्रुक्स्रुवहस्ताय

रु० ते नमः ॥ प्रार्थना ॥ कृष्णाजिनाम्बरधर पद्मासन चतुर्मुख ॥ जटाधर जगद्धातः प्रसीद प्र०
२८ कमलोद्भव ॥ इति प्रार्थ्य ॥ ॐ सावित्र्यै नमः ॥ ॐ वास्तुदेवतायै नमः ॥ ॐ ब्राह्म्यै नमः ॥ ॐ गंगायै नमः ॥ इमाः सम्पूज्य स्तम्भमालभेत् ॥ महावेद्यां तमीशाने ऋजुं वसुकरात्मकम् ॥ सर्वविघ्नविनाशार्थं स्तम्भं चैवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुणऽऊतयेतिष्ठादेवोनसविता ॥ ऊर्द्ध्वोव्वाजस्यसनितायदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥ ततः स्तम्भशिरसि ॥ ॐ आयङ्गौःपृश्निरक्रमीदसदन्मातरम्पुरः ॥ पितरञ्चप्रयन्त्स्वः ॥ ॐ नागमात्रे नमः ॥

## अथ शाखाबन्धनानि पूजयेत् ।

नमोस्तु शाखाबन्धाय सुदृढाय महात्मने ॥ महामण्डपरक्षार्थं नतयः सन्तु मे सदा ॥ ॐ यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजाभ्योभयन्नः
पशुभ्यः ॥ ॐ सर्पेभ्यो नमः अनेन कृतार्चनेन मध्यवेदीशकोणास्थितस्तम्भाधिष्ठातृदेवताः प्रीयन्ताम् ॥ १ ॥ ततो मध्यवेद्याग्नेयकोणस्तम्भे कृष्णवर्णं विष्णुं २८

पूजयेत् ॥ आवाहयेत्तं गरुडोपरि स्थितं रमार्द्धदेहं सुरराजवन्दितम् ॥ केशान्तकं चक्रगदाब्जहस्तं भजामि देवं वसुदेवसूनुम् ॥ पद्मनाभं हृषीकेशं कंसचाणूरमर्दनम् ॥ आगच्छ भगवन्विष्णो स्तम्भेस्मिन्सान्निधो भव ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधे पदम् ॥ समूढमस्यपाᳫंसुरेस्वाहा ॥ ॐ भू० विष्णो इहागच्छ इह तिष्ठ विष्णवे नमः विष्णुमावाहयामि ॥ गंधादिभिः सम्पूज्य ॥ नमस्कारः ॥ नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम ॥ नमस्ते सर्वलोकात्मन्विष्णवे ते नमो नमः ॥ प्रार्थना ॥ देवदेव जगन्नाथ विष्णो यज्ञपते विभो ॥ पाहि दुःखाम्बुधेरस्मान्भक्तानुग्रहकारक ॥ ॐ लक्ष्म्यै नमः ॥ आदित्यायै नमः ॥ वैष्णव्यै नमः ॥ वसुदायै नमः ॥ सम्पूज्य ॥ स्तम्भमालभेत् ॥ महावेद्याश्चाग्निकोणे सुदृढं वस्त्रशोभितम् ॥ सर्वकार्यप्रसिद्ध्यर्थं स्तम्भं चैवालभाम्यहम् ॥ ॐ ऊर्द्धऽऊषुण० ॥ स्तम्भशिरसि ॥ ॐ आयङ्गौः० ॥ नागमात्रे नमः ॥ शाखोद्वन्धनानि पू० ॥ नमोस्तु वलिकायै त्वं शाखोद्बंधनधा-रिणी ॥ एनं महामण्डपं तु रक्ष देवि निरन्तरम् ॥ ॐ यतोयतः ॥ ॐ सर्पेभ्यो नमः ॥ २ ॥ महावेद्यां नैर्ऋत्यकोणे स्तम्भं श्वेतं शंकरं पूजयेत् ॥ एह्येहि गौरीश

क्र० पिनाकपाणे शशांकमौले वृषभाधिरूढ ॥ देवादिदेवेश महेश नित्यं गृहाण पूजां प्र०
२६ भगवन्नमस्ते ॥ गंगाधर महादेव पार्वतीप्राणवल्लभ ॥ आगच्छ भगवन्नीश स्तम्भे-स्मिन्सन्निधो भव ॥ ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुत तेनमः ॥ ॐ भू० शम्भो इहागच्छ इह तिष्ठ शम्भवे नमः शम्भुं आवाहयामि ॥ सम्पूज्य नमस्कारः ॥ वृषारूढाय देवाय पार्वतीपतये नमः ॥ वरदायार्द्धकायाय नमश्चन्द्रार्द्धमौलिने ॥ प्रार्थना ॥ पञ्चवक्र वृषारूढ त्रिलोचन सदाशिव ॥ चन्द्रमौले महादेव मम स्वस्तिकरो भव ॥ गौर्य्यै नमः ॥ ॐ माहेश्वर्य्यै नमः ॥ ॐ शोभनायै नमः ॥ ॐ भद्रायै नमः ॥ सम्पूज्य ॥ स्तम्भमालभेत् ॥ वेद्यास्तु नैर्ऋत्यकोणे शोभनं वसनान्वितम् ॥ यज्ञादिकार्येशुभदं स्तम्भं चैवालभाम्यहम् ॥ ॐ ऊर्द्धऽऊषुण० ॥ स्तम्भशिरसि ॥ ॐ आयङ्गौः० ॥ ॐ नागमात्रे नमः ततः शाखोद्वन्धनादि पूजयेत् ॥ उद्वन्धन नमस्तेऽस्तु मण्डपं रक्ष मेऽधुना ॥ अतस्त्वां पूजयाम्येव नित्यं मे वरदो
भव ॥ ॐ यतोयतः ॥ ३ ॥ महावेद्यां वायव्यकोणे पीतस्तम्भे इन्द्रं पूजयेत् ॥ एह्येहि २६
वृत्रघ्न गजाधिरूढ सहस्रनेत्र त्रिदशैकराज ॥ शचीपते शक्र सुरेश नित्यं गृहाण पूजां

भगवन्नमस्ते ॥ शचीपते महाबाहो सर्वाभरणभूषित ॥ आगच्छ भगवन्निंद्र स्तम्भेऽ-
स्मिन्सन्निधो भव ॥ ॐ त्रातारमिन्द्रंमवितारमिन्द्रंर्ठहवेहवेसुहवर्ठशूरमिन्द्रम् ॥
ह्वयामिशक्रम्पुरुहूतमिन्द्रंॅस्वस्तिनोमघवाधात्विन्द्रंः ॥ ॐ भू० इन्द्रेहागच्छेह तिष्ठ
इन्द्राय नमः इन्द्रमावाहयेत् ॥ सम्पूज्य नमस्कारः ॥ पुरन्दर नमस्तेऽस्तु वज्रहस्त
नमोऽस्तु ते ॥ शचीपते नमस्तुभ्यं नमस्ते मेघवाहन ॥ प्रार्थना ॥ देवराज गजारूढ
पुरन्दर शतक्रतो ॥ वज्रहस्त महाबाहो वाञ्छितार्थप्रदो भव ॥ ॐ इन्द्राण्यै नमः
ॐ आनन्दायै नमः ॥ ॐ विभूत्यै नमः ॥ ॐ अदित्यै नमः ॥ सम्पूज्य ॥ स्तम्भमाल-
भेत् ॥ वेद्या वायव्यकोणे तु चतुरस्रं विभूषितम् ॥ देवानां रक्षणार्थाय स्तम्भं
आलभ्यते मया ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ स्तम्भशिरसि ॥ ॐ आयङ्गौः० ॐ नागमात्रे
नमः ॥ शाखोद्बन्धनादि पूजयेत् ॥ तिर्यक्काष्ठयुते देवि रज्जुपाशयुते सदा ॥
महामण्डपरक्षार्थमर्चयिष्यामि त्वां मुदा ॥ ॐ यतोयतः ॥ ४ ॥ ततो वाह्ये ईशाने
रक्तस्तम्भे सूर्यम् ॥ आवाहयेत्तं द्विभुजं दिनेशं सप्ताश्ववाहं द्युमणिं ग्रहेशम् ॥
सिन्दूरवर्णं प्रतिभावभासं भजामि सूर्यं कुलवृद्धिहेतोः ॥ सप्तहस्त महाबाहो

क॰ सप्तश्वेताश्ववाहन ॥ आगच्छ भगवन्भानो स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ प्र॰
२७ ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्त्यंञ्च ॥ हिरण्ययेनसवितारथेनादेवो-
यातिभुवनानिपश्यन् ॥ ॐ भू० सूर्येहागच्छेह तिष्ठ ॥ सूर्याय नमः सूर्यमावाहयामि ॥
सम्पूज्य नमस्कारः ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥ प्रार्थना ॥ पद्महस्त
रथारूढ पद्मासन सुमङ्गल ॥ क्षमां कुरु दयालो त्वं ग्रहराज नमोऽस्तु ते ॥ ॐ सौर्य्यै
नमः ॥ ॐ भूत्यै नमः ॥ ॐ सावित्र्यै नमः ॥ ॐ मङ्गलायै नमः ॥ सम्पूज्य ॥
स्तम्भमालभेत् ॥ मण्डपस्येशानभागे सुदृढं पञ्चहस्तकम् ॥ महामण्डपरक्षार्थं
स्तम्भमालभते स्वयम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ ५ ॥ ईशानपूर्वयोर्मध्ये श्वेतस्तम्भे
गणेशम् ॥ आवाहयेत्तं गणराजदेवं रक्तोत्पलाभासमशेषवन्द्यम् ॥ विघ्नान्तकं
सिद्धिकरं गणेशं भजामि रौद्रं सहितं च सिद्ध्या ॥ लम्बोदरं महाकायं गजवक्त्रं
चतुर्भुजम् ॥ आगच्छ गणनाथस्त्वं स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ गणानान्त्वा २७
गणपतिर्ठ०हवामहेप्प्रियाणान्त्वाप्प्रियपतिर्ठ०हवामहेनिधीनान्त्वानिधिपतिर्ठ० हवा-

महेव्वसोमम ॥ आहमंजानिगर्भंधमात्वमंजासिगर्भंधम् ॥ ॐ भू० गणपते इहागच्छ इह तिष्ठ ॥ गणपतये नमः गणपतिमावाहयामि ॥ सम्पूज्य नमस्कारः ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ प्रार्थना ॥ लम्बोदर महाकाय सततं मोदकप्रिय ॥ गौरीसुत गणेश त्वं विघ्नराज प्रसीद मे ॥ ॐ सरस्वत्यै नमः ॥ ॐ विघ्नहरायै नमः ॥ ॐ जयायै नमः ॥ सम्पूज्य ॥ स्तम्भमालभेत ॥ ईशानपूर्वयोर्मध्ये श्वेतं स्तम्भं सुलक्षणम् ॥ महामण्डपशोभार्थं स्तम्भं चैव स्पृशाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ ६ ॥ पूर्वाग्नेययोर्मध्ये कृष्णवर्णस्तम्भे यमम् ॥ एह्येहि दण्डायुध धर्मराज कालाञ्जनाभास विशालनेत्र ॥ विशालवक्षस्थल रौद्ररूप गृहाण पूजां भगवन्नमस्ते ॥ चित्रगुप्तादिसंयुक्त दण्डमुद्गरधारक ॥ आगच्छ भगवन्धर्म स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ यमायत्वामखायत्वासूर्य्यस्यत्वातपसे ॥ देवस्त्वा-सवितामद्ध्वानक्तुपृथिव्याः सꣳस्पृशस्पाहि॥ अर्चिरसिशोचिरसितपोसि॥ॐ भू०यमेहागच्छेह तिष्ठ यमाय नमः यममावा० ॥ संपूज्य नमस्कारः ॥ ईषत्पीन नमस्तेऽस्तु दण्डहस्त नमोऽस्तु ते ॥ महिषस्थ नमस्तेस्तु धर्मराज नमोस्तुते ॥ प्रार्थना ॥ धर्मराज महाकाय दाक्षि-

क० णाधिपते यम ॥ रक्तेक्षण महाबाहो मम पीडां निवारय ॥ ॐ सन्ध्यायै नमः ॥ ॐ आञ्जन्यै नमः ॥ ॐ क्रूरायै नमः ॥ ॐ नियन्त्र्यै नमः ॥ सम्पूज्य ॥ स्तम्भमालभेत ॥ मण्डपस्याग्नेयकोणे पूर्वयोरन्तरे स्थितम् ॥ मण्डपस्याविनाशार्थं स्तम्भश्चैवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ ७ ॥ आग्नेयकोणे कृष्णवर्णस्तम्भे नागराजम् ॥ एह्येहि नागेन्द्र धराधरेश सर्वामरैर्वन्दितपादपद्म ॥ नानाफणामण्डलराजमान गृहाण पूजां भगवन्नमस्ते ॥ आशीविषसमोपेत नागकन्याविराजित ॥ आगच्छ नागराजेन्द्र स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवि तेभ्यः सर्प्पेभ्योनमः ॥ ॐ भू० नागराजेहागच्छेह तिष्ठ ॥ नागराजाय नमः नागराजम् ॥ सम्पूज्य नमस्कारः ॥ नमः खेटकहस्तेभ्यो त्रिभोगेभ्यो नमो नमः ॥ नमो भीषणदेवेभ्यः खड्गधृग्भ्यो नमो नमः ॥ प्रार्थना ॥ खड्गखेटधराः सर्प्पाः फणामण्डलमण्डिताः ॥ एकभोगाः साक्षश्रोत्राः वरदाः सन्तु मे सदा ॥ ॐ मध्यमसंध्यायै नमः ॥ ॐ धरायै नमः ॥ ॐ पद्मायै नमः ॥ ॐ महापद्मायै नमः ॥ सम्पूज्य ॥ स्तम्भमालभेत् ॥ मण्डपस्याग्नेयकोणे दिव्यं वस्त्रादिभूषितम् ॥ प्रतिष्ठाकार्यसिद्ध्यर्थं स्तम्भमालभते स्वयम् ॥

ॐ ऊर्द्धऽऊषुण० ॥ ८ ॥ अग्निदक्षिणयोर्मध्ये श्वेतस्तम्भे स्कन्दं० ॥ आवाहयामि देवेशं षण्मुखं कृत्तिकासुतम् ॥ रुद्रतेजःसमुत्पन्नं देवसेनासमन्वितम् ॥ मयूरवाहनं शक्तिपाणिं वै ब्रह्मचारिणम् ॥ आगच्छ भगवन्स्कन्द स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्राद्रुत वापुरीषात् ॥ श्येनस्यपक्षाहरिणस्य बाहूऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन् ॥ ॐ भू० स्कन्देहागच्छेह तिष्ठ स्कन्दाय नमः स्कन्दमावाहयामि ॥ सम्पूज्य नमस्कारः ॥ नमः स्कन्दाय शैवाय घण्टाकुक्कुट-धारिणे ॥ पताकाशक्तिहस्ताय षण्मुखाय च ते नमः ॥ प्रार्थना ॥ मयूरवाहन स्कन्द गौरीसुत षडानन ॥ कार्तिकेय महाबाहो दयां कुरु दयानिधे ॥ ॐ पश्चिमसंध्यायै नमः ॥ सम्पूज्य ॥ स्तम्भमालभेत् ॥ अग्निदक्षिणयोर्मध्ये सुपुष्पादिविभूषितम् ॥ सुकाष्ठनिर्मितं स्तम्भमालभामि शुभाप्तये ॥ ॐ ऊर्द्ध्वऽ-ऊषुण० ॥ ९ ॥ दक्षिणनैर्ऋत्ययोर्मध्ये धूम्रस्तम्भे वायुम् ॥ आवाहयामि देवेशं भूतानां देहधारिणम् ॥ सर्वाधारं महावेगं मृगवाहनमीश्वरम् ॥ ध्वजहस्तं गन्धवहं त्रैलोक्यान्तरचारिणम् ॥ आगच्छ भगवन्वायो स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ व्वायो

रु० येतैसहस्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्त्सोमपीतये ॥ ॐ भू० वायो इहागच्छेह प्र०
२९ तिष्ठ ॥ वायवे नमः वायुमावाहयामि ॥ संपूज्य नमस्कारः ॥ नमो धरणिपृष्ठस्थ समीरण नमोऽस्तु ते ॥ धूम्रवर्ण नमस्तेऽस्तु शीघ्रगामिन्नमोऽस्तु ते ॥ प्रार्थना ॥ धावन्धरणिपृष्ठस्थ ध्वजहस्त समीरण ॥ दण्डहस्त मृगारूढ वरं देहि वरप्रद ॥ ॐ वायव्यै नमः ॥ ॐ गायत्र्यै नमः ॥ मध्यमसंध्यायै नमः ॥ संपूज्य ॥ स्तम्भमा-लभेत् ॥ निर्ऋतिदक्षिणयोर्मध्ये स्वक्षं यज्ञीयकाष्ठजम् ॥ शान्तिपुष्टिकरं रम्यं स्तम्भं चैवालभाम्यहम् ॥ ॐ ऊर्द्धऽऊषुण० ॥ १० ॥ नैर्ऋत्ये पीतस्तम्भे सोमम् ॥ आवाहयामि देवेशं शशाङ्कं रजनीपतिम् ॥ क्षीरोदधिसमुद्भूतं हरमौलिविभूष-णम् ॥ सुधाकरं द्विजाधीशं त्रैलोक्यं प्रीतिकारकम् ॥ औषध्या निकरं सर्वसोमं कन्दर्पवर्द्धनम् ॥ आगच्छ भगवन्सोम स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ आप्या-यस्वसमेतुतेव्विश्वतः सोमवृष्ण्यम् ॥ भवाव्वाजस्यसङ्गथे ॥ ॐ भू० सोमेहागच्छेह २९
तिष्ठ सोमाय नमः सोममावाहयामि ॥ संपूज्य नमस्कारः ॥ अत्रिपुत्र नमस्तेऽस्तु नमस्ते शशिलाञ्छन ॥ श्वेताम्बर नमस्तेऽस्तु ताराधिप नमोऽस्तु ते ॥ प्रार्थना ॥

अत्रिपुत्र निशानाथ द्विजराज सुधाकर ॥ अश्वारूढ गदाहस्त वरं देहि वरप्रद ॥
ॐ सावित्र्यै नमः ॥ ॐ अमृतकलायै नमः ॥ ॐ पश्चिमसंध्यायै नमः ॥ संपूज्य ॥
स्तम्भमालभेत् ॥ नैर्ऋत्यकोणभूमौ तु सरलं कार्यसाधकम् ॥ मनोहरं सौम्यरूपं
स्तम्भं चैवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण ॥ ११ ॥ नैर्ऋत्यपश्चिमयोर्मध्ये श्वेतस्तम्भे
वरुणम् ॥ आवाहयामि देवेशं सलिलस्याधिपं प्रभुम् ॥ शङ्खपाशधरं सौम्यं
वरुणमम्भसां पतिम् ॥ कुम्भीरथसमारूढं मणिरत्नसमन्वितम् ॥ आगच्छ देव
वरुण स्तम्भेऽस्मिन्सन्निधो भव ॥ ॐ इमम्मेंवरुणश्रुधीहवमद्याचंमृडय ॥ त्वा-
मवस्युराचके ॥ ॐ भू० वरुणेहागच्छेह तिष्ठ वरुणाय नमः वरुणमा० ॥ संपूज्य
नमस्कारः ॥ वरुणाय नमस्तेऽस्तु नमः स्फटिकदीप्तये ॥ नमस्ते श्वेतहाराय जलेशाय
नमो नमः ॥ प्रार्थना ॥ शङ्खस्फटिकवर्णाभ श्वेतहाराम्बरावृत ॥ पाशहस्त महाबाहो
दयाङ्कुरु दयानिधे ॥ ॐ वारुण्यै नमः ॥ ॐ पाशधारिण्यै नमः ॥ ॐ बृहत्यै नमः ॥
संपूज्य ॥ स्तम्भमालभेत् ॥ प्रत्यक्षस्थ विश्वरूपस्त्वं विश्वकर्मविनिर्मि-
तम् ॥ सुराणामर्चनविधौ स्तम्भमेवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ १२ ॥

क० पश्चिमवायव्यान्तराले श्वेतस्तम्भे अष्टवसून् ॥ आवाहयामि देवेशान्वसूनष्टौ महा- प्र०
बलान् ॥ सौम्यमूर्तिधरान्देवान्दिव्यायुधकरान्वितान् ॥ शुद्धस्फटिकसंकाशान्नाना-
३० वस्त्रविराजितान् ॥ आवाहयामि स्तम्भेऽस्मिन्वसूनष्टौ सुखावहान् ॥ ॐ व्वसु-
ब्भ्यस्त्वारुद्रेब्भ्यस्त्वादित्येब्भ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्रावरुणौत्वावृष्ट्यावताम् ॥
व्यन्तुव्वयोक्तंरिहाणामरुताम्पृषतीर्गच्छवशापृश्निर्भूत्वादिवङ्गच्छततोनोवृष्टिमा-
वह ॥ चक्षुष्पाऽअग्नेऽसिचक्षुर्म्मेपाहि ॥ ॐ भू० वसव इहागच्छतेह तिष्ठत वसुभ्यो
नमः वसूनावाहयामि ॥ संपूज्य ॥ नमस्कारः ॥ नमस्करोमि देवेशान्नानावस्त्रविरा-
जितान् ॥ शुद्धस्फटिकसंकाशान्दिव्यायुधधरान्वसून् ॥ प्रार्थना ॥ दिव्यवस्त्रा दिव्य-
देहा पुष्पमालाविभूषिताः ॥ वसवोऽष्टौ महाभागा वरदाः सन्तु मे सदा ॥ ॐ
विनतायै नमः ॥ ॐ अणिमायै नमः ॥ ॐ भूत्यै नमः ॥ ॐ गरिमायै नमः ॥
सम्पूज्य ॥ स्तम्भमालभेत् ॥ वायुप्रत्यङ्गमध्यगतं सर्वकार्यार्थसाधकम् ॥ सकलानन्दक ३०
भव्यं स्तम्भमेवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ १३ ॥ वायव्ये पीतस्तम्भे
धनदम् ॥ आवाहयामि देवेशं धनदं यक्षपूजितम् ॥ महाबलं दिव्यदेहं नरयानगतं

विभुम् ॥ दिव्यमालाम्बरधरं गदाहस्तं महाभुजम् ॥ आगच्छ यक्षराजेन्द्र स्तम्भे
ऽस्मिन्सान्निधो भव ॥ ॐ सोमोंधेनुर्ठं० सोमोऽअर्व्वन्तमाशुर्ठं० सोमोंव्वीरङ्कर्म्म
ण्यन्ददाति ॥ सादन्न्यंव्विदत्थ्यर्ठं० सभेयम्पितृश्रवणंय्योददांशदस्मै ॥ ॐ भू०
धनदेहागच्छेह तिष्ठ धनदाय नमः धनदमावाहयामि ॥ सम्पूज्य ॥ नमस्कारः ॥
यक्षराज नमस्तेऽस्तु नमस्ते नरयानग ॥ पीताम्बर नमस्तेऽस्तु गदापाणे नमोऽस्तु
ते ॥ प्रार्थना ॥ दिव्यदेह धनाध्यक्ष पीताम्बर गदाधर ॥ उत्तरेश महाबाहो
वाञ्छितार्थफलप्रद ॥ ॐ आदित्यायै नमः ॥ ॐ लघिमायै नमः ॥ ॐ सिनीवाल्यै
नमः ॥ संपूज्य ॥ स्तम्भमालभेत ॥ वायुकोणस्थितं दिव्यं पञ्चहस्तप्रमाणकम् ॥
ममाध्वरत्राणकरं स्तम्भमेवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ १४ ॥ उत्तरवायव्य-
योरन्तराले पीतस्तम्भे गुरुम् ॥ आवाहयामि देवेशं गुरुं त्रिदशपूजितम् ॥ हेमगो-
रोचनावर्णं पीनस्कन्धं सुवक्षसम् ॥ शङ्खं च कलशञ्चैव पाणिभ्यां हेमविभ्रमम् ॥
ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्र- ६
जाततदस्मासुद्रविणंधेहिचित्रम् ॥ ॐ भू० बृहस्पते इहागच्छेह तिष्ठ ॥ बृहस्पतये

क० नमः बृहस्पतिमावाहयामि ॥ सम्पूज्य नमस्कारः ॥ ब्रह्मपुत्र नमस्तेऽस्तु पीतध्वज प्र०
३१ नमोऽस्तु ते ॥ पूजितोसि यथाशक्त्या दण्डहस्त बृहस्पते ॥ क्रूरग्रहाभिभूतस्य शान्तिं
देवगुरो कुरु ॥ ॐ पौर्णमास्यै नमः ॥ ॐ सावित्र्यै नमः ॥ संपूज्य ॥ स्तम्भमालभेत् ॥
वायव्योत्तरयोर्मध्ये भूषितं गुरुदैवतम् ॥ मत्सुसत्राविघ्नकरं स्तम्भं चैवालभाम्यहम् ॥
ॐ ऊर्द्ध्वऽऊषुण० ॥ १५ ॥ उत्तरेशानयोर्मध्ये रक्तस्तम्भे विश्वकर्माणम् ॥ आवाह-
यामि देवेशं विश्वकर्माणमीश्वरम् ॥ मूर्तामूर्त्तकरं देवं सर्वकर्तारमीश्वरम् ॥ त्रैलोक्य-
सूत्रकर्तारं द्विभुजं विश्वदर्शितम् ॥ आगच्छ विश्वकर्मस्त्वं स्तम्भेऽस्मिन्सन्निधो
भव ॥ ॐ व्विश्वकर्म्मन्न्हविषाव्वर्द्धनेनत्रातारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्मैव्विशः
समनमन्तपूर्व्वीरयमुग्ग्रोव्विहव्योयथासत् ॥ विश्वकर्म्मन्निहागच्छेह तिष्ठ ॥ ॐ
भू० विश्वकर्मणे नमः विश्वकर्माणमावाहयामि ॥ सम्पूज्य ॥ नमस्कारः ॥ नमामि
विश्वकर्माणं द्विभुजं विश्वदर्शितम् ॥ त्रैलोक्यसूत्रकर्तारं महाबलपराक्रमम् ॥ ३१
प्रार्थना ॥ प्रसीद विश्वकर्मस्त्वं शिल्पशास्त्रविशारद ॥ सदण्डपाणे द्विभुज तेजोमू-
र्तिधर प्रभो ॥ ॐ सिनीवाल्यै नमः ॥ ॐ सावित्र्यै नमः ॥ ॐ वास्तुदेवतायै नमः ॥

सम्पूज्य ॥ स्तम्भमालभेत् ॥ सोमेशानयोर्मध्ये सर्वत्राणकरम्परम् ॥ सुगन्धाद्यर्चित-
ममुं स्तम्भमेवालभाम्यहम् ॥ ॐ ऊर्द्ध्वऽऊषुण० ॥ १६ ॥ इति षोडशस्तम्भपूजा ॥
स्तम्भशिरसि वलिकासु ॥ नागमात्रे नमः ॥ सर्वेषां नागराजानां पातालतल-
वासिनाम् ॥ नागमातर आयान्तु भवन्तु सगणाः स्थिराः ॥ ॐ आयङ्गौः० ॥
इति सम्पूज्य नमस्कारः ॥ नमोऽस्तु वलिकाबन्ध सुदृढ त्वं शुभासिदम् ॥ एनं
महामण्डपन्तु रक्ष रक्ष निरन्तरम् ॥ ॐ यतोयतः० ॥ प्रार्थना ॥ शेषादिनाग-
राजानः समस्ता मम मण्डपे ॥ पूजां गृह्णन्तु सततं प्रसीदन्तु ममोपरि ॥ ततो
भूमिस्पर्शः ॥ ॐ भूरंसिभूमिंरस्यदिंतिरसिव्विश्वधायाव्विश्वंस्यभुवंनस्यधर्त्री ॥
पृथिर्वीयंच्छपृथिवीन्दृंर्ठ०हपृथिवीम्माहिंर्ठ०सीः ॥ भूमिभूमिमवगान्माता यथा मात-
रमप्यगात् ॥ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् ॥ ततः पुष्पाञ्जलिं
गृहीत्वा ॥ नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेऽस्तु हृषीकेश
महापुरुष पूर्वज ॥ ॐ नृसिंह उग्ररूप ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा ॥ ॐ
नमः शिवाय इति पुष्पांजलिं मण्डपभूमौ विकिरेत् ॥ ततो मण्डपाद्बहिः पूर्वे



तोरणद्वारसमीपमागत्य ॥ आचम्य प्राणानायम्य ॥ अस्मिन् रुद्रयागकर्माणि पूर्वादि-
३२ तोरणपूजाङ्करिष्ये ॥ मौलीबन्धनम् ॥ सुदृढं तोरणं पूर्वे अश्वत्थं काञ्चनप्रभम् ॥
रक्षार्थं चैव बध्नामि कर्मण्यस्मिन्सुशोभितम् ॥ ॐ अग्निमीले पुरोहितं यज्ञस्य
देवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ ॐ भू० ऋग्वेदाधिष्ठिताय सुदृढतोरणाय नमः ॥
इति गंधादिना संपूज्य ॥ तत्र त्रिशूलशृङ्गेषु प्रादक्षिण्येन ॥ इन्द्रराहुभ्यां नमः ॥
ॐ धात्रे नमः ॥ ॐ भगबृहस्पतिभ्यां नमः ॥ संपूज्य ॥ प्रार्थयेत् ॥ यथा मेरुगिरे
शृङ्गं देवानामालयः सदा ॥ तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव ॥ तत्रैकं
कलशं प्रतिष्ठाप्य ॥ कलशोपरि ॐ ध्रुवाय नमः ॥ ॐ अध्वराय नमः ॥ ॐ मध्ये
मेधापतये नमः सम्पूज्य ॥ ततो दक्षिणे गत्वा ॥ आचम्य ॥ मौलीबन्धनम् ॥ औदुम्बरं
च विकटं याम्ये तोरणमुत्तमम् ॥ रक्षार्थं चैव बध्नामि कर्मण्यस्मिन्सुखाय नः ॥
ॐ इषेत्वोर्ज्जेत्वांव्वायवंस्थदेवोवंः सविताप्रार्प्पंयतुश्रेष्ठंतमायकर्मंणऽआप्प्यायद्ध्वम-
घ्न्याऽइन्द्रांयभागम्प्रजावंतीरनमीवाऽअंयक्ष्मामावंस्तेन ईंशतमाघशंर्ठ०सोद्ध्रुवाऽ- ३२
अस्मिन्गोपंतौस्यातबह्वीर्य्यजंमानस्यपशून्पांहि ॥ ॐ भू० सुभद्रतोरणाय नमः ॥

सुभद्रतोरणमा० ॥ विकटतोरणाय नमः ॥ विकटतोरणमा० ॥ संपूज्य ॥ तत्र त्रिशूलश्रृङ्गेषु प्रादक्षिण्येन ॥ ॐ सूर्यपूषाभ्यां नमः सूर्यपूषाणौ आवाहयामि ॥ मध्ये मित्राय नमः मित्रं० ॥ ॐ वरुणाङ्गारकाभ्यां नमः ॥ वरुणाङ्गारकौ० ॥ सम्पूज्य प्रार्थयेत् ॥ यथा मेरुगिरेः श्रृङ्गं देवानामालयः सदा ॥ तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव ॥ तत्रैकं कलशं संस्थाप्य ॥ कलशोपरि ॥ ॐ पर्जन्याय नमः ॥ ॐ अशोकाय नमः ॥ मध्ये धरायै नमः ॥ इति सम्पूज्य ॥ पश्चिमे गत्वा आचम्य ॥ मौलीबन्धनम् ॥ प्लाक्षं च पश्चिमे भीमं तोरणं स्वर्णसन्निभम् ॥ रक्षार्थं चैव बध्नामि कर्मण्यस्मिन्सुखाय नः ॥ ॐ अग्नऽआयाहिवीतये गृणानो हव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ ॐ सुभीमतोरणाय नमः ॥ सुकर्मतोरणाय नमः ॥ संपूज्य ॥ तत्र त्रिशूलश्रृङ्गेषु प्रादक्षिण्येन ॥ ॐ अर्यमशुक्राभ्यां नमः अर्यमशुक्रौ० ॥ मध्ये ॐ अंशवे नमः अंशुमा० ॥ ॐ विवस्वद्बुधाभ्यां नमः विवस्वद्बुधौ० ॥ संपूज्य प्रार्थयेत् ॥ यथा मेरुगिरेः श्रृङ्गं देवानामालयः सदा ॥ तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव ॥ तत्रैकं कलशं संस्थाप्य ॥ कलशोपरि

रु० ॐ अनिलाय नमः ॥ ॐ अनिलंआ० ॥ मध्ये ॐ वाक्पतये नमः ॥ इति प्र०
३३ संपूज्य ॥ तत उत्तरे गत्वा ॥ आचम्य ॥ मौलीबन्धनम् ॥ न्यग्रोधतोरणमिव उत्तरे च शशिप्रभम् ॥ रक्षार्थं चैव बध्नामि कर्मण्यस्मिन्सुखाय नः ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥ ॐ सुहोत्रतोरणाय नमः ॥ ॐ सुप्रभतोरणाय नमः ॥ सम्पूज्य ॥ तत्र त्रिशूलश्रृङ्गेषु प्रादक्षिण्येन ॥ ॐ त्वष्टृसोमाभ्यां नमः ॥ ॐ सवितृकेतुभ्यां नमः ॥ ॐ विष्णुशनिभ्यां नमः ॥ संपूज्य ॥ प्रार्थयेत् ॥ यथा मेरुगिरेः श्रृङ्गं देवानामालयः सदा ॥ तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव ॥ तत्रैकं कलशं संस्थाप्य ॥ कलशोपरि ॥ ॐ प्रत्यूषाय नमः ॥ ॐ प्रभासाय नमः ॥ मध्ये ॐ विघ्नेशाय नमः ॥ सम्पूज्य ॥ प्रार्थयेत् ॥ तोरणाधिष्ठिता देवाः पूजिता भक्तिमार्गतः ॥ ते सर्वे मम यज्ञेस्मिन् रक्षां कुर्वन्तु वः सदा ॥ इति तोरणपूजा ॥ ततो मंडपस्य द्वारपूजा ॥ पूर्वे गत्वा आचम्य
प्राणानायम्य ॥ देशकालौ संकीर्त्य० अस्मिनुद्रयागकर्मणि मंडपस्य पूर्वादिद्वारपूजां ३३
करिष्ये ॥ आयाहि वज्रसंघात पूर्वद्वारकृपाधिप ॥ ऋग्वेदाधिपते नाम्ना सुशोभन

नमोस्तु ते ॥ द्वौ कलशौ पार्श्वयोः स्थापयेत् ॥ प्रथमदक्षिणकलशोपरि ॥ ॐ प्रशान्ताय नमः ॥ द्वितीयोत्तरकलशोपरि ॥ ॐ शिशिराय नमः ॥ ततो मध्ये तृतीयप्रथमस्थापितकलशोपरि ॥ ॐ ऐरावताय नमः ॥ गन्धादिना सम्पूज्य प्रार्थयेत् ॥ सवस्त्रं सजलं गन्धं पुष्पपल्लवसंयुतम् ॥ सरत्नं स्थापयाम्येव द्वारेऽस्मिन्कलशद्वयम् ॥ द्वारश्रियै नमः इति ऊर्ध्वम् ॥ अधः देहल्यै नमः ॥ दक्षिणशाखायाम् ॥ ॐ गणेशाय नमः ॥ वामशाखायां ॐ स्कन्दाय नमः ॥ द्वारकलशयोः ॥ ॐ गंगायै नमः । ॐ यमुनायै नमः ॥ सम्पूज्य ॥ ऋग्वेदिनौ पूजयेत् ॥ ॐ अग्निमीलेपुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ कर्मनिष्ठा तपोयुक्ता ब्राह्मणा वेदपारगाः ॥ जपार्थं चैव सूक्तानां यज्ञे भवत ऋत्विजौ ॥ मध्यकलशोपरि ॥ एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधराऽमरेश ॥ संवीज्यमानोऽप्सरसां गणेन रक्षाध्वरन्नो भगवन्नमस्ते ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामिशक्रंपुरुहूतमिन्द्र ꣳ स्वस्तिनोमघवाधात्विन्द्र ÷ ॥ इमां पताकां पीतां च ध्वजं पीतं सुशोभनम् ॥

६० आलभामि सुरेशाय शचीप्रीत्यै नमो नमः ॥ ध्वजपताकयोर्मध्ये ॥ ॐ हेतुकाराय प्र०
३४ नमः ॥ ॐ क्षेत्रपालाय नमः इति सम्पूज्य प्रार्थयेत् ॥ इन्द्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः ॥ शतयज्ञाधिपो देवस्तस्मै नित्यं नमोनमः ॥ ततो बलिदानम् ॥ माषभक्तबलिं देव गृहाणेन्द्र शचीपते ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ ॐ नमो भगवते इन्द्राय सकलसुराणामधिपतये सवाहनाय सपरिवाराय सशक्तिकाय तत्पार्षदेभ्यः सर्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्य इमं सदीपदधिमाषभक्तबलिं समर्पयामि ॥ भो इन्द्र स्वां दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य गृहे आयुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन इन्द्रः प्रीयताम् ॥ १ ॥ ततोऽग्निकोणमागत्य ॥ आचम्य ॥ कलशं संस्थाप्य कलशोपरि ॥ ॐ पुण्डरीकाय नमः ॥ ॐ अमृताय नमः ॥ सम्पूज्य ॥ नमस्कारः ॥ एह्येहि सर्वामरहव्यवाह मुनिप्रवर्य्यैरभितोऽभिजुष्ट ॥ तेजोवता लोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमस्ते ॥ प्रार्थना ॥ सप्तार्चिषं च बिभ्राणमक्षमालां ३४
कमण्डलुम् ॥ ज्वालामालाकुलं रक्तं शक्तिहस्तमजासनम् ॥ ॐ त्वन्नोऽअग्नेतवदेव-

पायुर्भिर्मघोनोरिक्षतन्न्वइचवन्थ ॥ आतातोकस्यतनयेगवांमस्यनिमिषर्ठरचंमाणस्तवं
व्रते ॥ ॐ भू० अग्नये नमः अग्निमा० ॥ सम्पूज्य ॥ ध्वजपताकामालभ्य ॥ पताका-
माग्नये रक्तां गन्धमाल्यादिभूषिताम् ॥ स्वाहायुक्ताय देवाय चालभामि हविर्भुजे ॥
ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे ॥ देवाँ २ऽआसादयादिह ॥ ध्वजपताकयोः ॥
ॐ कुमुदाक्षाय नमः ॥ ॐ क्षेत्रपालाय नमः ॥ सम्पूज्य ॥ नमस्कारः ॥ आग्नेयपुरुषो
रक्तः सर्वदेवमयोऽव्ययः ॥ धूम्रकेतुरजोऽध्यक्षस्तस्मै नित्यं नमो नमः ॥ बलिदानम् ॥
इमं माषबलिं देव गृहाणाग्ने हुताशन ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥
अग्नये साङ्गाय सपरिवाराय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि ॥
भो अग्ने स्वां दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य गृहे आयुः-
कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन
बलिदानेन अग्निः प्रीयताम् ॥ २ ॥ दक्षिणे गत्वा आचम्य ॥ द्वारकलशौ प्रतिष्ठा-
प्य कलशोपरि ॐ पर्जन्याय नमः ॥ ॐ अशोकाय नमः ॥ मध्यकलशे ॐ वामन-
दिग्गजाय नमः ॥ सम्पूज्य प्रार्थयेत् ॥ सवस्त्रं सजलं गन्धं पुष्पपल्लवसंयुतम् ॥

रु० सरत्नं स्थापयाम्येव द्वारेऽस्मिन्कलशद्वयम् ॥ ततो द्वारोर्ध्वे ॐ द्वारश्रियै नमः ॥ प्र०
३५ अधः ॐ देहल्यै नमः ॥ द्वारशाखयोः ॥ ॐ पुष्पदन्ताय नमः ॥ द्वारकलशयोः ॥
ॐ गोदावर्य्यै नमः ॥ ॐ कृष्णायै नमः ॥ सम्पूज्य प्रार्थयेत् ॥ वैवस्वत महादेव नमस्ते
धर्मसाक्षिक ॥ शिवाज्ञया पिहितो देव दिशं रक्ष भवानिह ॥ ततो यजुर्वेदिनौ
पूजयेत् ॥ ॐ इषेत्वोर्ज्जेत्वेति ॥ ततो मध्यकलशोपरि ॥ एह्येहि वैवस्वत धर्मराज
सर्वामरैरर्चित धर्ममूर्ते ॥ शुभाशुभानन्दशुचामधीश शिवाय नः पाहि मखं नमस्ते ॥
ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायस्वाहाघर्म्मःपित्रे ॥ ॐ भूः०
यमं साङ्गं सपरिवारमावा० ॥ सम्पूज्य ॥ ध्वजपताकामालभ्य ॥ कृष्णवर्णा पताकां
च कृष्णवर्णध्वजं तथा ॥ अन्तकायालभामीह क्रतुकर्मणि साक्षिणे ॥ ॐ यमा-
यत्वा० ॥ इमां पताकां रम्यां च ध्वजं माल्यादिभूषितम् ॥ यमदेव गृहाण त्वं प्रसीद
करुणाकर ॥ ध्वजपताके सम्पूज्य प्रार्थयेत् ॥ यमस्तु महिषारूढो दण्डहस्तो महा- ३५
बलः ॥ धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥ ततो बलिदानम् ॥ इमं
माषबलिं देव गृहाणान्तक वै यम ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ यमाय

साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि ॥
भो यम बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्यायुःकर्ता शान्तिकर्ता पुष्टिकर्ता
तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन यमः प्रीयताम् ॥३॥
नैर्ऋते गत्वा आचम्य ॥ कलशं प्रतिष्ठाप्य ॥ नैर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनम् ॥
आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यताम् ॥ कलशोपरि ॐ कुमुदाय नमः ॥
ॐ दुर्जयाय नमः ॥ सम्पूज्य कलशे ॥ एह्येहि रक्षोगणनायकस्त्वं विशालवेताल-
पिशाचसंघैः ॥ ममाध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते ॥ ॐ असुन्वन्त-
मयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्यानमोदेवि
निर्ऋतेतुभ्यमस्तु ॥ ॐ भू० निर्ऋतिं साङ्गं सपरिवारं आवाहयामि ॥ सम्पूज्य ॥ ध्व-
जपताकामालभ्य ॥ पताकां निर्ऋतिं चैव नीलवर्णं ध्वजं तथा ॥ पिशाचगणनाथाय
आलभामि ममाध्वरे ॥ ॐ अशुन्वन्तम० ॥ सम्पूज्य ॥ ध्वजपताकयोः ॐ कुमुदा-
क्षाय नमः ॥ ॐ क्षेत्रपालाय नमः सम्पूज्य प्रार्थयेत् ॥ सर्वप्रेताधिपो देवो निर्ऋति-
र्नीलविग्रहः ॥ करे खड्गधरो नित्यं निर्ऋतये नमो नमः ॥ ततो बलिदानम् ॥ इमं

रु० माषबलिं यक्षो गृहाण निर्ऋतिप्रभो ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ प्र०
३६ निर्ऋतये साङ्गाय संपरिवाराय सायुधाय सशक्तिकाय इमं दधिमाषभक्तबलिं
समर्पयामि ॥ भो निर्ऋते बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्यायुःकर्ता
शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन
बलिदानेन निर्ऋतिः प्रीयताम् ॥ ४ ॥ पश्चिमे गत्वा ॥ आचम्य ॥ ततः कलशौ
प्रतिष्ठाप्य संपूज्य ॥ नमस्कारः ॥ नमोऽस्तु कामरूपाय प्रत्यग्द्वाराश्रिताय च ॥
सामवेदाधिपस्त्वं हि नाम्ना कल्याणकारक ॥ कलशोपरि ॐ भूतसंजीवनाय
नमः ॥ ॐ अमृताय नमः ॥ मध्यकलशे ॥ ॐ अनन्ताख्यदिग्गजाय नमः ॥
द्वारोर्ध्वे द्वारश्रियै नमः ॥ अधः देहल्यै नमः ॥ द्वारशाखयोः ॥ ॐ नन्दिन्यै नमः ॥
ॐ चण्डायै नमः ॥ द्वारकलशयोः ॥ ॐ रेवायै नमः ॥ ॐ ताप्यै नमः ॥ संपूज्य ॥
ततः सामवेदिनौ पूजयेत् ॥ ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये ॥ निहोता
सत्सिबर्हिषि ॥ इति सम्पूज्य ॥ मध्यकलशे एह्येहि यादोगण वारिधीनां गणेन ३६
पर्जन्य सहाप्सरोभिः ॥ विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥

ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो
वरुणेहबोद्ध्युरुशꣳस मान आयुः प्रमोषीः ॥ ॐ भू० वरुणं साङ्गं सपरिवारं
आवाहयामि ॥ वरुणाय साङ्गाय सपरिवाराय नमः इति सम्पूज्य ॥ ध्वजपताका-
मालभ्य ॥ श्वेतवर्णां पताकां च ध्वजं श्वेतमयं शुभम् ॥ वरुणाय जलेशाय ह्याल-
भामि सुखाप्तये ॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳ श्रथाय ॥
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥ इति सम्पूज्य प्रार्थयेत् ॥
पाशहस्तस्तु वरुणः साम्भसां पतिरीश्वरः ॥ शमनयाशु विघ्नानि नमस्ते पाश-
पाणये ॥ ततो बलिदानम् ॥ इमं माषबलिं देव गृहाण जलधीश्वर ॥
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ वरुणाय साङ्गाय सपरिवाराय सायु-
धाय सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि ॥ भो वरुण बलिं गृहाण
७ मम सकुटुम्बस्य सपरिवारस्यायुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता
आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन नमो भगवते सकलजलानामधिपतये

रु० न मम ॥ ५ ॥ वायव्ये गत्वा ॥ आचम्य ॥ कलशं प्रतिष्ठाप्य कलशे ॐ पुष्पदन्ताय प्र०
३७ नमः ॥ ॐ सिद्धार्थाय नमः ॥ गंधादिभिः सम्पूज्य ॥ कलशोपरि ॥ एह्येहि यज्ञे मम
रक्षणाय मृगाधिरूढः सह सिद्धसङ्घैः ॥ प्राणाधिपः कालकवेः सहाय गृहाण पूजां
भगवन्नमस्ते ॥ ॐ आनो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ॥
वायोऽअस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ॐ भू० वायवे नमः
वायुमा० ॥ ध्वजपताकामालभ्य ॥ पताकां वायवे धूम्रां धूम्रवर्णध्वजं तथा ॥
आलभाम्यनुरूपाय प्राणदाय हिताय च ॥ ॐ वायो ये ते सहस्रिणो रथासस्तेभि-
रागहि । नियुत्वान्सोमपीतये ॥ सम्पूज्य प्रार्थयेत् ॥ अनाकारो महौजाश्च सर्वगन्ध-
वहः प्रभुः ॥ तस्मै पूज्याय जगतो वायवेऽहं नमामि च ॥ ततो बलिदानम् ॥ माषभक्त-
बलिं वायो मया दत्तं गृहाण भो ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ वायवे
साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि ॥ ३७
भो वायो साङ्ग सपरिवार सायुध सशक्तिक मम सकुटुम्बस्य सपरिवारस्यायुः

कर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन नमो भगवते वायवे सकलप्राणानामधिपतये प्रीयताम् ॥ ६ ॥ उत्तरे गत्वा ॥ आचम्य ॥ द्वारकलशौ संस्थाप्य सम्पूज्य नमस्कारः ॥ नमस्ते दिव्यरूप त्वम-धर्वाधिपते प्रभो ॥ कलावधिपतिर्नाम्ना मङ्गलश्चोत्तरानन ॥ कलशोपरि ॐ धनदाय नमः ॐ श्रीप्रदाय नमः ॥ मध्यकलशे ॐ सार्वभौमदिग्गजाय नमः ॥सम्पूज्य॥ द्वारोर्ध्वे ॐ द्वारश्रियै नमः ॥ अधः ॐ देहल्यै नमः ॥ द्वारशाखयोः क्रमेण ॐ महाकालाय नमः ॥ ॐ भृङ्गिणे नमः ॥ द्वारकलशयोः ॐ नर्मदायै नमः ॥ ॐ ताप्त्यै नमः ॥ सम्पूज्य ॥ अथर्वाणौ पूजयेत् ॥ ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंय्योरभिस्र-वन्तुनः ॥ मध्यकलशे ॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम् ॥ सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥ ॐ वयठं० सोमव्रतेतव मनस्तनूषुबिभ्रतः ॥ प्रजावन्तः सचेमहि ॥ ॐ भू० सोमाय नमः सोममावा० ॥ सम्पूज्य ॥ ध्वजपताकामालभ्य ॥ हरितवर्णां पताकां च हरिद्वर्णमयं ध्वजम् ॥ कुबेराय लभाम्येव पूजयेच्च सदार्थिना ॥ ॐ आप्यायस्व समेतुतेविश्वतः सोम

रु० वृष्ण्यम् ॥ भवाव्वाजस्य सङ्गथे ॥ सम्पूज्य प्रार्थयेत् ॥ गौरोपमपुनान्स्थूलः सर्वौषधि- प्र०
३८ रसादयः ॥ नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥ ततो बलिदानम् ॥ इमं माषभक्तबलिं देव गृहाण त्वं धनप्रद ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ सोमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं दधिमाषभक्तबलिं समर्प-यामि ॥ भो सोम बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता शांति-कर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन सोमः प्रीयतां० ॥ ७ ॥ ईशाने गत्वा ॥ आचम्य ॥ कलशं संस्थाप्य कलशे ॐ सुप्र-तीकाय नमः । ॐ मङ्गलाय नमः ॥ सम्पूज्य ॥ पुनः कलशोपरि ॥ एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वाङ्गधरेण सार्धम् ॥ लोकेश भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ ॐ भू० ईशानाय नमः
ईशानं० ॥ सम्पूज्य ॥ ध्वजपताकामालभ्य ॥ ईशानाय ध्वजं श्वेतं पताकां गन्ध- ३८
भूषिताम् ॥ आलभामि महेशाय वृषारूढाय शूलिने ॥ ॐ तमीशानं० ॥ सम्पूज्य

प्रार्थयेत् ॥ सर्वाधिपो महादेव ईशानः शुक्ल ईश्वरः ॥ शूलपाणिर्विरूपाक्षः तस्मै
नित्यं नमो नमः ॥ ततो बलिदानम् ॥ इमं माषबलिं देव गृहाणेशान शङ्कर ॥ यज्ञ-
संरक्षणार्थाय प्रसन्नो वरदो भव ॥ ईशानाय साङ्गाय सपरिवाराय सायुधाय
सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि ॥ भो ईशान बलिं गृहाण मम
सकुटुम्बस्य सपरिवारस्य आयुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता
आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन ईशानः प्रीयतान्न मम ॥ ८ ॥ ईशानें-
द्रयोर्मध्ये गत्वा आचम्य ॥ कलशं प्रतिष्ठाप्य कलशे ॥ एह्येहि विष्ण्वाधिपते सुरेन्द्र
लोकेन सार्द्धं पितृदेवताभिः ॥ सर्वस्य धातास्यमितप्रभावो विशाध्वरन्नः सततं
शिवाय ॥ ॐ अस्मेरुद्रा मेहना पर्वतासोव्वृत्रहत्येभरहूतौ सजोषाः ॥ यःशर्ठ० संते
स्तुवते धायिपज्ज्रऽइन्द्र ज्येष्ठाऽअस्म्माँऽअवन्तु देवा? ॥ ॐ भू० ब्रह्मणे नमः ब्रह्माणं० ॥
सम्पूज्य ॥ ध्वजपताकामालभ्य ॥ पद्मवर्णां पताकां च पद्मवर्णध्वजं तथा ॥ आल-
भामि सुरेशाय ब्रह्मणेऽनन्तशक्तये ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ता द्विसीमित?

ह० सुरुचो व्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठा? सतश्चयोनिमसतश्चव्विवः ॥ प्र०
३९ सम्पूज्य प्रार्थयेत् ॥ पद्मयोनिश्चतुर्मूर्तिर्वेदव्यासपितामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै
नित्यं नमो नमः ॥ ततो बलिदानम् ॥ इमं माषबलिं ब्रह्मन् गृहाण कमलासन ॥
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय
सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि ॥ भो ब्रह्मन् बलिं गृहाण मम
सकुटुम्बस्य सपरिवारस्यायुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता
आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन ब्रह्मा प्रीयतां न मम ॥ ९ ॥ नैर्ऋत्य-
पश्चिमयोर्मध्ये गत्वा ॥ आचम्य ॥ कलशं प्रतिष्ठाप्य वरुणाय नमः इति सम्पूज्य ॥
पुनः कलशोपरि ॥ एह्येहि पातालधरामरेन्द्र नागाङ्गनाकिन्नर गीयमान ॥ यक्षो-
रगेन्द्रामरलोकसंघैरनन्त रक्षाध्वरमस्मदीयम् ॥ ॐ स्योनापृथिविनो भवान्नृक्षरा-
निवेशनि ॥ यच्छानः शर्म्म सप्प्रथाः ॥ ॐ भू० अनन्ताय नमः अनन्तमा० ॥ ३९
सम्पूज्य ॥ ध्वजपताकामालभ्य ॥ मेघवर्णां पताकां च मेघवर्णं ध्वजं तथा ॥ आल-

भामि अनन्ताय धरणीधारिणे नमः ॥ ॐ नमोस्तु सर्पेभ्योयेके च पृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्यो नमः ॥ सम्पूज्य प्रार्थयेत् ॥ घनवर्णा पताकेमां ध्वजं गन्धविभूषितम् ॥ स्थापयामि प्रसन्नाय अनन्ताय नमो नमः ॥ ततो बलिदानम् ॥ इमं माषबलिं शेष गृहाणानन्त पन्नग ॥ यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव ॥ अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि ॥ भो अनन्त बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्यायुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ॥ अनेन बलिदानेन अनन्तः प्रीयतां न मम ॥ पुनः ईशाने गत्वा ॥ आचम्य महाध्वजं पूजयेत् ॥ ॐ आब्रह्मन्ब्राह्मणो ब्रह्म वर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्योषाजिष्णू रथेष्ठाः सभेयोयुवास्य यजमानस्य व्वीरोज्जायतान्निकामेनिकामे नः पर्ज्जन्योव्वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नःकल्पताम् ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥

रु० वंशे ॐ किन्नरेभ्यो नमः ॥ ॐ पन्नगेभ्यो नमः ॥ सम्पूज्य आलभेत् ॥ इमं विचित्र- प्र०
४० वर्णन्तु महाध्वजविनिर्मितम् ॥ महाध्वजमालभामि महेन्द्राय सुप्रीतये ॥ ॐ आब्रह्म-
यज्ञानं० ॥ अमुं महाध्वजं चित्रं सर्वविघ्नविनाशक ॥ महामण्डपमध्ये तु स्थापयामि
सुरार्चने ॥ ॐ इन्द्रस्यव्वृष्णोवरुणस्य राज्ञऽआदित्यानाम्मरुताꣳ शर्द्धऽउग्रम् ॥
महाम्मनसाम्भुवनच्यवानां घोषोदेवानाञ्जयतामुदस्थात् ॥ अनया पूजया इन्द्रः
प्रीयतां न मम ॥ ततो मण्डपषोडशवलिकासु ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥
वंशेषु किन्नरेभ्यो नमः ॥ मण्डपपृष्ठदेशे पन्नगेभ्यो नमः ॥ इति सम्पूज्य ॥ ततो
मण्डपाद्बहिः पूर्वेशानसमीपे किंचिद्भूमिं गोमयेनोपलिप्य तत्राऽष्टदलं कमलं विरच्य
अष्टदलेषु ॥ ॐ नमो गणेभ्यो० सम्पूज्य ॥ प्रार्थयेत् ॥ त्रैलोक्ये यानि भूतानि स्थाव-
राणि चराणि च ॥ ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु मे सदा ॥ देवदानवगन्धर्वा
यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ सर्वे ममाध्वरे
रक्षां प्रकुर्वन्तु मुदान्विताः ॥ ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह ॥ ४०
रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः ॥ ततः अक्षतपुञ्जेषु पूर्वादिक्रमेण ॥

त्रैलोक्यस्थेभ्यः स्थावरेभ्यो नमः स्थावरानावाहयामि ॥ १ ॥ ॐ त्रैलोक्यस्थेभ्यश्चरेभ्यो
नमः चरानावाहयामि ॥ २ ॥ ॐ ब्रह्मणे नमः ब्रह्माणं ॥ ३ ॥ ॐ विष्णवे नमः विष्णु-
मावाहयामि ॥ ४ ॥ ॐ शिवाय नमः शिवमावाहयामि ॥ ५ ॥ ॐ देवेभ्यो नमः
देवानावा० ॥ ६ ॥ ॐ दानवेभ्यो० दानवा० ॥ ७ ॥ ॐ गन्धर्वेभ्यो० गन्धर्वा ना० ॥ ८ ॥
ॐ यक्षेभ्यो० यक्षाना० ॥ ९ ॥ ॐ राक्षसेभ्यो० राक्षसानावा० ॥ १० ॥ ॐ पन्नगेभ्यो०
पन्नगाना० ॥ ११ ॥ ॐ ऋषिभ्यो० ऋषीना० ॥ १२ ॥ ॐ मनुष्येभ्यो० मनुष्याना० ॥ १३ ॥
ॐ देवमातृभ्यो० देवमातृः आ० ॥ १४ ॥ सम्पूज्य ॥ इन्द्रादिलोकपालेभ्यो घृतौदन-
बलिदानम् ॥ ॐ नमो भगवते इन्द्राय पूर्वदिग्वासिभ्यः इन्द्रपार्षदेभ्यो दिगीशमातृ-
गणक्षेत्रपालादिभ्यो बलिरयमुपतिष्ठतु स्वाहा ॥ पुष्पांजलिं गृहीत्वा ॥ नंदे नन्दय
वासिष्ठे वसुभिः प्रजया सह ॥ जय भार्गवदायादे प्रजानां विजयावहे ॥ १ ॥ पूर्णे
गिरीशदायादे पूर्णं कर्म कुरुष्व माम् ॥ भद्रे काश्यपि दायादे कुरु भद्रां मार्ति
मम ॥ २ ॥ सर्वबीजौषधीयुक्ते सर्वरत्नौषधीवृते ॥ रुचिरे नन्दने नन्दे वाशिष्ठे
नन्दतामिह ॥ ३ ॥ प्रजापतिसुते देवि चतुरस्रे महीयसि ॥ सुव्रते सुभगे देवि गृहे

रु० काश्यपि रम्यताम् ॥ ४ ॥ पूजिते परमाचार्यैर्गन्धमाल्यैरलंकृते ॥ भवभूतिकरे देवि प्र०
४१ गृहे भार्गवि रम्यताम् ॥ ५ ॥ अव्यये चाक्षते पूर्णे मुनेरङ्गिरसः सुते ॥ मनुष्यधेनुहस्त्यश्व
पशुवृद्धिकरी भव ॥ ६ ॥ इति पुष्पाञ्जलिः ॥ एवं आग्नेयादिलोकपालानां बलि-
दानम् ॥ ततः ईशान्यां वंशपात्रादौ सार्वभौतिकं माषभक्तबलिं दद्यात् ॥ अस्मि-
न्रुद्रयागकर्मणि मण्डपपूजाङ्गविहितं मातृगणक्षेत्रपालप्रीतये भूतप्रेतपिशाचादि-
निवृत्यर्थं सार्वभौतिकबलिदानं करिष्ये ॥ नूतनवंशशूर्पे माषभक्तबलिं कृत्वा ॐ
नमोस्तुरुद्रेभ्योयेदिवियेषांव्वर्षमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशो-
दीचीर्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोव्वन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे-
षाञ्जम्भेदध्मः ॥ इति मंत्रेण सर्वभूतेभ्यो गन्धादिभिः सम्पूज्य प्रार्थयेत् ॥ ॐ नमोस्तु
सर्पेभ्यो० ॥ अधश्चैव तु ये लोका असुराश्चैव पन्नगाः ॥ सपत्नीपरिवाराश्च प्रतिगृह्ण-
न्त्विमं बलिम् ॥ १ ॥ नक्षत्राधिपतिश्चोर्ध्वे नक्षत्रैः परिवारितः ॥ स्थानश्चैव पितॄणां तु
सर्वे गृह्णन्त्विमं बलिम् ॥ २ ॥ ये केचिदिह यज्ञेस्मिन्नागता बलिकांक्षिणः ॥ तेभ्यो ४१
बलिं प्रयच्छामि नमस्कृत्य पुनः पुनः ॥ ३ ॥ बलिं गृह्णन्त्विमं देवा आदित्या

वसवस्तथा ॥ मरुतोऽप्यश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ ४ ॥ असुरा यातुधानाश्च पिशाचा मातरो नगाः ॥ शाकिन्यो यक्षवेताला योगिन्यः पूतना शिवाः ॥५॥ जृम्भकाः सिद्धगन्धर्वा आद्या विद्याधरा नराः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ ६ ॥ सौम्या भवन्तु ते तृप्त्या देवासुरगणास्तथा ॥ ते गृह्णन्तु मया दत्तं बलिं वै सार्वभौतिकम् ॥७॥ अनेन सार्वभौतिकबलिदानेन सार्वभौतिकाधिपती रुद्रः प्रीयताम् ॥ हस्तौ पादौ प्रक्षाल्य मण्डपं प्रविशेत् ॥

इति मण्डपपूजा समाप्ता ॥

ततः कुण्डे उपरि मेखलायां श्वेतवर्णालङ्कृतायां विष्णुं पूजयेत् ॥ तद्यथा ॥ ॐ इदंविष्णुर्विचक्रमे०ॐभू०विष्णवे०विष्णुमा० ॥ १ ॥ ततो मध्यमेखलायां रक्तवर्णालङ्कृतायां ब्रह्माणं पूजयेत् ॥ ॐब्रह्मयज्ञानं० ॐभू०ब्रह्मणे०ब्रह्माणं० ॥ २ ॥ तत अधोमेखलायां कृष्णवर्णालङ्कृतायां रुद्रं पूजयेत् ॥ ॐनमस्ते रुद्रमन्यव०भू० रुद्राय०रुद्रमा० ॥ ३ ॥ ततो योन्यां रक्तवर्णालङ्कृतायां गौरीं पूजयेत् ॥ ॐअम्बेऽ-

रु० अम्बिके०ॐभू०गौर्य्यै०गौरीमा० ॥ ४ ॥ ॐनीलग्रीवा इति कण्ठे पूजयेत् ॥ ॐ प्र०
४२ नाभिर्मे चित्तं० ॐ भू० नाभ्यै नमः नाभिमा० ॥ ५ ॥ ॐ विश्वकर्मन्० ॐ भू०
विश्वकर्मणे० विश्वकर्माणं० ॥ ६ ॥ तत आचार्यः अग्न्यायतनस्य पश्चात्प्राङ्मुखोपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रः अमुकशर्मा सपत्नीकोऽहं अस्मिन्सनवग्रहमखे अमुकरुद्रयागकर्मणि पञ्चभूसंस्कारपूर्वकं शतमङ्गलनामाग्निस्थापनं करिष्ये ॥ तत्र पंचभूसंस्कारः ॥ दर्भैः परिसमूह्य तान्कुशानैशान्यां परित्यज्य ॥ गोमयोदकाभ्यामुपलिप्य ॥ स्फ्येन स्रुवमूलेन वा उल्लिख्य ॥ उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य उदकेनाभ्युक्ष्य ततः कुण्डे सुवर्णखण्डं निक्षिप्य वस्त्रेणाच्छाद्य ॥ ततो अरणीप्रदानं कुर्यात् तद्यथा ॥ स्मार्त्ताग्निसाधनभूते योनिरूपे इमे अरणी युवाभ्यां प्रतिगृह्यताम् ॥ इयमधरा । इयमुत्तरा ॥ ततो यजमानः तौ स्मार्ताग्निसाधनभूते इमे अरणी आवाभ्यां परिगृह्णाण ॥ ततो ब्रह्मा ॥ इदं चात्र ॥
इदमोवर्ली इदं नेत्रम् ॥ इमानि स्रुवादीनि पात्राणि प्रतिगृह्णाण ॥ ततो यजमानः ॥ ४२
इमानि स्रुवादीनि पात्राणि प्रतिगृह्णामि ॥ पत्नी तु यजमानहस्तादधरारणिमंके

निद्धाति ॥ यजमानोऽप्यंके उत्तरारणिं निदधाति ॥ उभावप्यरण्योः पूजां कुरुतः ॥ तद्यथा प्राग्ग्रीवमुत्तरलोम कृष्णाजिनं कम्बलोपरि आस्तीर्य तस्योपरि उदगग्राम-धरारणिं निधाय । तत्पूर्वं उत्तरारणिं च निधाय ॐ युवाभ्यामरणीभ्यां नमः इति संपूज्य ॥ ततो अधरारण्यामुक्तप्रदेशो प्रमंथमूलं निधाय चात्राग्रे चोवलिमुदगग्रां च नेत्रेण चात्रं त्रिर्वेष्टयित्वा गाढं धृत्वा पश्चिमाभिमुखोपविष्टया पत्न्या मंथयेत् ॥ यावदग्नेरुत्पत्तिः ॥ पत्न्या मंथनासामर्थ्ये अन्ये ब्राह्मणाः शुचयो मथ्नन्ति ॥ एवं यज-मानासामर्थ्ये अन्यो यंत्रं धारयति ॥ ततो यातमग्निं मृण्मयपात्रे शुष्कगोमयचूर्णं नारिकेलजटां च स्थापयित्वा तस्मिन्पात्रे अग्निमाहृत्य वेणुनलिकया प्रज्वालयेत् ॥ ततोऽग्निं कांस्यपात्रे धृत्वा कांस्यपात्रेणाच्छाद्य कुंडाद्बहिराग्नेय्यां संस्थाप्य आचार्यस्तमग्निं गृहीत्वा आग्नेयकोणमार्गेण कुंडमध्ये नीत्वा ॥ ॐ अग्निन्दूत-मिति मन्त्रान्ते शतमंगलनामानमग्निमुपसमादधे इत्यग्निं स्वाभिमुखं निधाय ॥ चत्वारिश्रृङ्गेति अग्निमावाह्य ॐ मनोजूतिरिति प्रतिष्ठाप्य ॥ ध्यायेत् ॥ रुद्रतेजः समुद्भूतं द्विमूर्द्धानं द्विनासिकम् ॥ षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम् ॥





याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम् ॥ स्रुवं स्रुचिं च शक्तिं च अक्षमालां च दक्षिणे ॥ तोमरं व्यजनं चैव घृतपात्रं तु वामके ॥ बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्त-जिह्वकम् ॥ दक्षिणं च चतुर्जिह्वं त्रिजिह्वं चोत्तरं मुखम् ॥ द्वादश कोटिमूर्त्याख्यं द्विपंचाशत्कलायुतम् ॥ स्वाहास्वधावषट्कारैरंकितं मेषवाहनम् ॥ रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् ॥ रौद्रं च शिवनामानं वह्निमावाहयाम्यहम् ॥ त्वं मुखं सर्व-देवानां सप्तार्चिरमितद्युते ॥ आगच्छ भगवन्देव यज्ञेऽस्मिन्सन्निधो भव ॥ इत्यग्नि-स्थापनम् ॥ ततः कुण्डात्प्रागुत्तरे (ईशान्यां) वस्तुतः वायव्ये कलशस्थापनवि-धिना शांतिकलशं संस्थाप्य ॥

## अथ ग्रहाणां स्थापनम् ।

ततः पूर्वनिर्मितग्रहवेद्यां प्रधानाद्दक्षिणभागे श्वेतवस्त्रं प्रसार्य तत्र तत्तत्प्रमा-णानि नव मंडलानि कृत्वा तेषु आदित्यादिदेवताः स्थापयेत् ॥ ततो ग्रहपीठमध्ये वर्तुले द्वादशांगुले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः पूजयेत् ॥ ॐ आकृष्णेनरजसावर्त्त-

मानोनिवेशयंन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ॐ भू० सूर्याय० सूर्यमा० ॥ १ ॥ (आग्नेये चतुरस्रे अर्धचंद्राकारे वा चतुर्विंशति-अङ्गुले मंडले प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः पूजयेत्) ॐ इमन्देवाऽअसपत्नꣳ सुवद्ध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय ॥ इममुष्य पुत्रममुष्यै पुत्रमस्यैविशऽएषवोमी राजा सोमोस्माकं ब्राह्मणानाꣳ राजा ॥ ॐ भू० सोमाय० सोममा० ॥ २ ॥ ( दक्षिणे त्रिकोणे त्र्यङ्गुले चतुरङ्गुले वा मंडले दक्षिणाभिमुखं भौमं रक्तपुष्पाक्षतैः पूजयेत्) ॐ अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ ॐ भू० भौमाय० भौममा० ॥ ३ ॥ (ऐशान्ये बाणाकारे धनुषाकारे वा चतुरंगुले मण्डले उदङ्मुखं बुधं हरितपीतपुष्पाक्षतैर्वा पूजयेत्) ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॥ ॐ भू० बुधाय०

क० बुधमा० ॥ ४ ॥ ( उत्तरे दीर्घचतुरस्रे पट्टिसाकारे पद्माकारे वा षडङ्गुले मंडले प्र०
४४ उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः पूजयेत्) ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्द्युमद्वि-
भातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहिचित्रम् ॥ ॐ भू० बृहस्पतये० बृहस्पतिमा० ॥ ५ ॥ (पूर्वे पंचकोणे चतुष्कोणे वा नवाङ्गुले मण्डले प्राङ्मुखं शुक्रं श्वेतपुष्पाक्षतैः पूजयेत्) अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियंविपानꣳ० शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतंमधु ॥ ॐ भू० शुक्राय० शुक्रमा० ॥ ६ ॥ (पश्चिमे धनुषाकारे नराकारे वा द्व्यङ्गुले वा मण्डले षडङ्गुले प्रत्यङ्मुखं शनिं कृष्णपुष्पाक्षतैः पूजयेत्) ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तुनः ॥ ॐ भू० शनैश्चराय० शनैश्चरमा० ॥ ७ ॥ (नैऋत्ये सूर्पाकारे मकराकारे वा द्वादशाङ्गुले
मण्डले षडङ्गुले वा दक्षिणाभिमुखं राहुं कृष्णपुष्पाक्षतैः पूजयेत्) ॐ कयान- ४४
श्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ॐ भू० राहवे नमः

राहुमा०॥८॥ (वायव्ये ध्वजाकारे खड्गाकारे वा षडङ्गुले अष्टाङ्गुलेवा मण्डले दक्षिणा-
भिमुखं केतुं धूम्रपुष्पाक्षतैः पूजयेत् ) ॐ केतुं कृण्वन्नकेतवेपेशों मर्याऽअपेशसें ॥
समुषद्भिरजायथाः ॥ ॐ भू० केतवे० केतुमा० ॥ ९ ॥ ( यथोक्तकुसुमतण्डुलाभावे
यथालाभोपपन्नैः कुसुमतण्डुलैः स्थापयेत्पूजयेत् ) ।

## ( अथाधिदेवताः ग्रहाणां दक्षिणे सितपुष्पाक्षतैः स्थापयेत्पूजयेत )

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षी-
यमामृतात् ॥ ॐ भू० ईश्वराय नमः ईश्वरमावाहयामि ॥ १ ॥ ॐ श्रीश्चते लक्ष्मी-
श्चपत्न्यां वहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाण
सर्व्वलोकम्मंऽइषाण ॥ ॐ भू० उमायै० उमामा० ॥ २ ॥ ॐ यदक्रन्दः प्रथमञ्जाय-
मानऽउद्यन्तसंमुद्राद्रुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजात-
न्तेंऽअर्व्वन् ॥ ॐ भू०स्कन्दाय०स्कन्दमा०॥३॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥

६० समूढमस्यपाᳫंसुरेस्वाहा ॥ ॐ भू० विष्णवे० विष्णुमा० ॥ ४ ॥ ॐ आब्रह्मन्ब्राह्म- प्र०
४५ णोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतांदोग्ध्रीधेनु-
र्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरो-
जायतान्निकामेनिकामेनः पर्जन्न्योवर्षतु फलवत्योनऽओषधयः पच्यन्तां योगक्षे-
मोनः कल्पताम् ॥ ॐ भू० ब्रह्मणे० ब्रह्मार्णं० ॥ ५ ॥ ॐ सयोषाऽइन्द्रसग-
णोमरुद्भिः सोमंपिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ रपमृधोनुदस्वाथाभयङ्कृणुहि
विश्वतोनः ॥ ॐ भू० इन्द्राय० इन्द्रमा० ॥ ६ ॥ ॐ यमायत्वाङ्गिरस्वतेपितृमते-
स्वाहा ॥ स्वाहाघर्मायस्वाहाघर्मः पित्रे ॥ भू० यमाय नमः यमं० ॥ ७ ॥ ॐ कार्षि-
रसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधीः ॥
ॐ भू० कालाय० कालं आवा० ॥ ८ ॥ ॐ चित्रावसोस्वस्तितेपारमशीय ॥ ॐ भू० ४५
चित्रगुप्ताय नमः चित्रगुप्तमावाहयामि ॥ ९ ॥

( ततः प्रत्यधिदेवताः ग्रहाणां वामे श्वेतपुष्पाक्षतैः स्थापयेत्पूजयेत )

ॐ अग्निन्दूतं पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँऽआसादयादिह ॥ ॐ भू० अग्नये० अग्निं ॥ १ ॥ आपोहिष्ठा० ॥ ॐ भू० अद्भ्यो नमः अपः आवा० ॥ २ ॥ ॐ स्योनापृथिवि० ॥ ॐ भू० पृथिव्यै० पृथिवीमा० ॥ ३ ॥ ॐ इदंविष्णु० ॥ ॐ भू० विष्णवे० विष्णु० ॥ ४ ॥ ॐ त्रातारमिन्द्र० ॥ ॐ भू० इन्द्राय० इन्द्रं० ॥ ५ ॥ ॐ आदित्यैरास्नासीन्द्राण्याउष्णीषः ॥ पूषासिघर्मायदीष्व ॥ ॐ भू० इन्द्राण्यै० इन्द्राणीमा० ॥ ॐ प्रजापतेनत्वदेतान्यन्न्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोअस्तुव्वयᳬस्यामपतयोरयीणाम् ॥ ॐ भू० प्रजापतये नमः प्रजापति० ॥ ७ ॥ ॐ नमोस्तुसर्पेभ्यो येकेच पृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्यो नमः ॥ ॐ भू० सर्पेभ्यो० सर्पान् ॥ ८ ॥ ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥ भू० ब्रह्मणे० ब्रह्माणमा० ॥ ९ ॥



(ततोपञ्चलोकपालदेवताः वास्तोस्पतिक्षेत्रपालान् ग्रहाणामुत्तरे वा सूर्योत्तरे स्थापयेत् ) ॐ गणानां त्वा० ( राहोरुत्तरे )गणपतये० गणपति० १ । अम्बेऽअम्बिके (शन्युत्तरे) ॐ भू० दुर्गायै० दुर्गा० ॥ २ ॐ व्वायोयेतेसहस्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्त्सोमं पीतये ॥ ( केतुरुत्तरे ) ॐ भू० वायवे० वायुं० ॥ ३ ॥ ॐ घृतं घृतपावानः पिबतव्वसांवसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशः प्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥(राहोर्दक्षिणे) ॐ आकाशाय० आकाशं० ॥४॥ ॐ यावांकशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञंमिमिक्षताम् ॥ ( केतोर्दक्षिणे ) ॐ भू० अश्विभ्यां० अश्विनौ० ॥ ५ ॥ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः ॥ यत्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥ ( पंचलोकपालोत्तरे ) ॐ भू० वास्तोष्पतये० वास्तोष्पति० ॥ ६ ॥ ॐ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्यंव्वैश्वानरंक्षैत्रजित्याय देवाः ( उत्तरे ) ॥ ॐ भू० क्षेत्राधिपतये० क्षेत्राधिपति० ॥ ७ ॥

## ( अथ मण्डलाद्वाह्ये दशदिक्पालान्स्थापयेत् )

ॐ त्रातारमिन्द्रमवितारमिन्द्रᳶं.हवेहवेसुहवᳶं.शूरमिन्द्रम् ॥ ह्वयामिशक्रंपुरुहूतमिन्द्रᳶंस्वस्तिनोमघवाधात्विन्द्रः ॥ ॐ भू०इन्द्राय नमः इन्द्रमा० ॥ १ ॥ ॐ त्वन्नोऽअग्नेतवदेवपायुभिर्मघोनोरक्षतन्न्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेषᳶंरक्षमाणस्तवव्रते ॥ ॐ भू० अग्नये० अग्निमा० ॥ २ ॥ ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्मायस्वाहाघर्मᳶ‌पित्रे ॥ ॐ भू० यमाय० यममा० ॥ ३ ॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्न्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ ॐ भू० निर्ऋतये० निर्ऋतिमा० ॥ ४ ॥ ॐ तत्वायामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोध्युरुशᳶं. समानऽआयुᳶप्रमोषीᳶ ॥ ॐ भू० वरुणाय० वरुण० ॥ ५ ॥ ॐ आनोनियुद्भिःशतिनीभिरध्वरᳶं.सहस्रिणीभिरुपयाहियज्ञम् । व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिᳶसदानᳶ ॥ ॐभू० वायवे नमः वायु० ॥ ६ ॥ ॐव्वयᳶं. सोमव्रतेतवमनस्तनूषुबिभ्रतᳶ ॥ प्रजावन्तᳶसचेमहि ॥ ॐ भू० सोमाय० सोमं० ॥७॥ ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धᳶस्वस्तये ॐ भू० ईशानाय० ईशानं० ॥८॥ अस्मेरुद्रामेहनापर्व्वतासोव्वृत्रहत्येभरहूतौसजोषाᳶ ॥ यᳶशᳶं० संतिस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ२ऽअवन्तुदेवाᳶ ॥ पूर्वेशानयोर्मध्ये ॐ भू० ब्रह्मणे ब्रह्माणं० ॥ ९ ॥ ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशनि ॥ यच्छानᳶ शर्म्मसप्रथाᳶ ॥ निर्ऋतिवरुणयोर्मध्ये ॐ भू० अनन्ताय० अनन्तं० ॥ १० ॥ ततो शेषादिमनुष्यान्तदेवताः विशेषः ॥ रवेः पूर्वे शेषम् ॥ सोमस्याग्ने वासुकीम् ॥ २ ॥ भौमाग्रे तक्षकम् ॥ ३ ॥ बुधोत्तरे कर्कोटकम् ॥ ४ ॥ बृहस्पत्यग्रे पद्मम् ॥ ५ ॥ शुक्रोत्तरे महापद्मं० ॥ ६ ॥ शनिपश्चिमे शंखपालम् ॥ ७ ॥ राहुपुरतः कालम् ॥ ८ ॥ केतुपुरतः कुलिशम् ॥ ९ ॥ ततो भूगृहाद्बहिः पूर्वे अश्विन्यादिसप्त नक्षत्राणि ॥ विष्कुम्भादिसप्त योगाः ॥ ववबालवकरणे ॥ सप्त द्वीपाः ॥

ऋग्वेदश्च ॥ ततो दक्षिणे ॥ पुष्यादिसप्त नक्षत्राणि ॥ धृत्यादिसप्त योगाः ॥ कौलव-
तैतिलकरणे ॥ सप्त सागराः ॥ यजुर्वेदश्च ॥ ततः पश्चिमे स्वात्यादिसप्त नक्षत्राणि
वज्रादिसप्त योगाः ॥ गरवणिजकरणे ॥ सप्त पातालानि ॥ सामवेदश्च ॥ तत उत्तरे
अभिजितादिसप्त नक्षत्राणि ॥ साध्यादिषड् योगाः ॥ विष्टिकरणम् ॥ भूराद्याः सप्त
लोकाः ॥ अथर्ववेदश्च ॥ वायव्याम् ॥ ध्रुवं ॥ सप्तऋषींश्च ॥ ततो यथावकाशं गंगादिनद्यः
सप्त कुलाचलाः ॥ अष्टौ वसवः ॥ एकादश रुद्राः ॥ द्वादश आदित्याः ॥ एकोनपंचाश-
न्मरुतः ॥ षोडश मातरः ॥ षट् ऋतवः ॥ द्वादश मासाः ॥ द्वे अयने ॥ पंचदश तिथयः ॥
षष्ठि संवत्सराः ॥ सुपर्णाः ॥ नागाः ॥ सर्पाः ॥ यक्षाः ॥ गंधर्वाः ॥ विद्याधराः ॥
अप्सरसः ॥ रक्षांसि ॥ मनुष्याश्च ॥ इत्येता देवता नाममन्त्रेण संस्थाप्य ॥ ॐ
मनोजूतिर्जुषतामाज्ज्यंस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ॥ विश्वे
देवासऽइहमादयन्तामोꣳप्रतिष्ठ ॥ ॐ सूर्यादिमनुष्यान्तदेवताः सुप्रतिष्ठिताः वरदाः
भवन्तु ॥ सूर्यादिमनुष्यान्तदेवताभ्यो नमः इति मंत्रेण आसनाद्युपचारैः प्रत्येकमे-
कत्र वा षोडशोपचारैः संपूज्य ॥ प्रार्थयेत् ॥ ॐ ग्रहाऽऊर्ज्जाहुतयोव्यन्तोविप्राय-

रु० मतिम् ॥ तेषांविशिप्रियाणांव्वोहमिषमूर्जꣳसमग्रभमुपयामगृहीतोसीन्द्रायत्वाजु- प्र०
४८ ष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ अनया पूजया सूर्यादिमनुष्यान्तदेवताः
प्रीयन्ताम् ॥ ततो ग्रहस्येशानदिग्भागे कलशस्थापनविधिना कलशं प्रतिष्ठाप्य
तस्योपरि वरुणं असंख्याकरुद्राँश्चावाह्य पूजयेत् ॥ ॐ असंख्यातासहस्राणियेरु-
द्राऽअधिभूम्याम् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ असंख्याकरुद्रेभ्यो नम
इति पूजयेत् ॥ अनया पूजया असंख्याकरुद्राः प्रीयन्ताम् ॥ इति ग्रह पूजनंसमाप्तम् ॥

## ( अथ चतुःषष्टियोगिनी )

ॐ दिव्ययोगिन्यै नमः दिव्ययोगिनीमावाहयामि ॥ १ ॥ ॐ महायोगिन्यै नमः
महायोगिनीमा० ॥ २ ॥ ॐ सिद्धयोगिन्यै० सिद्धयोगिनीमा० ॥ ३ ॥ ॐ माहेश्वर्यै०
माहेश्वरीमा० ॥ ४ ॥ ॐ प्रेताक्ष्यै० प्रेताक्षीमा० ॥५॥ ॐ डाकिन्यै० डाकिनीमा० ॥६॥ ४८
ॐ काल्यै० कालीमा० ॥ ७ ॥ ॐ कालरात्र्यै० कालरात्रिमा० ॥ ८ ॥ ॐ निशाचर्यै०
निशाचरीमा० ॥ ९ ॥ ॐ हुंकार्यै० हुंकारीमा० ॥ १० ॥ ॐ सिद्धिवेताल्यै०

सिद्धिवेतालीमा० ॥ ११ ॥ ॐ हिंकार्यै० हिंकारीमा० ॥ १२ ॥ ॐ भूतडामर्यै
नमः भूतडामरीमा० ॥ १३ ॥ ॐ ऊर्ध्वकेश्यै० ऊर्ध्वकेशीमा० ॥ १४ ॥ ॐ विरू-
पाक्ष्यै० विरूपाक्षी० ॥ १५ ॥ ॐ शुष्काङ्ग्यै० शुष्काङ्गीमा० ॥ १६ ॥ ॐ नरभोज-
नायै० नरभोजनामा० ॥ १७ ॥ ॐ फूत्कार्यै० फूत्कारीमा० ॥ १८ ॥ ॐ वीरभद्रायै०
वीरभद्रामा० ॥ १९ ॥ ॐ धूम्राक्ष्यै० धूम्राक्षीमा० ॥ २० ॥ ॐ कलहप्रियायै०
कलहप्रियामा० ॥ २१ ॥ ॐ राक्षस्यै० राक्षसीमा० ॥ २२ ॥ ॐ घोररक्ताक्ष्यै०
घोररक्ताक्षीमा० ॥ २३ ॥ ॐ विशालाक्ष्यै० विशालाक्षीमा० ॥ २४ ॥ ॐ कौमार्यै०
कौमारीमा० ॥ २५ ॥ ॐ चंड्यै० चंडीमा० ॥ २६ ॥ ॐ वाराह्यै० वाराहीमा० ॥२७॥
ॐ मुण्डधारिण्यै० मुण्डधारिणीमा० ॥ २८ ॥ ॐ भैरव्यै० भैरवीमा० ॥ २९ ॥
ॐ वीरायै० वीरामा० ॥ ३० ॥ ॐ भयङ्कर्यै० भयङ्करीमा० ॥ ३१ ॥ ॐ वज्रधारिण्यै०
वज्रधारिणीमा० ॥ ३२ ॥ ॐ क्रोधायै० क्रोधामा० ॥ ३३ ॥ ॐ दुर्मुख्यै० दुर्मुखीमा०
९ ॥ ३४ ॥ ॐ प्रेतवाहिन्यै० प्रेतवाहिनीमा० ॥ ३५ ॥ ॐ कर्कायै० कर्कामा० ॥ ३६ ॥
ॐ दीर्घलम्बोष्ठ्यै० दीर्घलम्बोष्ठीमा० ॥ ३७ ॥ ॐ मालिन्यै० मालिनीमा० ॥ ३८ ॥

ह० ॐ मंत्रयोगिन्यै० मंत्रयोगिनीमा० ॥ ३९ ॥ ॐ कालाग्न्यै० कालाग्नीमा० ॥ ४० ॥ प्र०
४९ ॐ मोहिन्यै० मोहिनीमा० ॥ ४१ ॥ ॐ चक्रायै० चक्रामा० ॥ ४२ ॥ ॐ कुण्डलिन्यै०
कुण्डलिनीमा० ॥ ४३ ॥ ॐ वालुकायै० वालुकामा० ॥ ४४ ॥ ॐ कौबेर्यै० कौबेरीमा०
॥ ४५ ॥ ॐ यमदूत्यै० यमदूती० ॥ ४६ ॥ ॐ करालिन्यै० करालिनीमा० ॥ ४७ ॥
ॐ कौशिकायै० कौशिकामा० ॥ ४८ ॥ ॐ यक्षिण्यै० यक्षिणीमा० ॥ ४९ ॥ ॐ
भक्षिण्यै० भक्षिणीमा० ॥ ५० ॥ ॐ कौमार्य्यै० कौमारीमा० ॥ ५१ ॥ ॐ
मंत्रवाहिन्यै० मंत्रवाहिनीमा० ॥ ५२ ॥ ॐ विशालायै० विशालामा० ॥ ५३ ॥ ॐ
कार्मुक्यै० कार्मुकीमा० ॥ ५४ ॥ ॐ व्याघ्र्यै० व्याघ्रीमा० ॥ ५५ ॥ ॐ महाराक्षस्यै०
महाराक्षसीमा० ॥ ५६ ॥ ॐ प्रेतभक्षिण्यै० प्रेतभक्षिणीमा० ॥ ५७ ॥ ॐ धूर्जट्यै०
धूर्जटीमा० ॥५८॥ ॐ विकटायै० विकटामा०॥५९॥ॐ घोररूपायै० घोररूपामा०॥६०॥
ॐ कपालिकायै० कपालिकामा० ॥ ६१ ॥ ॐ निकलायै० निकलामा० ॥ ६२ ॥ ४९
ॐ अमलायै० अमलामा० ॥ ६३ ॥ ॐ सिद्धिप्रदायै० सिद्धिप्रदामा० ॥ ६४ ॥ इति
चतुःषष्टियोगिनीपूजनम् ॥

## ( अथ क्षेत्रपालानां पूजनम् )

ॐ अजराय नमः अजरमा० ॥ १ ॥ ॐ व्यापकाय० व्यापकमा० ॥ २ ॥ ॐ इन्द्रचौराय० इन्द्रचौरमा० ॥ ३ ॥ ॐ इन्द्रमूर्तये० इन्द्रमूर्तिमा० ॥ ४ ॥ ॐ उक्षाभिधाय० उक्षाभिधमा० ॥ ५ ॥ ॐ कूष्माण्डाय० कूष्माण्डमा० ॥ ६ ॥ ॐ वारुणाय० वारुणमा० ॥ ७ ॥ ॐ बाहुकाख्याय० बाहुकाख्यमा० ॥ ८ ॥ ॐ विमुक्ताय० विमुक्तमा० ॥ ९ ॥ ॐ लिप्तकाय० लिप्तकमा० ॥ १० ॥ ॐ लीलाकाय० लीलाकमा० ॥ ११ ॥ ॐ एकदंष्ट्राय० एकदंष्ट्रमा० ॥ १२ ॥ ॐ ऐरावताख्याय० ऐरावताख्यमा० ॥ १३ ॥ ॐ ओषधीघ्नाय० ओषधीघ्नमा० ॥ १४ ॥ ॐ बंधनाख्याय० बंधनाख्यमा० ॥ १५ ॥ ॐ दिव्यकायाय० दिव्यकायमा० ॥ १६ ॥ ॐ कम्बलाख्याय० कम्बलाख्यमा० ॥१७॥ ॐ क्षोभणाय० क्षोभणमा० ॥१८॥ ॐ गवये० गवमा० ॥१९॥ ॐ घंटाभिधाय० घंटाभिधमा० ॥ २० ॥ ॐ फटाटोपाय० फटाटोपं० ॥ २१ ॥ ॐ अणुस्वरूपाय० अणुस्वरूपं० ॥ २२ ॥ ॐ चन्द्रवारुणाय० चन्द्रवारुणं० ॥ २३ ॥ ॐ फटाटोपाय० फटाटोपं० ॥ २४ ॥ ॐ जटालाय० जटालं० ॥ २५ ॥ ॐ क्रतवे०

रु० क्रतुमा० ॥२६॥ ॐ घण्टेश्वराय० घण्टेश्वरमा० ॥२७॥ ॐ विटंकाय० विटंकमा० ॥२८॥ प्र०
५० ॐ मणिमतये० मणिमतिमा० ॥२९॥ ॐ गणबंधाय० गणबंधमा० ॥३०॥ ॐ डामराय०
डामरमा० ॥३१॥ ॐ ढुण्ढिकर्णाय० ढुण्ढिकर्णमा० ॥३२॥ ॐ स्थविराय० स्थविरमा० ॥३३॥
ॐ दन्तुराय० दन्तुरं० ॥ ३४ ॥ ॐ धनदाय० धनदं० ॥ ३५ ॥ ॐ नागकर्णाय०
नागकर्णमा० ॥ ३६ ॥ ॐ मारीगणाय० मारीगणं० ॥ ३७ ॥ ॐ फेत्काराय०
फेत्कारमा० ॥ ३८ ॥ ॐ चीकराय० चीकरमा० ॥ ३९ ॥ ॐ सिंहाकृतये० सिंहा-
कृतिमा० ॥ ४० ॥ ॐ मृगाय० मृगमा० ॥ ४१ ॥ ॐ ॐ यक्षमप्रियाय० यक्ष्म-
प्रियमा० ॥ ४२ ॥ ॐ मेघवाहनाय० मेघवाहनं० ॥ ४३ ॥ ॐ तीक्ष्णोष्ट्राय० तीक्ष्णो-
ष्ट्रमा० ॥४४॥ ॐ अनलाय० अनलमा० ॥४५॥ ॐ शुक्लतुण्डाय० शुक्लतुण्डमा० ॥४६॥
ॐ अन्तरिक्षाय० अन्तरिक्षमा० ॥ ४७ ॥ ॐ वर्वरकाय० वर्वरकमा० ॥ ४८ ॥ ॐ
पावनाय नमः पावनमावाहयामि ॥ ४९ ॥ इति क्षेत्रपालपूजनम् ॥

## ( अथ लिङ्गतोभद्रदेवतास्थापनम् ) ५०

ततः पूर्वनिर्मित ईशान्यां रुद्रवेद्यां श्वेतवस्त्रं प्रसार्य तत्र चतुर्लिङ्गतोभद्रं

विरच्य ॥ तत्र ब्रह्मादिदेवताः स्थापयेत् । रेखा त्वष्टादश प्रोक्ताश्चतुर्लिङ्गसमुद्भवे ॥
कोणेन्दुस्त्रिपदः श्वेतस्त्रिपदैः कृष्णशृंखलाः ॥ १ ॥ वल्ली सप्तपदा नीला भद्रं रक्तं
चतुष्पदम् ॥ भद्रपार्श्वे महारुद्रं कृष्णमष्टादशैः पदैः ॥ २ ॥ शिवस्य पार्श्वतो वार्पी
कुर्यात्पञ्चपदां सिताम् ॥ पदमेकं तथा पीतं भद्रवाप्योस्तु मध्यतः ॥ ३ ॥ शिरसि
शृंखलायाश्च कुर्यात्पीतं पदत्रयम् ॥ लिङ्गानां स्कन्धतः कोष्ठा विंशती रक्तवर्णकाः
॥ ४ ॥ परिधिः पीतवर्णैस्तु पदैः षोडशभिः स्मृतः ॥ पदैस्तु नवभिः पश्चाद्रक्तं पद्मं
सकर्णिकम् ॥ ५ ॥ इति लिङ्गतोभद्रकारिका ॥ आचम्य प्राणानायम्य देशकालौ
संकीर्त्य० गोत्रः शर्माहं अमुकरुद्रयागकर्मणि ब्रह्मादिमण्डलदेवतास्थापनं पूजनं च
करिष्ये ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ॥ सबुध्न्याऽ-
उपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥ मध्ये कर्णिकायां ॐ भू० ब्रह्मणे
नमः ब्रह्माणं० ॥ १ ॥ ॐ आप्यायस्वसमेतुतेव्विश्वतः सोमवृष्ण्यम् ॥ भवाव्वा-
जस्यसङ्गथे ॥ उत्तरे लिङ्गे ॐ भू० सोमाय० सोमं० ॥ २ ॥ ॐ तमीशानञ्जगत-

रु० स्तस्थुषस्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापा- प्र०
५१ युरदब्धः स्वस्तये ॥ ईशान्यां खण्डेन्दौ ईशानाय० ईशानं० ॥ ३ ॥ ॐ त्रातारमिन्द्र-
मवितारमिन्द्रठं० हवेहवेसुहवठं० शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रं स्वस्ति-
नोमघवाधात्विन्द्रः ॥ पूर्वे लिङ्गे ॐ भू० इन्द्राय० इन्द्रमा० ॥ ४ ॥ ॐ त्वन्नोऽ-
अग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचा-
नोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॥ आग्नेय्यां खण्डेन्दौ ॐ भू० अग्नये० अग्निं०
॥ ५ ॥ ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्मायस्वाहाघर्मः पित्रे ॥ दक्षिणे
लिङ्गे ॥ ॐ भू० यमाय० यममा० ॥ ६ ॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्या-
मन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ नैर्ऋत्यां
खण्डेन्दौ ॐ भू० निर्ऋतये० निर्ऋतिमा० ॥ ७ ॥ ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदा- ५१
शास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोध्युरुशठं० समानऽआयुःप्रमोषीः ॥

पश्चिमे लिङ्गे ॐ भू० वरुणाय० वरुणमा० ॥ ८ ॥ ॐ आनोनियुद्भिः शतिनीभि-
रध्वरठं० संहस्रिणीभिरुपयाहियज्ञम् ॥ व्वायोऽअस्मिन्त्सवनेमादयस्वयूयंपातस्व-
स्तिभिः सदानः ॥ ॥ वायव्यां खण्डेन्दौ ॐ भू० वायवे० वायुं० ॥ ९ ॥ ॐ व्वसु-
भ्यस्त्वारुद्रेभ्यस्त्वादित्येभ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्रावरुणौत्वावृष्ट्यांव -
ताम् ॥ व्यन्तुव्वयोक्तठं० रिहाणामरुताम्पृषतीर्ग्गच्छवशापृश्निर्भूत्वादिवङ्गच्छ-
ततोनोवृष्टिमावह ॥ चक्षुष्पाऽअग्नेसिचक्षुर्म्मेपाहि ॥ वायुसोममध्ये भद्रे ॐ भू०
अष्टवसुभ्यो नमः अष्टवसूना० ॥ १० ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः ॥
बाहुभ्यामुततेनमः ॥ सोमेशानयोर्म्मध्ये भद्रे एकादशरुद्रेभ्यो० एकादशरुद्राना० ॥११॥
ॐ यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः ॥ आवोर्व्वाचीसुमति-
र्व्ववृत्त्यादठं० होश्चिद्यावरिवोवित्तरासत ॥ ईशानपूर्वयोर्म्मध्ये भद्रे द्वादशादि-
त्येभ्यो० द्वादशादित्याना० ॥ १२ ॥ यावाङ्कशामधुमत्यश्विनासूनृतावती ॥ तया

रु० सुज्ञम्मिमिक्षतम् । इन्द्राग्न्योर्म्मध्ये भद्रे ॐ भू० अश्विभ्यां० अश्विनौ० ॥ १३ ॥ प्र०
५२ ॐ व्विश्वेदेवासऽआगतशृणुतामऽइमठं० हवम् ॥ एदम्बर्हिर्निषीदत ॥ उपयाम
गृहीतोसिव्विश्वेभ्यस्त्वादेवेभ्यऽएष ते योनिर्व्विश्वेभ्यस्त्वादेवेभ्यः ॐ भू० अग्नि-
यममध्ये भद्रे सपैतृकविश्वेभ्यो देवेभ्यो० सपैतृकविश्वान्देवानावा० ॥ १४ ॥ ॐ
अभित्यन्देवठं० सवितारमोण्योःकविक्रतुमर्च्चामिसत्यसवठं० रत्नधामभिप्रियम्म-
तिङ्कविम् ॥ ऊर्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुः
कृपास्वः ॥ प्रजाभ्यस्त्वाप्रजास्त्वानुप्राणन्तुप्रजास्त्वमनुप्राणिहि ॥ यमनिर्ऋति-
मध्ये भद्रे ॥ ॐ भू० सप्तयक्षेभ्यो० सप्तयक्षानावा० ॥१५॥ नमोस्तुसर्पेभ्यो० निर्ऋतिव-
रुणयोर्म्मध्ये भद्रे ॐ भू० अष्टकुलनागेभ्यो० अष्टकुलनागानावा० ॥ १६ ॥
ऋताषाडृतधामाग्निर्गन्धर्व्वस्तस्यौषधयोप्सरसोमुदोनाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पा-
तु तस्मैस्वाहावाट्ताभ्यःस्वाहा ॥ वरुणवायुमध्ये भद्रे गन्धर्वाप्सरोभ्यो० गंधर्वा- ५२
प्सरसः आवा० ॥ १७ ॥ ॐ यदक्रन्दःप्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरी-

षात् ॥ इयेनस्यपक्षाहरिणस्यबाहूउपस्तुत्यम्महिजातन्तेऽअर्व्वन् ॥ ब्रह्मसोममध्ये लिङ्गे ॐ भू० स्कन्दाय० स्कन्दमा० ॥ १८ ॥ आशु? शिशानोवृषभोनभीमोघनाघन? क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीर?शतंऽ.० सेनाऽअजयत्साकमिन्द्र÷ ॥ स्कन्दादुत्तरे ॐ भू० वृषभाय० वृषभं० ॥ १९ ॥ ॐ कार्षिरसि समुद्रस्य त्वाक्षित्याऽ उन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधीः ॥ वृषभादुत्तरे ॐ भू० शूलाय० शूलं० ॥ २० ॥ अनेनैवमंत्रेण शूलादुत्तरे ॐ भू० महाकालाय० महाकालमा० ॥ २१ ॥ ॐ शुक्रज्ज्योतिश्चचित्रज्ज्योतिश्च सत्यज्ज्योतिश्चज्ज्योतिष्माँश्च ॥ शुक्रश्चऋतपाश्चात्यंऽ. हाः ॥ ब्रह्मेशानयोर्मध्ये शृंखलायां ॐ भू० दक्षादिसप्तगणेभ्यो० दक्षादिसप्तगणा- ना० ॥ २२ ॥ ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वक?सुभद्रिकां काम्पीलवासिनीम् ॥ ब्रह्मेन्द्रमध्ये लिङ्गे ॐ भू० दुर्गायै० दुर्गामा० ॥ २३ ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाᳬसुरेस्वाहा ॥ दुर्गापूर्वे ॐ भू०

रु० विष्णवे० विष्णुमा० ॥ २४ ॥ ॐ पितृभ्य÷स्वधायिभ्य÷स्वधानम÷पितामहेभ्य÷ प्र०
६३ स्वधायिभ्य÷स्वधानमःप्रपितामहेभ्यःस्वधायिभ्य÷स्वधानम÷ ॥ अक्षन्पितरो- मीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धध्वम् ॥ ब्रह्माग्न्योर्मध्ये शृंखलायां ॐ भू० स्वधायै० स्वधामावाहयामि ॥ २५ ॥ ॐ परम्मृत्योऽअनुपरेहिपन्थांयस्तेऽअन्य- ऽइतरोदेवयानात् ॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमान÷प्रजाᳬरीरिषोमोतव्वीरान् ॥ ब्रह्मयममध्ये लिङ्गे ॐ भू० मृत्युरोगेभ्यो० मृत्युरोगाना० ॥ २६ ॥ ॐ गणानान्त्वा० ॥ ब्रह्मनिर्ऋतिमध्ये शृंखलायां ॐ भू० गणपतये० गणपतिं० ॥२७॥ ॐ आपोहिष्ठा० ॥ ब्रह्मवरुणयोर्मध्ये लिङ्गे ॐ भू० अद्भ्यो नमः अपः आवा० ॥ २८ ॥ ॐ मरुतोयस्य- हिक्षयेपाथादिवोविमहसः ॥ ससुगोपातमोजन÷ ॥ ब्रह्मवायुमध्ये शृंखलायां ॐ भू० मरुद्भ्यो० मरुतः आवा० ॥ २९ ॥ ॐ स्योनापृथिवि० ॥ ब्रह्मणः पादमूले ॐ ६३
भू० पृथिव्यै० पृथिवीं० ॥ ३० ॥ ॐ पञ्चनद्यः० ॥ पृथिव्युत्तरे ॐ भू० गंगादिनदीभ्यो०

गंगादिनदीः आवा० ॥ ३१ ॥ ॐ समुद्रोसिनभंस्वानार्द्रदानुः शम्भूर्म्मयोभूरभिमा-
व्वाहिस्वाहामारुतोसिमरुतांङ्गणः ॥ शम्भूर्म्मयोभूरभिमावाहिस्वाहावस्युरंसिदुवंस्वा-
ञ्छम्भूर्म्मयोभूरभिमांव्वाहिस्वाहा ॥ गंगोत्तरे ॐ सप्तसागरेभ्यो० सप्तसागराना० ॥३२॥
ॐ प्रपर्व्वतस्यवृषभस्यपृष्ठान्नावंश्चरन्तिस्वसिचंइयानाः ॥ ताऽआवंवृत्रन्नधराग्-
दंक्ताऽअहिंर्म्बुध्न्यमनुरीयंमाणाः ॥ विष्णोर्व्विक्रमणंमसिव्विष्णोर्व्विक्रान्तमसिव्वि-
ष्णोः क्रान्तमंसि ॥ कर्णिकापरिधौ ॐ भू० मेरवे० मेरुमा० ॥ ३३ ॥ ( अथ सोमादि-
क्रमेण सत्वयाह्यपरिधौ) उत्तरे ॥ ॐ गणानान्त्वा० ॥ ॐ भू० गदायै० गदामा० ॥३४॥
ईशाने ॥ ॐ त्रिर्ठ० अम्बामव्विराजतिव्वाक्पंतङ्गायंधीमते ॥ प्रतिवस्तोरहृद्युभिः ॥
ॐ भू० त्रिशूलाय० त्रिशूलं० ॥ ३५ ॥ पूर्वे ॥ ॐ महाँऽइन्द्रोव्वज्रंहस्तःषोडशीशर्म्म-
यच्छतु ॥ हन्तुपाप्मानंय्योस्मान्द्वेष्टि ॥ उपयामगृहीतोऽसिमहेन्द्रायत्वैषतेयोनि-
र्म्महेन्द्रायत्वा ॥ ॐ भू० वज्राय० वज्रमा० ॥ ३६ ॥ आग्नेये ॥ ॐ व्वसुंचमेव्वसति-

क० इचंमेकर्म्मचमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचंमेगतिश्चमेयज्ञेनकल्पन्ताम् ॥ ॐ प्र०
५४ भू० शक्तये० शक्तिमा० ॥ ३७ ॥ दक्षिणे ॥ ॐ इडएह्यदितऽएहिकाम्याऽएत ॥ मयिं
वःकामधरंणम्भूयात् ॥ ॐ भू० दण्डाय० दण्डमा० ॥ ३८ ॥ नैर्ऋत्यां ॥ खड्गोव्वैश्व-
देवः श्वाकृष्णः कर्णोगर्द्दभस्तरक्षुस्तेरक्षसामिन्द्रायशूकरःसिंहः० होमारुतःकृकलासः
पिप्पकाशकुनिस्तेशरव्यायैव्विश्वेषान्देवानाम्पृषतः ॥ ॐ भू० खड्गाय० खड्गमा० ॥३९॥
पश्चिमे ॥ ॐ उदुत्तमंवरुणपाशमस्मदवाधमंव्विमध्यमꣳश्रथाय ॥ अथाव्वयमा-
दित्यव्व्रतेतवानागसोऽअदितयेस्याम ॥ ॐ भू० पाशाय० पाशं० ॥ ४० ॥ वायु-
कोणे ॥ ॐअर्ठ०शुश्चमेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमऽउपाꣳशुश्चमेन्तर्य्यामश्च
मऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमऽआश्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमन्थीचमेय-
ज्ञेनकल्पन्ताम् ॥ ॐ भू० अङ्कुशमा० ॥ ४१ ॥ ( तद्वाह्ये रजपरिधौ सोमादिक्रमेण ) ५४
उत्तरे ॥ ॐ आयङ्गौःपृश्निरक्रमीदसंदन्मातरम्पुरः ॥ पितरंञ्चप्रयन्त्स्वः ॥ ॐ भू०

गौतमाय० गौतमं० ॥ ४२ ॥ ईशान्याम् ॥ ॐ अयन्दक्षिणाव्विश्वकर्म्मा तस्यमनोव्वैश्व
कर्म्मणङ्ग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभ ÷ स्वारᳪस्वारादन्तर्य्यामोन्तर्य्यामात्पंचद-
शः पंचदशाद्बृहद्भरद्वाजऽऋषि ÷ प्रजापतिगृहीतयात्त्वयामनोगृह्णामिप्रजाभ्य ÷ ॥ ॐ
भू० भरद्वाजाय० भरद्वाजं० ॥ ४३ ॥ पूर्वे ॥ ॐ इदमुत्तरात्स्वस्तस्यश्रोत्रᳪसौवᳪ
शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविᳪशऽएकविᳪशाद्वै
राजं व्विश्वामित्रऽऋषि ÷ प्रजापतिगृहीतयात्वयाश्रोत्रङ्गृह्णामिप्रजाभ्य ÷ ॥ ॐ भू०
विश्वामित्राय० विश्वामित्रं० ॥४४॥ आग्नेय्याम् ॥ ॐ त्र्यायुषञ्जमदग्नेः कश्यपस्यत्र्यायु-
षम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ॐ भू० कश्यपाय० कश्यपं० ॥ ४५ ॥
दक्षिणे ॥ ॐ अयम्पश्चाद्विश्वव्यचास्तस्यचक्षुर्व्वैश्वव्यचसंव्वर्षाश्चाक्षुष्योजगतीव्वार्षी
जगत्याऽऋक्समम्ऋक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषि ÷ प्रजा-
१० पतिगृहीतयात्वयाचक्षुर्गृह्णामिप्रजाभ्य ÷ ॥ ॐ भू० जमदग्नये० जमदग्निमा० ॥४६॥

क० नैर्ऋत्यां ॥ ॐ अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोव्वसन्तः प्प्राणायनोगायत्रीव्वास- प्र०
५८ न्तीगायत्र्यैगायत्रङ्गायत्रादुपाᳪशुरुपाᳪशोस्त्रिवृत्त्रिवृतोरथन्तरंव्वसिष्ठऽऋषि ÷ प्र-
जापतिगृहीतयात्वया प्प्राणङ्गृह्णामिप्रजाभ्य ÷ ॥ ॐ भू० वशिष्ठाय० वशिष्ठमा०
॥ ४७ ॥ पश्चिमे ॥ ॐ अत्र पितरोमादयध्वंय्यथाभागमावृषायध्वम् ॥ अमीमदन्त
पितरोयथाभागमावृषायिषत ॥ ॐ भू० अत्रये० अत्रिमा० ॥ ४८ ॥ वायव्याम् ॥ ॐ
तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः ॥ नाकङ्गृभ्णानाः सुकृतस्यलोके
तृतीयेपृष्ठेऽअधिरोचनेदिवः ॥ ॐ भू० अरुन्धत्यै० अरुन्धतीमा० ॥४९॥ ( तद्बाह्ये ततः
कृष्णपरिधौ पूर्वादिक्रमेण ) पूर्वे ॐ आदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासि
घर्मायदीष्व ॥ ॐ भू० ऐन्द्र्यै० ऐन्द्रीमा० ॥५०॥ आग्नेय्याम् ॥ ॐ अम्बेऽअम्बिके० ॥
ॐ भू० कौमार्य्यै० कौमारी० ॥ ५१ ॥ दक्षिणे ॥ ॐ इन्द्रायाहिधियेषितोव्विप्रजूतः ५८
सुतावतः ॥ उपब्रह्माणि व्वाघतः ॥ ॐ ब्राह्म्यै० ब्राह्मी० ॥ ५२ ॥ नैर्ऋत्याम् ॥

ॐ आयङ्गौःपृश्निरक्रमीदसंदन्मातरंम्पुरः ॥ पितरंञ्चप्रयन्त्स्वं÷ ॥ ॐ भू० वाराह्यै०
वाराही० ॥ ५३ ॥ पश्चिमे ॥ ॐ अम्बे आम्बिके० ॥ ॐ भू० चामुण्डायै०
चामुण्डामा० ॥ ५४ ॥ वायव्याम् ॥ ॐ आप्यांयस्वसमेंतुतेव्विश्वतं÷सोमवृष्ण्यंम् ॥
भवाव्वाजंस्य सङ्गथे ॥ ॐ भू० वैष्णव्यै० वैष्णवी० ॥ ५५ ॥ उत्तरे ॥
ॐ यातेंरुद्रशिवातनूरघोरापांपकाशिनी ॥ तयांनस्तन्वाशन्तंमयागिरिंशन्ताभिचां-
कशीहि ॥ ॐ भू० माहेश्वर्य्यै० माहेश्वरीमा० ॥ ५६ ॥ ईशान्याम् ॥ ॐ समंख्ये
देव्याधियासन्दक्षिणयोरुचंक्षसा ॥ मामऽआयुः प्रमोंषीम्मोंऽअहं तवंव्वीरंव्विदेय-
तवंदेविसन्दशि ॥ ॐ भू० वैनायक्यै नमः वैनायकीमा० ॥ ५७ ॥ ( तद्बाह्ये पूर्वादि-
क्रमेण ) पूर्वे ॐ नमं÷कृत्स्नायतयाधावंतेसत्त्वंनाम्पतंयेनमोनमःसहंमानायनिव्या-
धिनंऽआव्याधिनींनाम्पतंयेनमोनमोंनिषङ्गिणेंककुभायंस्तेनानाम्पतंयेनमोनमोंनिचेरवें-
परिचरायारंण्यानाम्पतंयेनमं÷ ॥ ॐ भू० असिताङ्गभैरवाय० असिताङ्गभैरवमा०
॥ ५८ ॥ आग्नेय्याम् ॥ ॐ श्वित्रऽआदित्यानामुष्ट्रोघृणींवान्वार्ध्रीनसस्तेमत्याऽअरं-

रु० ण्यायसृमरोरुरुंरौद्रः क्वयिं÷कुटरुंर्दात्यौहस्तेव्वाजिनाङ्कामायपिकः ॥ ॐ भू० प्र०
६६ रुरुभैरवाय नमः रुरुभैरवमा० ॥ ५९ ॥ दक्षिणस्याम् ॥ ॐ उग्रँल्लोहिंतेनमित्रंठं०
सौंमंत्येनेन्द्रंम्प्रक्रीडिनंमरुतोबलेंनसाद्ध्यान्प्रमुदा ॥ भवस्य कण्ठ्यंठं० रुद्रस्यान्तः
पार्श्व्यम्मंहादेवस्ययकृच्छर्व्वस्यंव्वनिष्ठुः पंशुपतेंः पुरीतत् ॥ ॐ भू० चण्डभैरवाय०
चण्डभैरवमा० ॥ ६० ॥ नैर्ऋत्याम् ॥ ॐ इन्द्रंस्यक्रोडोऽदित्यैपाजस्यन्दिशाञ्जत्रवोदिं-
त्यैभसज्जीमूतान्न्हृदयौपशेनान्तरिंक्षम्पुरीततानभंऽउदर्य्येणचक्रवाकौमतंस्नाभ्यान्दि-
वंव्वृक्काभ्यांङ्गिरीन्प्लाशिभिरुपलान्प्लीह्नाव्वल्मीकान्क्लोमभिग्ग्लौभिर्गुल्मान्हि-
राभिःस्रवन्तीर्ह्रदान्कुक्षिभ्यांऽसमुद्रमुदरेंणव्वैश्वानरम्भस्मंना ॥ ॐ भू० क्रोध-
भैरवाय० क्रोधभैरवं० ॥ ६१ ॥ पश्चिमे ॥ ॐ उन्नतऽऋषभोव्वांमनस्तऽऐन्द्रावैष्णवा
ऽउंन्नतः शितिबाहुः शितिपृष्ठस्तऽऐन्द्राबार्हस्पत्याः शुकरूपाव्वाजिनाः कल्माषांऽ- ६३
आग्निमारुताः श्यामाः पौष्णाः । ॐ भू० उन्मत्तभैरवाय० उन्मत्तभैरवमावाह

यामि ॥ ६२ ॥ वायव्याम् ॥ ॐ कार्षिरसि० ॥ ॐ भू० कपालभैरवाय० कपालभैरवं०
॥ ६३ ॥ उत्तरे ॥ उग्रश्च० ॥ ॐ भू० भीषणभैरवाय० भीषणभैरवं० ॥ ६४ ॥ ईशा-
न्याम् ॥ ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च
नमः शिवाय च शिवतराय च ॥ ॐ भू० संहारभैरवाय० संहारभैरवं० ॥ ६५ ॥
( तद्बाह्ये पूर्वादिक्रमेण ) पूर्वे ॥ ॐ नमः श्वभ्यः श्वपति० ॥ ॐ भू० भवाय भवं०
॥ ६६ ॥ आग्नेय्याम् ॥ ॐ अग्निर्ह० हृदयेनाशनिर्ह० हृदयाग्रेणपशुपतिङ्कृत्स्नहृदये-
नभवंय्यक्ना ॥ शर्व्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तः पर्शव्येनोग्रन्देव-
म्वनिष्ठुनाव्वशिष्ठहनुः शिङ्गीनिकोश्याभ्याम् ॥ ॐ भू० सर्वाय० सर्वं० ॥ ६७ ॥
दक्षिणे ॥ ॐ उग्रंल्लोहितेन० ॥ ॐ भू० पशुपतये० पशुपतिं० ॥ ६८ ॥ नैर्ऋत्याम् ॥
ॐ तमीशानं० ॥ ॐ भू० ईशानाय० ईशानं० ॥ ६९ ॥ पश्चिमे ॥ नमस्तेरुद्र० ॥
ॐ भू० रुद्राय० रुद्रं० ॥ ७० ॥ वायव्याम् ॥ ॐ उग्रश्च० ॥ ॐ भू० उग्राय० उग्रं०
॥ ७१ ॥ उत्तरे ॥ ॐ व्वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात् ॥ तमेव

रु० व्विदित्वातिमृत्युमेतिनान्यः पन्थाव्विद्यतेयनाय ॥ ॐ भू० भीमाय० भीमं० ॥७२॥ प्रं०
५७ ईशान्याम् ॥ ॐ मानोमहान्त० ॥ ॐ भू० महते० महान्तं० ॥ ७३ ॥ ( तद्बाह्ये
पूर्वादिक्रमेण ) पूर्वे ॥ ॐ स्योनापृथिविनो० ॥ ॐ भू० अनन्ताय० अनन्तं० ॥ ७४ ॥
आग्नेय्याम् ॥ ॐ देहिमेददामितेनिमेधेहिनितेदधे ॥ निहारञ्चहरासिमेनिहारन्निहरा-
णितेस्वाहा ॥ ॐ भू० वासुकये० वासुकिं० ॥ ७५ ॥ दक्षिणे ॥ ॐ नमस्तक्षभ्योरथ-
कारेभ्यश्चवोनमोनमः कुलालेभ्यः कर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्यः पुञ्जिष्ठेभ्य-
श्चवोनमोनमः श्वनिभ्योमृगयुभ्यश्चवोनमः ॥ ॐ भू० तक्षकाय० तक्षकं० ॥ ७६ ॥
नैर्ऋत्याम् ॥ ॐ पुरुषमृगश्चन्द्रमसोगोधाकालकादार्वाघाटस्तेव्वनस्पतीनाङ्कृकवाकुः
सावित्रोहंस० सोव्वातस्यनाक्रोमकरः कुलीपयस्तेकूपारस्यह्रियैशल्ल्यकः ॥ ॐ भू०
कुलिशाय० कुलिशं० ॥ ७७ ॥ पश्चिमे ॥ ॐ सोमायकुलुङ्गऽआरण्योजोनकुलः श- ५७
कातेपौष्णाः क्रोष्टामायोरिन्द्रस्यगौरमृगः पिद्वोन्न्यङ्कुः कक्कटस्तेनुमत्यैप्रतिश्रु-

त्कांयैचक्रवाकः ॥ ॐ भू० कर्कोटकाय० कर्कोटकं० ॥ ७८ ॥ वायव्याम् ॥ ॐ अग्नि-
र्ऋषिः पर्वमानः पाञ्चजन्यः पुरोहितः ॥ तमीमहेमहागयम् ॥ उपयामगृहीतोस्य-
ग्नयैत्वाव्वर्चसऽएषतेयोनिरग्नयैत्वाव्वर्चसे ॥ ॐ भू० शङ्खपालाय० शङ्खपालं०
॥ ७९ ॥ उत्तरे ॥ ॐ सीसेनतन्त्रं मनसामनीषिणऽऊर्णासूत्रेणकवयोव्वयन्ति ॥
अश्विनायज्ञर्ठ० सवितासरस्वतीन्द्रस्यरूपं व्वरुणोभिषज्यन् ॥ ॐ भू० कम्बलाय०
कम्बलं आ० ॥ ८० ॥ ईशान्याम् ॥ ॐ अश्वस्तूपरोगोमृगस्तेप्प्राजापत्याः कृष्णग्रीं-
वाऽआग्नेयोररार्टेपुरस्तात्सारस्वतीमेष्यधस्ताद्धन्व्वोराश्विनावधोरामौबाह्वोः सौमा-
पौष्णाः श्यामोनाभ्यार्ठ० सौर्ययामौश्वेतश्चकृष्णश्चपार्श्वयोस्त्वाष्ट्रौलोमशसक्थौ-
सक्थ्योर्व्वायव्यः श्वेतः पुच्छऽइन्द्रायस्वपस्यायव्वेहद्वैष्णवोव्वामनः ॥ ॐ भू० अ-
श्वतराय० अश्वतरं० ॥ ८१ ॥ ईशानेन्द्रयोर्मध्ये ॥ ॐ नमः श्वभ्यः० ॥ ॐ भू०
शूलाय० शूलं० ॥ ८२ ॥ इन्द्राग्निमध्ये ॥ ॐ चन्द्रमामनसोजातश्चक्षोः सूर्य्योऽअजा-


यत ॥ श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत ॥ ॐ चन्द्रमौलिने० चन्द्रमौलिनं० 
॥ ८३ ॥ अग्नियममध्ये ॥ ॐ चन्द्रमाऽअप्स्वन्तरासुपर्णोधावतेदिवि ॥ रयिम्पिशङ्ग-
म्बहुलम्पुरुस्पृहर्ठ० हरिरेतिकनिक्रदत् ॥ ॐ भू० चन्द्रमसे० चन्द्रमसं० ॥ ८४ ॥
यमनिर्ऋतिमध्ये ॥ ॐ आशुः शिशानो० ॥ ॐ भू० वृषभध्वजाय० वृषभध्वजं०
॥ ८५ ॥ निर्ऋतिवरुणमध्ये ॥ ॐ सुगावोदेवाः सदनाऽअकर्म्मयऽआजग्मेदर्ठ० सव-
नञ्जुषाणाः ॥ भरमाणावहमानाहवीर्ठ०ष्यस्मेधत्तव्वसवोव्वसूनिस्वाहा ॥ ॐ भू०
त्रिलोचनाय० त्रिलोचनं० ॥ ८६ ॥ वरुणवायुमध्ये ॥ ॐ रुद्राः सर्ठ०सृज्ज्यपृथिवीम्बृ-
हज्ज्योतिःसमीधिरे ॥ तेषाम्भानुरजस्रऽइच्छुक्रोदेवेषुरोचते ॥ ॐ भू० शक्तिधराय०श-
क्तिधरमा०॥८७॥वायुसोममध्ये॥ ॐ त्र्यम्बकंयजा०॥ ॐ भू०महेश्वराय०महेश्वरं०॥८८॥
सोमेशानमध्ये॥ ॐयावाङ्कशामधुमत्यश्विनासूनृतावती॥ तयायज्ञम्मिमिक्षतम्॥ ॐभू० 
शूलपाणये० शूलपाणिनं० ॥ ८९ ॥ इति लिङ्गतोभद्रदेवतास्थापनम् ॥ ततो ब्रह्मादि-
मंडलस्थदेवताभ्यो नमः इति षोडशोपचारैः संपूज्य ॥ ततस्तन्मध्ये महान्तं

ताम्रमयं कलशं मही द्यौरित्यादिविधिना संस्थाप्य पूर्णपात्रस्थाने अतिविशालं ताम्रपात्रं निधाय तत्र कौशेयं वस्त्रं संवेष्ट्य यंत्रं विलिख्य पूजयेत् ॥ तद्यथा ॥ मध्ये वृत्तं साष्टदलम् ॥ तद्बहिः षोडशपत्रात्मकं वृत्तम् ॥ तद्बहिश्चतुर्विंशतिपत्रात्मकं वृत्तम् ॥ तद्बहिर्द्वात्रिंशत्पत्रात्मकं वृत्तम् ॥ तद्बहिश्चत्वारिंशत्पत्रात्मकं वृत्तम् ॥ तद्बहिश्चतुरस्रं चतुर्द्वारं सत्त्वादिगुणैर्युतं बहिर्नागसमावृतं भूगृहं एवं स्कन्दपुराणोक्तं पंचपद्मात्मकं यंत्रं सम्पाद्य तत्कार्णिकायाम् ॥ ॐ नमो भगवते रुद्रायेति दशाक्षरमंत्रं लिखेत् ॥ ततः आचम्य प्राणानायम्य ॥ देशकालौ स्मृत्वा० अमुकरुद्राख्ये कर्मणि रुद्रपीठदेवतास्थापनं पूजनं करिष्ये ॥ अत्रावसरे आदौ भूतशुद्ध्यादि विधाय पंचाङ्गन्यासांश्च कुर्यादिति कश्चित् ॥ नेत्यपरे ॥ ॐ नमः श्रुत्यायेति मंत्रेण रत्नखचितसुवर्णमयपीठकल्पनम् ॥ अक्षतैः पुष्पैर्वा पीठपूजां कुर्यात् पीठस्याधोभागे ॥ ॐ मूलप्रकृत्यै नमः ॥ ॐ आधारशक्तये नमः ॥ ॐ कूर्माय नमः ॥ ॐ अनन्ताय नमः ॥ ॐ वाराहाय नमः ॥ ॐ पृथिव्यै नमः ॥ ॐ विचित्रदिव्यरत्नमण्डपाय नमः ॥ मण्डपस्य परितः ॥ ॐ कल्पवृक्षेभ्यो नमः ॥ ॐ सुवर्णवेदिकायै नमः ॥ ॐ रत्नसिंहासनाय नमः ॥ अथ

रु० सिंहासनपादेषु ॥ ॐ धर्माय नमः इत्याग्नेय्याम् ॥ ॐ ज्ञानाय नमः नैर्ऋत्याम् ॥ प्र०
५९ ॐ वैराग्याय नमः इति वायव्याम् ॥ ॐ ऐश्वर्याय नमः ॥ इति ऐशान्याम् ॥ गात्रेषु ॥ ॐ अधर्माय नमः इति प्राच्याम् ॥ ॐ अज्ञानाय नमः इति दक्षिणस्याम् ॥ ॐ अवैराग्याय नमः इति प्रतीच्याम् ॥ ॐ अनैश्वर्य्याय नमः इत्युदीच्याम् ॥ सिंहासनोपरि ॥ ॐ तल्पाकारायानन्ताय नमः ॥ ॐ पद्माय नमः ॥ ॐ आनन्दमयकन्दाय नमः ॥ ॐ संविन्नालाय नमः ॥ ॐ प्रकृतिमयपत्रेभ्यो नमः ॥ ॐ विकारमयकेशरेभ्यो नमः ॥ ॐ पंचाशद्वर्णादयः कर्णिकायै नमः ॥ अथ पद्मदलकेसरकर्णिकासु ॥ ॐ सं सत्वाय नमः ॥ इति दलेषु ॥ ॐ रं रजसे नमः इति केसरेषु ॥ ॐ तं तमसे नमः इति कार्णिकासु ॥ एवं प्रकृतित्रिकं सर्वत्र ॥ ॐ अं द्वादशकलात्मनेऽर्कमण्डलाय नमः ॥ ॐ उं षोडशकलात्मने सोममण्डलाय नमः ॥ ॐ मं दशकलात्मनेऽग्निमंडलाय नमः ॥ ॐ अं ब्रह्मणे नमः ॥ ॐ उं विष्णवे
नमः ॥ ॐ मं महेश्वराय नमः ॥ ॐ अं आत्मने नमः ॥ ॐ उं अन्तरात्मने नमः ॥ ५९
ॐ मं परमात्मने नमः ॥ ॐ ज्ञानात्मने नमः ॥ इति सर्वपद्मार्चनम् ॥

अथ पद्मपूर्वादिपत्रेषु ॥ ॐ कामायै नमः ॥ ॐ ज्येष्ठायै नमः ॥ ॐ
रौद्र्यै० ॥ ॐ काल्यै नमः ॥ ॐ कलविकरिण्यै नमः ॥ ॐ बलविकरिण्यै नमः ॥
ॐ बलप्रमथिन्यै नमः ॥ ॐ सर्वभूतदमन्यै नमः ॥ इत्यष्टौ शक्तीः संपूज्य ॥ ॐ
मनोन्मन्यै नमः ॥ इति कर्णिकायां पूजनम् ॥ ॐ नमो भगवते रुद्राय सकलगुणात्मश-
क्तियुक्तायानन्ताय योगपीठानन्दरूपं परं धामैव सकलं पीठमिति ।चिंतयेत् ॥ इति
पीठपूजा ॥ ( अथ महारुद्रप्रतिमामानम् ॥ पंचास्याम्प्रतिमां रौद्रीं निष्कमात्रसुवर्णतः ॥
तदर्धार्धेन वा कुर्याद्वित्तशाठ्यविवर्जितः ॥ महारुद्रस्य मानार्द्धं राजतं कारयेद्वृषम् ॥
द्विगुणं राजतं वृषमिति वा रुद्रस्यार्द्धेन उमां चेत्युक्तम् ॥ तत उक्तप्रमाणेन
स्वशक्त्या वा सौवर्णं महारुद्रस्य प्रतिमां कृत्वाऽग्न्युत्तारणं कुर्यात् ॥ ) ततो मूर्तिं पात्रे
निधाय घृतेनाभ्यज्य तदुपरि संततां दुग्धधारां जलधारां वा दद्यात् ॥ तत्र मंत्राः ॥
ॐ समुद्रस्यत्वावकयाग्नेपरिव्व्ययामसि ॥ पावकोऽअस्मब्भ्यंर्ठ० शिवोभव ॥ १ ॥
ॐ हिमस्यत्वाजरायुणाग्नेपरिव्व्ययामसि ॥ पावकोऽअस्मब्भ्यंर्ठ० शिवोभव ॥ २ ॥
उपज्ज्मन्नुपवेतसेवतरन्नदीष्वा ॥ अग्नेपित्तमपामसिमण्डूकिताभिरागहिसेमन्नोय-

रु० ज्ञम्पावकवर्णर्ठ० शिवङ्कृधि ॥ ३ ॥ ॐ अपामिदन्न्ययनर्ठ० समुद्रस्यनिवेशनम् ॥ प्र०
६० अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयः पावकोऽअस्मब्भ्यंर्ठ० शिवोभव ॥ ४ ॥ ॐ प्राणदाऽ-
अपानदाव्व्यानदाव्वर्चोदाव्वरिवोदाः ॥ अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयः पावकोऽअ-
स्मब्भ्यंर्ठ० शिवोभव ॥ ५ ॥ इति पंचभिर्मंत्रैर्दक्षिणहस्तगृहीतेन कलशेन संततां
धारां कृत्वा ॥ ॐ पञ्चनद्येति पंचामृतेन संस्नाप्य यन्त्रोपरि स्थापयेत् ॥ ततः
प्राणप्रतिष्ठा ॥ ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः
ऋग्यजुःसामानि छन्दांसि चैतन्यरूपा परा प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः
क्रों कीलकं देवस्य प्राणप्रतिष्ठायां विनियोगः ॥ ततो मूर्तिं हस्तेन स्पृष्ट्वा
प्राणप्रतिष्ठां कुर्यात् ॥ ॐ आँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोहं देवस्य
प्राणा इह प्राणाः ॥ ॐ आँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोहं देवस्य जीव
इह स्थितः ॥ ॐ आँ ह्रीं क्रों० देवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्र- ६०
जिह्वाघ्राणप्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ ततो

गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तिं कृत्वा ॥ ॐ नमः शम्भवाय
चमयोभवायचनमः शङ्करायचमयस्करायचनमः शिवायचशिवतरायच ॥ इत्यावाह्य ॥
ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳ समिमन्दधातु ॥
व्विश्वेदेवासऽइहमादयन्तामोम्प्रतिष्ठ ॥ इति प्रतिष्ठाप्य ॥ ततो देवमूर्ध्नि दशाक्षर-
न्यासः ॥ ॐ नमः ॥ ॐ नं नमः ॥ ॐ मों नमः ॥ ॐ भं नमः ॥ ॐ गं नमः ॥
ॐ वं नमः ॥ ॐ तें नमः ॥ ॐ रुं नमः ॥ ॐ द्रां नमः ॥ ॐ यं नमः ॥ ॐ
सद्योजातमित्यादिपंचमंत्रैर्देवस्य पंचवक्त्रेषु न्यासः ॥ ॐ सद्योजातंप्रपद्यामिसद्योजा-
तायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ इति पश्चिमवक्त्रे ॥
ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणाय नमो
बलविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनाय नमः॥
इत्युत्तरवक्त्रे ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो-
११ नमस्तेऽअस्तुरुद्ररूपेभ्यः ॥ इति दक्षिणवक्त्रे ॥ ॐ तत्पुरुषायविद्महेमहादेवायधी-
महि ॥ तन्नोरुद्रः प्रचोदयात् ॥ इति पूर्ववक्त्रे ॥ ॐ ईशानः सर्वविद्यानामीश्वरः

रु० सर्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ इति प्र०
६१ ऊर्ध्ववक्त्रे ॥ ततो रुद्रपीठदक्षिणतः पश्चिमतो वा कुशास्तरणम् । तदुपरि श्वेतकम्बला-
स्तरणम् ॥ ॐ ऊर्ध्वकेशी विरूपाक्षी मांसशोणितभोजने ॥ तिष्ठ देवि शिखामध्ये
चामुण्डे चापराजिते ॥ इति मंत्रेण शिखाग्रन्थिबन्धनम् ॥ ॐ सहस्राणिसहस्रशोबा-
ह्वोस्तवहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ इति भूमिं प्रार्थ्य ॥
ॐ पृथिवीति मंत्रस्य मेरुपृष्ठऋषिः सुतलं छंदः कूर्मो देवता आसने विनियोगः ॥
ॐ पृथिवि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि
पवित्रं कुरु चासनम् ॥ इत्यासनशुद्धिः ॥ ॐ प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने ॥
सꣳसृज्यमातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः ॥ इति भस्मत्रिपुण्ड्रधारणम् ॥ ॐ
नमः शिवाय ॥ इति रुद्राक्षमालाधारणम् ॥ स्ववामभागे शुद्धोदककलशं दक्षिणभागे
घंटादिपूजोपकरणानि च स्थापयेत् ॥ स्वपुरतः गंधादिपात्राणि घृतं क्षीरं च ६१
स्थापयेत् ॥ दक्षिणे वामे च तैलदीपं घृतदीपं च निधाय ॥ ॐ अपवित्रः पवित्रो वेति

आत्मानं पूजासामग्रीं च सम्प्रोक्ष्य ॥ आचम्य प्राणानायम्य ॥ देशकालौ स्मृत्वा० अमुकगोत्रः अमुकशर्माहं अमुकरुद्रयागकर्मणि यथालब्धोपचारैः महारुद्रपूजां करिष्ये ॥ इति संकल्पः ॥ तत आदौ शरीरशुद्ध्यर्थं मूलमंत्रेण षडङ्गन्यासाच्छदः-पुरुषन्यासांश्च कृत्वा ॥ तद्यथा ॥ ॐ हृदयाय नमः ॥ नं शिरसे स्वाहा ॥ मः शिखायै वषट् ॥ शिं कवचाय हुं ॥ वां नेत्रत्रयाय वौषट् ॥ यं अस्त्राय फट् ॥ ततः छन्दःपुरुषस्य न्यासः ॥ ॐ तिर्यग्बिलाय चमसायोर्ध्वबुध्न्याय छन्दःपुरुषाय नमः इति शिरसि ॥ ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः ॥ ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः ॥ ॐ वशिष्ठकश्यपाभ्यां नमः नासापुटयोः ॥ ॐ अत्रये नमः वाचि ॥ ॐ गायत्र्यै छन्दसे नमः अग्नये नमः इति शिरसि ॥ ॐ उष्णिहे छन्दसे नमः सवित्रे नमः इति ग्रीवायाम् ॥ ॐ बृहत्यै छन्दसे नमः बृहस्पतये नमः इति पृष्ठवंशे ॥ ॐ बृहद्रथन्तराभ्यां नमः द्यावापृथिवीभ्यां नमः इति दक्षवामबाहौ ॥ ॐ त्रिष्टुभे छन्दसे नमः इन्द्राय नमः इत्युदरे ॥ ॐ जगत्यै छन्दसे नमः आदित्याय नमः इति श्रोण्योः ॥ ॐ अतिछन्दसे नमः प्रजापतये नमः इति लिङ्गे ॥ ॐ यज्ञायज्ञियाय छन्दसे नमः





वैश्वानराय नमः इति पायौ ॥ ॐ अनुष्टुभे छन्दसे नमः विश्वेभ्यो देवेभ्यो नमः इत्यूर्वोः ॥ ॐ पंक्त्यै छन्दसे नमः मरुद्भ्यो नमः इति जान्वोः ॥ ॐ द्विपदायै छन्दसे नमः विष्णवे नमः इति पादयोः ॥ ॐ विच्छन्दसे नमः वायवे नमः इति प्राणेषु ॥ ॐ न्यूनाक्षराय छन्दसे नमः अद्भ्यो नमः इति हस्तद्वयविपर्यासेन मस्तकादिपादान्तं सर्वाङ्गेषु ॥ ततः पूजामारभेत् ॥ पुष्पांजलिं गृहीत्वा ध्यायेत् ॥ शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकम् ॥ गंगाधरं दशभुजं सर्वाभरणभूषितम् ॥ १ ॥ नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ॥ व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥ २ ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ॥ ज्वलन्तं पिङ्गलजटाजूटमुद्योतकारिणम् ॥ ३ ॥ अमृतेन युतं हृष्टमुमादेहार्धधारिणम् ॥ दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ ४ ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ ५ ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ॥ एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥६॥ इति ध्यानम् ॥ ॐ नमः शम्भवायेति आवाहनमासनं च ॥ ॐ नमो भगवते रुद्रायेति दशाक्षरेण

पाद्यमर्घ्यं च ॥ ॐ नमः शम्भवायेति आचमनीयम् ॥ ततः स्नानपीठे देवमुप-
वेश्य पंचामृतमंत्रैः पृथक् पृथक् स्नापयेत् ॥ ॐपयः पृथिव्येति पयसा ॥ ॐ दधि-
क्राव्णोति दध्ना ॥ ॐ घृतम्मिमिक्षेति घृतेन ॥ ॐ मधुव्वातेति मधुना ॥ ॐ अपा
ᳬ रसेति शर्करया ॥ ॐ देवस्यत्वेति शुद्धोदकेन ॥ ॐ गन्धर्व्वस्त्वाव्विश्वावसुः
परिदधातु व्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः० इति गन्धोदकेन ॥
ततो मूर्त्तेरुपरि अभिषेकं कुर्यात् ॥ तत्र मंत्राः ॥ ॐ याते रुद्रशिवात-
नूरघोरा० ॥ १ ॥ ॐ अस्मिन्महत्यर्णवे० ॥ २ ॥ ॐ असंख्यातासहस्राणि० ॥ ३ ॥
ॐ त्र्यम्बकंयजामहे ॥ ४ ॥ ॐ त्र्यम्बकं० ॥ ५ ॥ ॐ मानस्तोके० ॥ ६ ॥ ॐ अवतत्य-
धनुष्ट्वं० स० ॥ ७ ॥ ॐ नीलग्रीवाः शितिकण्ठादिवर्ठ० रुद्रा० ॥ ८ ॥ ॐ नील-
ग्रीवाः शितिकण्ठाः शर्वा० ॥ ९ ॥ ॐ नमस्तऽआयु० ॥१०॥ ॐ ये तीर्थानि० ॥ ११ ॥
ॐ नमो वः किरिकेभ्यो० ॥ १२ ॥ ॐ नमो हिरण्यबाहवे० ॥ १३ ॥ ॐ इमारुद्राय०
॥ १४ ॥ ॐ मानोमहान्त० ॥ १५ ॥ ॐ एषतेरुद्रभागः० ॥ १६ ॥ ॐ अवरुद्र-
मदी० ॥ १७ ॥ ॐ अध्यवोचदधि० ॥ १८ ॥ ॐ नमोबिल्मिने० ॥ १९ ॥ ॐ नमो-

 स्तुर्नीलग्रीवाय० ॥ २० ॥ ॐ प्रमुञ्चधन्वन० ॥ २१ ॥ ॐ यऽएतावन्त० ॥ २२ ॥ ॐ 
 नमो भगवते रुद्राय० ॥२३॥ ॐ मानस्तोके० ॥ २४ ॥ ॐ नमः शम्भवाय० ॥ २५ ॥
इत्यभिषेकः ॥ ॐ नमः शम्भवायेत्याचमनम् ॥ ततः अंगप्रोक्षणार्थं वासः ॥
कौपीनम् ॥ स्नानं पीठात्पूर्वं पूजितपीठे देवस्य स्थापनम् ॥ न्यासः ॥ ॐ हृदयाय
नमः ॥ ॐ नं शिरसे स्वाहा ॥ ॐ मों शिखायै वषट् ॥ ॐ कं कवचाय हुं ॥ ॐ
द्रां नेत्रत्रयाय वौषट् ॥ ॐ यं अस्त्राय फट्० ॥ इति पुष्पेण दर्भाङ्कुरेण वा स्पृश-
न्देवषडंगन्यासान्कृत्वा ॥ ॐ नमः शम्भवायेति वस्त्रोपवस्त्रं यज्ञोपवीतं भूषणानि
दत्त्वा ॥ तेनैव मंत्रेण गंधादिपुष्पांजल्यन्तं कृत्वा ॥ ॐ नमो भगवते रुद्रायेति
नमस्कारः ॥ ततः शुक्लगंधतण्डुलपुष्पैः पंचवक्त्रपूजनम् ॥ ॐ सद्योजातेति पश्चिम-
वक्त्राय नमः ॥ गंधाक्षतपुष्पाणि स० ॥ ॐ वामदेवाय नम इति उत्तरवक्त्राय नमः ॥
गंधाक्षतपुष्पाणि स० ॥ ॐ अघोरेभ्य इति दक्षिणवक्त्राय नमः ॥ गंधाक्षतपुष्पाणि 
स० ॥ ॐ तत्पुरुषायेति पूर्ववक्त्राय नमः गन्धाक्षतपुष्पाणि स० ॥ ॐ तमीशानेति
ऊर्ध्ववक्त्राय नमः ॥ गंधाक्षतपुष्पाणि स० ॥ इति पंचवक्त्रपूजा ॥ ततो देवस्य

वामभागे पार्वतीपूजनम् ॥ ॐ भगवत्यै उमायै नमः ॥ ॐ शङ्करप्रियायै नमः ॥ ॐ पार्वत्यै नमः ॥ ॐ कालिन्द्यै नमः ॥ ॐ कोटर्व्यै नमः ॥ ॐ विश्वधारिण्यै नमः ॥ ॐ गंगादेव्यै नमः ॥ ॐ ह्रां नमः ॥ ॐ ह्रीं नमः ॥ इति सम्पूज्य ॥ अथैकादशरुद्र-पूजनम् ॥ ॐ अघोराय नमः ॥ ॐ पशुपतये नमः ॥ ॐ शर्वाय नमः ॥ ॐ विरू-पाक्षाय नमः ॥ ॐ विश्वरूपिणे नमः ॥ ॐ त्र्यम्बकाय नमः ॥ ॐ कपर्दिने नमः ॥ ॐ भैरवाय नमः ॥ ॐ शूलपाणये नमः ॥ ॐ ईशानाय नमः ॥ ॐ महेशाय नमः ॥ इत्येकादशरुद्रपूजा ॥ अथावरणपूजा ॥ ॐ नमो भगवते रुद्राय ॥ इति कर्णिकायां गंधादिभिः रुद्रपूजनम् ॥ ततस्तद्बहिः वृत्तमध्य एव ॥ ॐ सद्योजाताय नमः इति प्राच्याम् ॥ ॐ वामदेवाय नमः इति दक्षिणस्याम् ॥ ॐ अघोराय नमः इति प्रती-च्याम् ॥ ॐ तत्पुरुषाय नमः इति उदीच्याम् ॥ ॐ ईशानाय नमः इति मध्ये ॥ तद्बहिः अष्टदलेषु प्रागादिक्रमेण ॥ ॐ नन्दिने नमः ॥ १ ॥ ॐ महाकालाय नमः ॥ २ ॥ ॐ गणेशाय नमः ॥ ३ ॥ ॐ वृषभाय नमः ॥ ४ ॥ ॐ भृङ्गिणे नमः ॥ ५ ॥ ॐ स्कन्दाय नमः ॥ ६ ॥ ॐ उमायै नमः ॥ ७ ॥ ॐ चण्डेश्वराय नमः ॥ ८ ॥ गंधाक्षतपुष्पाणि



समर्पयामि ॥ इति संपूज्य प्रार्थयेत् ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ इति प्रथमावरणम् ॥ तद्बहिः षोडश-दलेषु प्रागादिक्रमेण ॥ ॐ अनन्ताय नमः ॥ १ ॥ ॐ सूक्ष्माय नमः ॥२॥ ॐ शिवाय नमः ॥ ३ ॥ ॐ एकपदे नमः ॥ ४ ॥ ॐ एकरुद्राय नमः ॥ ५ ॥ ॐ त्रिमूर्तये नमः ॥ ६ ॥ ॐ श्रीकण्ठाय नमः ॥७॥ ॐ वामदेवाय नमः ॥ ८॥ ॐ ज्येष्ठाय नमः॥९॥ ॐ श्रेष्ठाय नमः ॥ १० ॥ ॐ रुद्राय नमः ॥ ११ ॥ ॐ कालाय नमः ॥ १२ ॥ ॐ कलविकरणाय नमः ॥ १३॥ ॐ बलविकरणाय नमः ॥ १४ ॥ ॐ बलाय नमः ॥ १५ ॥ ॐ बलप्रमथनाय नमः ॥ १६ ॥ गंधाक्षतपुष्पाणि समर्पयामि इति सम्पूज्य प्रार्थ-येत् ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ॥ भक्त्या समर्पये तुभ्यं द्वितीया-वरणार्चनम् ॥ इति द्वितीयावरणम् ॥ तद्बहिः चतुर्विंशतिदलेषु प्रागादिक्रमेण ॥ ॐ अणिमायै नमः ॥ १ ॥ ॐ महिमायै नमः ॥ २ ॥ ॐ लघिमायै नमः ॥ ३ ॥ ॐ गरिमायै नमः ॥ ४ ॥ ॐ प्राप्त्यै नमः ॥ ५ ॥ ॐ प्राकाम्यै नमः ॥ ६ ॥ ॐ ईशित्वायै नमः ॥ ७ ॥ ॐ वशित्वायै नमः ॥ ८ ॥ ॐ ब्राह्म्यै नमः ॥ ९ ॥ ॐ माहेश्वर्यै नमः

॥ १० ॥ ॐ कौमार्य्यै नमः ॥ ११ ॥ ॐ वैष्णव्यै नमः ॥ १२ ॥ ॐ वाराह्यै नमः
॥ १३ ॥ ॐ माहेन्द्र्यै नमः ॥ १४ ॥ ॐ चामुण्डायै नमः ॥ १५ ॥ ॐ चण्डिकायै नमः
॥ १६ ॥ ॐ असिताङ्गभैरवाय नमः ॥ १७ ॥ ॐ रुरुभैरवाय नमः ॥ १८ ॥ ॐ
चंडभैरवाय नमः ॥१९॥ ॐ क्रोधभैरवाय नमः ॥२०॥ ॐ उन्मत्तभैरवाय नमः ॥२१॥
ॐ कालभैरवाय नमः ॥ २२ ॥ भीषणभैरवाय नमः ॥ २३ ॥ ॐ संहारभैरवाय नमः
॥ २४ ॥ गंधाक्षतपुष्पाणि समर्पयामि इति सम्पूज्य प्रार्थयेत् ॥ दयाब्धे त्राहि
संसारसर्पान्मां शरणागतम् ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥ इति
तृतीयावरणम् ॥ तद्बहिः द्वात्रिंशद्दलेषु प्रागादिक्रमेण ॥ ॐ भवाय नमः ॥ १ ॥
ॐ शर्वाय नमः ॥ २ ॥ ॐ ईशानाय नमः ॥ ३ ॥ ॐ पशुपतये नमः ॥ ४ ॥
ॐ रुद्राय नमः ॥ ५ ॥ ॐ उग्राय नमः ॥ ६ ॥ ॐ भीमाय नमः ॥ ७ ॥ ॐ महते
नमः ॥ ८ ॥ ॐ अनन्ताय नमः ॥ ९ ॥ ॐ वासुकये नमः ॥ १० ॥ ॐ तक्षकाय नमः
॥ ११ ॥ ॐ कुलीरकाय नमः ॥ १२ ॥ ॐ कर्कोटकाय नमः ॥ १३ ॥ ॐ शंखपालाय
नमः ॥ १४ ॥ ॐ कम्बलाय नमः ॥ १५ ॥ ॐ अश्वतराय नमः ॥ १६ ॥ वैन्याय

क० नमः ॥ १७ ॥ ॐ पृथवे नमः ॥ १८ ॥ ॐ हैहयाय नमः ॥ १९ ॥ ॐ अर्जुनाय प्र०
६६ नमः ॥ २० ॥ ॐ शाकुन्तलेयाय नमः ॥ २१ ॥ ॐ भरताय नमः ॥ २२ ॥ ॐ
नलाय नमः ॥ २३ ॥ ॐ रामाय नमः ॥ २४ ॥ ॐ हिमवते नमः ॥ २५ ॥ ॐ
निषधाय नमः ॥ २६ ॥ ॐ विन्ध्याय नमः ॥ २७ ॥ ॐ माल्यवते नमः ॥ २८ ॥ ॐ
पारिजाताय नमः ॥ २९ ॥ ॐ मलयाय नमः ॥ ३० ॥ ॐ हेमकूटाय नमः ॥ ३१ ॥
ॐ गन्धमादनाय नमः ॥ ३२ ॥ गंधाक्षतपुष्पाणि समर्पयामि इति सम्पूज्य प्रार्थयेत् ॥
दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥
इति चतुर्थावरणम् ॥ तद्बहिः चत्वारिंशद्दलेषु प्रागादिक्रमेण ॥ ॐ इन्द्राय नमः ॥१॥
ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥४॥ ॐ वरुणाय
नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥
ॐ शच्यै नमः ॥ ९ ॥ स्वाहायै नमः ॥ १० ॥ ॐ वाराह्यै नमः ॥ ११ ॥ ॐ
खड्गिन्यै नमः ॥ १२ ॥ ॐ वारुण्यै नमः ॥ १३ ॥ ॐ वायव्यै नमः ॥ १४ ॥ ॐ ६६
कौबेर्य्यै नमः ॥ १५ ॥ ॐ ईशान्यै नमः ॥ १६ ॥ ॐ वज्राय नमः ॥ १७ ॥ ॐ

शक्तये नमः ॥ १८ ॥ ॐ दण्डाय नमः ॥ १९ ॥ ॐ खड्गाय नमः॥ २० ॥ ॐ पाशाय नमः ॥ २१ ॥ ॐ अङ्कुशाय नमः ॥ २२ ॥ ॐ गदायै नमः ॥ २३ ॥ ॐ त्रिशूलाय नमः ॥ २४ ॥ ॐ ऐरावताय नमः ॥ २५ ॥ ॐ मेषाय नमः ॥ २६ ॥ ॐ महिषाय नमः ॥ २७ ॥ ॐ प्रेताय नमः ॥ २८ ॥ ॐ मकराय नमः ॥ २९ ॥ ॐ मृगाय नमः ॥ ३० ॥ ॐ नराय नमः ॥ ३१ ॥ ॐ वृषभाय नमः ॥ ३२ ॥ ॐ ऐरावताय नमः ॥ ३३ ॥ पुण्डरीकाय नमः ॥ ३४ ॥ ॐ वामनाय नमः ॥ ३५ ॥ ॐ कुमुदाय नमः ॥ ३६ ॥ ॐ अञ्जनाय नमः ॥ ३७ ॥ ॐ पुष्पदन्ताय नमः ॥ ३८ ॥ ॐ सार्वभौमाय नमः ॥ ३९ ॥ ॐ सुप्रतीकाय नमः ॥ ४० ॥ गन्धाक्षतपुष्पाणि समर्पयामि इति सम्पूज्य प्रार्थयेत् ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ॥ भक्त्या समर्पये तुभ्यं पंचमावरणार्चनम् ॥ इति पंचमावरणम् ॥ ततः पंचमाद्बहिर्भूगृहान्तः प्रागादिक्रमेण ॥ ॐ इन्द्राय नमः ॥ ॐ अग्नये नमः ॥ ॐ यमाय नमः ॥ ॐ निर्ऋतये नमः ॐ वरुणाय नमः ॥ ॐ वायवे नमः ॐ कुबेराय नमः ॥ ॐ ईशानाय नमः ॥ ॐ विरूपाक्षाय नमः ॥ इत्याग्नेय्याम् ॥ विश्वरूपाय नमः ॥



इति नैर्ऋत्याम् ॥ ॐ पशुपतये नमः ॥ इति वायव्याम् ॥ ॐ ऊर्ध्वलिंगाय नमः इत्यैशान्याम् ॥



## अथ भूगृहाद्बहिः ।

ॐ विप्रवर्णाय श्वेतरूपाय सहस्रफणामंडलसंयुताय शेषाय नमः ॥ इति पूर्वस्याम् ॥ ॐ वैश्यवर्णाय नीलरूपाय पंचाशत्फणामंडलभूषितायोत्तुंगकायाय तक्षकाय नमः ॥ इत्याग्नेय्याम् ॥ ॐ विप्रवर्णाय कुंकुमाभाय सहस्रफणामण्डलसंयुक्तायानन्ताय नमः ॥ इति दक्षिणस्याम् ॥ ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणामंडलसंयुक्ताय उत्तुङ्गकायाय वासुकये नमः ॥ इति नैर्ऋत्याम् ॥ ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणामंडलसंयुक्ताय शंखपालाय ते नमः ॥ इति प्रतीच्याम् ॥ ॐ वैश्यवर्णाय नीलरूपाय पंचाशत्फणामंडलसंयुक्तायोत्तुङ्गकायाय महापद्माय नमः॥ इति वायव्याम् ॥ ॐ शूद्रवर्णाय कृष्णरूपाय त्रिंशत्फणामण्डलसंयुक्ताय कंबलाय नमः ॥ इत्युदीच्याम् ॥ ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणामण्डलसंयुक्ताय कोटिकाय नमः ॥ इत्यैशान्याम् ॥ इति स्कन्दपुराणोक्तानुसारेण रुद्रपीठदेवताः

सर्वाः संपूज्य ॥ ॐ नमो भगवते रुद्रायेति देवमूर्ध्नि पुष्पाञ्जलिं दत्त्वा ॥
ॐ त्र्यम्बकं यजामहे० ॥ ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय सर्वेश्वराय श्रीमहा-
देवाय नमः इति नत्वा ॥ ॐ एषतेरुद्रभाग इति मंत्रेण बाणमुद्रा । लिङ्गमुद्रा ।
शूलमुद्रा । पद्ममुद्रा । कालकर्णीमुद्रा । योनिमुद्रा । धेनुमुद्रा । इत्येताः सप्त मुद्राः ॥
अथवा केवलं योनिमुद्रां प्रदर्श्य प्रदक्षिणात्रयं दत्त्वा ॥ नमः सर्वहितार्थाय जगदाधार-
हेतवे ॥ साष्टांगोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥ इति साष्टाङ्गं प्रणम्य ॥ ॐ
इमारुद्राय० अनया पूजया भगवान्महारुद्रः प्रीयताम् ॥ ॐ द्रापेअंध० इति पुनः
साष्टाङ्गं प्रणमेत् ॥ तत आचार्यः अग्निसमीपमागत्याग्नेः पश्चादुपविश्य कुश-
कण्डिकां कुर्यात् ॥ तद्यथा ॥ अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा ॥ अग्नेरुत्तरतः
प्रणीतासनद्वयम् ॥ ब्रह्मासने ब्रह्मोपवेशनम् ॥ यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा
१२ भव ॥ भवामीति ब्रह्मा वदेत् ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य
कुशैराच्छाद्य प्रथमासने निधाय आलभ्य ब्रह्मणो मुखमवलोक्य द्वितीयासने

६० निदध्यात् ॥ बर्हिषश्चतुर्थभागमादाय ॥ आग्नेयादीशानान्तम् ॥ ब्रह्मणोऽग्निपर्यन्तम् ॥ प्र०
६७ नैर्ऋत्याद्वायव्यान्तम् ॥ अग्नितः प्रणीतापर्यन्तम् ॥ अग्नेः पश्चात्पात्रासादनम् ॥
पवित्रच्छेदनार्थं कुशत्रयम् ॥ पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम् ॥
प्रोक्षणीपात्रम् ॥ आज्यस्थाली ॥ चरुस्थाली ॥ संमार्जनकुशाः पंच ॥ उपयमनकुशाः
सप्त ॥ समिधस्तिस्रः ॥ स्रुवः ॥ आज्यम् ॥ तण्डुलाः ॥ पयः ॥ पूर्णपात्रं
वृषनिष्क्रयदक्षिणा च ॥ उपकल्पनीयानि द्रव्याणि निधाय ॥ द्वयोरुपरि त्रीणि
निधाय ॥ द्वौ मूलेन प्रदक्षिणीकृत्य ॥ त्रिभिश्छिन्द्य ॥ द्वौ ग्राह्यौ त्रिस्त्याज्यः ॥
प्रोक्षणीपात्रे प्रणीतोदकमासिच्य ॥ त्रिः पूर्ण ॥ पवित्राभ्यामुत्पवनम् ॥ प्रोक्षण्या
सव्यहस्तकरणम् ॥ दक्षिणहस्तेन गृहीतपवित्रेणोद्दिंगनम् ॥ प्रणीतोदकेन प्रोक्षणी-
प्रोक्षणम् ॥ प्रोक्षण्युदकेन यथासादितवस्तुसेचनम् ॥ अग्निप्रणीतयोर्मध्ये प्रोक्षणीं
निधाय ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ चरुस्थाल्यां प्रणीतोदकासेकपूर्वकं तण्डुल-
पयसोः प्रक्षेपः ॥ ब्रह्मणो दक्षिणत आज्याधिश्रयणम् स्वयं चरोराधिश्रयणं आज्यस्योत्त- ६७
रतः ॥ ज्वलदुल्मुकेनोभयोः पर्यग्निकरणम् ॥ इतरथावृत्तिः ॥ उदकोपस्पर्शः ॥ अर्धश्रिते

चरौ अधोमुखस्य स्रुवस्य प्रतपनम् ॥ संमार्जनकुशैः स्रुवस्योर्ध्वमुखस्य सम्मार्जनम् ॥ अग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं सम्मृज्य ॥ प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणदेशे निधाय ॥ संमार्जनकुशानामग्नौ प्रक्षेपः ॥ आज्योद्वासनं चरोः पूर्वेणानीयाग्नेरुत्तरतः स्थापयेत् ॥ चरोरुद्वासनं अग्नेरुत्तरत एवमाज्यस्य प्रदक्षिणीकृत्य आज्यस्योत्तरतश्चरुं स्थापयेत् ॥ आज्योत्पवनम् ॥ आज्यावेक्षणम् ॥ सत्यपद्रव्ये तन्निरसनम् ॥ पुनः प्रोक्षण्युत्पवनम् ॥ वामहस्ते उपयमनकुशानादाय ॥ उत्तिष्ठन् समिधोभ्याधाय घृताक्तसमिधस्तिस्रः अग्नौ क्षिपेत् ॥ प्रोक्षण्युदकेन सपवित्रहस्तेन ईशानादिअग्नेः प्रदक्षिणं पर्युक्षणम् ॥ इतरथावृत्तिः ॥ पवित्रयोः प्रणीतासु निधानम् ॥ ततो देवताभिध्यानम् ॥ तद्यथा ॥ समिद्द्वयं गृहीत्वा ॥ प्रजापतिमिन्द्रं अग्निं सोमं एतामाज्येन आदित्यं सोमं भौमं बुधं बृहस्पतिं शुक्रं शनैश्चरं राहुं केतुं एता देवताः अमुकसंख्याभिः अर्कादिसमित्तिलचर्वाज्याहुतिभिरीश्वरं उमां स्कन्दं विष्णुं ब्रह्माणमित्यादि-अधिदेवता प्रत्यधिदेवताश्च अमुकसंख्याभिः समित्तिलचर्वाज्याहुतिभिः विनायकं दुर्गां वायुं आकाशं अश्विनौ क्षेत्रपालं वास्तोष्पतिं इन्द्रं अग्निं यमं निर्ऋतिं वरुणं

रु० वायुं कुबेरं ईशानं ब्रह्माणं अनन्तं यक्ष्ये ॥ शेषादिमनुष्यान्ता देवताश्च एकैकाज्याहुत्या प्र०
३८ यक्ष्ये । तैरेव द्रव्यैः प्रधानदेवता एकषष्ट्युत्तरशतधा ( १६१ ) विभागपक्षेनाहं यक्ष्ये ॥ तथा रुद्रपीठस्थदेवतापंचावरणदेवताः मूलप्रकृत्यादिपीठदेवताः ब्रह्मादिलिङ्गतोभद्रदेवताश्च एकैकाज्याहुत्या शेषेण स्विष्टकृदादि अस्मिन्कर्मण्यहं यक्ष्ये ॥ इत्यग्नौ समित्प्रक्षेपः ॥ दक्षिणजान्वाच्य ब्रह्मणान्वारब्धः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये न मम ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय न मम ॥ अथ हुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ततो द्रव्यत्यागः ॥ इमानि हवनीयद्रव्याणि या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तानि न मम ॥ यथादैवतानि सन्तु ॥

---

१ एकधा त्रेधा षोढा षोडशधा चतुश्चत्वारिंशद्धाऽष्टाचत्वारिंशद्धा एकषष्ट्युत्तरशतधा पंचविंशत्युत्तरचतुःशतधा चेति ॥ अष्टाविंशानां अन्यतमं पक्षमंगीकृत्यान्वाधानम् ॥ अत्र एकषष्ट्युत्तरशतधा मंत्रविभागपक्षेणान्वाधानमुच्यते ॥ तत्र रुद्रे प्रधानमहारुद्रं शिरोमंत्राहुतिपक्षे एकनवत्यधिकशतसंख्याकाभिः १९१ घृताक्ततिलाहुतिभिः चमकपक्षे एकाधिकशतद्वय २०१ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥ अथ रुद्र्यां शिरोमंत्राहुतिपक्षे षडुत्तरशताष्टोपेतसहस्र १८०६ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥

चमकाहुतिपक्षे षोडशाधिकशताष्टोपेतसहस्र१८१६ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥ अथ लघुरुद्रे प्रधानं महारुद्रं शिरोमंत्राहुतिपक्षे षट्षष्ट्यधिकशताष्टोपेतैकोनविंशतिसहस्र१९८६६ संख्याकाभिः घृताक्ततिलाहुतिभिः चमकाहुतिपक्षे षट्सप्तत्यधिकशतनवकोपेतैकोनविंशतिसहस्र १९९७६ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥ अथ महारुद्रे प्रधानं महारुद्रं शिरोमंत्राहुतिपक्षे षड्विंशत्यधिकशतपंचकोपेताष्टादशसहस्राधिकलक्षद्वय२१८५२६ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥ चमकाहुतिपक्षे षट्त्रिंशदधिकशतसप्तकोपेतैकोनविंशतिसहस्राधिकलक्षद्वय २१९७३६ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥ अथातिरुद्रे प्रधानं महारुद्रं शिरोमंत्राहुतिपक्षे द्विचत्वारिंशदधिकशताष्टोपेतत्रिसहस्राधिकचतुर्विंशतिलक्ष२४३८४२ संख्याकाभिर्घृताक्ततिलाहुतिभिः चमकाहुतिपक्षे त्र्यशीत्यधिकशतचतुष्टयोपेतचतुःसहस्राधिकचतुर्विंशतिलक्ष २४४४८३ संख्याकाभिः घृताक्ततिलाहुतिभिः ॥ एते पक्षाः ॥ तथा रुद्रे महारुद्रे अतिरुद्रे एता आहुतिसंख्याः ॥

स च बहुकर्तृके होमे यथाकालं प्रत्याहुतित्यागं कर्तुमशक्यत्वात् ॥ सर्वं होमद्रव्यं देवतां च मनसा ध्यात्वा त्यजेत् ॥ ततश्चैवं ॥ इदं उपकल्पितं समित्तिलादिद्रव्यं या या वक्ष्यमाणदेवतास्ताभ्यो मया परित्यक्तं न ममेति साक्षतजलं भूमौ क्षिपेत् ॥ ततो रुद्रादौ तु मृडनामेति वचनात् ॥ अग्ने नयेति मंत्रेण मृडायाग्नये नम इत्यन्तेन अग्निं सम्पूज्य ॥ अग्ने त्वमीश्वरं तेजः पावनं परमं हि तत् ॥ तस्मात्त्वदीयहृत्पद्मे श्रीरुद्रं तर्पयाम्यहम् ॥ इति प्रार्थना ॥ तत आचार्यादयः सावधाना यजमानाभीष्टसिद्धिं प्रार्थयन्तः होमं कुर्युः ततः सर्वहोमस्य ग्रहहोमपूर्वकत्वात् ॥ आदौ स्थापनोक्तमंत्रैः अन्वाधानसंख्यया ग्रहादीनां होमः कार्यः तत्पश्चाद्रुद्रहोमः ॥ तत्र भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासांश्च कृत्वा अकृत्वा



## अथ ग्रहहोमः ।



ॐकारादिस्वाहान्तपूर्वोक्तग्रहस्थापनमन्त्रेण समित्तिलचर्वाज्यद्रव्यैरष्टाष्टसंख्यैर्होमः ॥ तद्यथा ॥ ॐ आकृष्णेन० स्वाहा ॥ १ ॥ ॐ इमन्देवा० स्वाहा ॥ २ ॥ ॐ अग्निर्मूर्द्धा० स्वाहा ॥ ३ ॥ ॐ उद्बुध्यस्वाग्ने० स्वाहा ॥ ४ ॥ ॐ बृहस्पते० स्वाहा ॥ ५ ॥ ॐ अन्नात्परिस्रुतो० स्वाहा ॥ ६ ॥ ॐ शन्नोदेवी० स्वाहा ॥ ७ ॥ ॐ कयानश्चित्र० स्वाहा ॥ ८ ॥ ॐ केतुं कृण्वन्न० स्वाहा ॥ ९ ॥ ततो अधिदेवताया तैरेव द्रव्यैः चतुश्चतुराहुतीर्जुहुयात् ॥ ॐ त्र्यम्बकं० स्वाहा ॥ १ ॥ ॐ अम्बेऽअम्बिके० स्वाहा ॥ २ ॥ ॐ यदक्रन्दः प्र० स्वाहा ॥ ३ ॥ ॐ विष्णोरराट० स्वाहा ॥ ४ ॥ ॐ आब्रह्मन्० स्वाहा ॥ ५ ॥ ॐ सयोषा इन्द्र० स्वाहा ॥ ६ ॥ ॐ यमायत्वा० स्वाहा ॥ ७ ॥ ॐ कार्षिरसि० स्वाहा ॥ ८ ॥ ॐ चित्रावसो० स्वाहा ॥ ९ ॥ ततः प्रत्यधिदेवतायाः तैरेव द्रव्यैः चतुश्चतुराहुतिः पूर्वोक्ता ॥ ॐ अग्निन्दूतं० स्वाहा ॥ १ ॥ ॐ आपोहिष्ठा० स्वाहा ॥ २ ॥ ॐ स्योनापृथिवि० स्वाहा ॥ ३ ॥ ॐ इदं विष्णु० 

---

वा ॥ भूतशुद्ध्याद्यकरणे न वैगुण्यं करणे तु फलभूयस्त्वमित्याहुः ॥

स्वाहा ॥ ४ ॥ ॐ इन्द्र आसान्नेता० स्वाहा ॥ ५ ॥ अदित्यैराका० स्वाहा ॥ ६ ॥ ॐ प्रजापते० स्वाहा ॥ ७ ॥ ॐ नमोस्तु सर्पेभ्यो० स्वाहा ॥ ८ ॥ ॐ ब्रह्मयज्ञानं० स्वाहा ॥ ९ ॥ ततो विनायकादिपंचलोकपालदेवतायाः तैरेव द्रव्यैर्द्धिद्धिराहुती-र्जुहुयात् ॥ ॐ गणानान्त्वा० स्वाहा ॥ १ ॥ ॐ अम्बेऽअम्बिके० स्वाहा ॥ २ ॥ ॐ त्वायोयेते० स्वाहा ॥ ३ ॥ ॐ घृतंघृतपावान० स्वाहा ॥ ४ ॥ ॐ यावाङ्कशा० स्वाहा ॥ ५ ॥ ॐ वास्तोष्पते० स्वाहा ॥ ६ ॥ ॐ नहिस्पश० स्वाहा ॥ ७ ॥ ततो दशदि-क्पालानां तैरेव द्रव्यैरेकामेकामाहुतिं जुहुयात् ॥ ॐ त्रातारमिन्द्र० स्वाहा ॥ १ ॥ ॐ त्वन्नोऽअग्ने० स्वाहा ॥ २ ॥ ॐ यमायत्वा० स्वाहा ॥ ३ ॥ ॐ असुन्वन्तम० स्वाहा ॥ ४ ॥ ॐ तत्त्वायामि० स्वाहा ॥ ५ ॥ ॐ आनोनियुद्भिः० स्वाहा ॥ ६ ॥ ॐ वयर्ठ० सोम० स्वाहा ॥ ७ ॥ ॐ तमीशानं० स्वाहा ॥ ८ ॥ ॐ अस्मेरुद्रा० स्वाहा ॥९॥ ॐ स्योनापृथिविनो० ॥१०॥ अथ प्रधानहोमः ॥ तदङ्गत्वेन महान्यासांश्च कुर्यात् ॥ तद्यथा ॥ ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ॥ तिष्ठ देवि शिखामध्ये चामुण्डे चापराजिते ॥ इति शिखाग्रन्थिबन्धनम् ॥ ॐ पृथिवीति मन्त्रस्य मेरुपृष्ठ-

रु० ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका प्र०
७० देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ इति आसनशुद्धिः ॥ आचम्य प्राणानायम्य ॥ ॐ सद्योजातमित्यस्य सद्योजात ऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता । वामदेवेत्यस्य वामदेव ऋषिः जगती छन्दः विष्णुर्देवता । अघोरेभ्य इत्यस्य अघोर ऋषिः अनुष्टुप्छन्दः रुद्रो देवता । तत्पुरुषायेत्यस्य तत्पुरुष ऋषिः गायत्री छन्दः रुद्रो देवता । ईशान इत्यस्य ईशान ऋषिः अनुष्टुप्छन्दः रुद्रो देवता सर्वेषां भस्मपरिग्रहणे विनियोगः ॥ ॐ सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः । भवेभवेनातिभवेभवस्व मां भवोद्भवाय नमः ॥ १ ॥ ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमः बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥२॥ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपे- ७०
भ्यः ॥ ३ ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ ४ ॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे

अस्तु सदाशिवोम् ॥ ५ ॥ इति पञ्चभिर्मन्त्रैर्भस्मनः सव्यहस्ते परिग्रहणं दक्षिणेनाच्छादनम् ॥ ॐ अग्निरित्यादिभस्माभिमन्त्रणमन्त्राणां पिप्पलादऋषिर्गायत्री छन्दः कालाग्निरुद्रो देवता भस्माभिमन्त्रणे विनियोगः ॥ ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳ० ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मानि ॥ तस्माद्व्रतमेवं तत्पाशुपतं यद्भस्मनाङ्गानि संस्पृशेत्तस्माद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय ॥ इति त्रिः पठित्वा भस्माभिमन्त्रणम् ॥ ॐ आपोज्योतिरित्यस्य प्रजापति ऋषिः यजुश्छन्दः ब्रह्माग्निवायुसूर्यो देवता भस्मन्यपां सेचने विनियोगः ॥ ॐ आपो ज्योतीरसोमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ इति मन्त्रं पठित्वा जलेन सिंचेत् ॥ ॐ नमः शिवाय ॥ इति संमर्दनम् ॥ ततः सर्वाङ्गे भस्मोद्धूलनम् ॥ तद्यथा ॥ ॐ ईशानेत्यस्य ईशानऋषिः अनुष्टुप्छन्दः रुद्रो देवता शिरसि भस्मोद्धूलने विनियोगः ॥ ॐ ईशानः सर्वविद्यानाम् इति शिरसि ॥ ॐ तत्पुरुषायेत्यस्य तत्पुरुष ऋषिः गायत्री छन्दः रुद्रो देवता मुखे भस्मोद्धूलने विनियोगः॥ ॐ तत्पुरुषाय विद्महे० ॥ इति मुखे ॥ ॐ अघोरेभ्य इत्यस्य

रु० अघोरऋषिः अनुष्टुप्छन्दः रुद्रो देवता हृदये भस्मोद्धूलने विनियोगः ॥ ॐ अघोरे- प्र०
७१ भ्योथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः ॥ इति हृदये ॥ ॐ वामदेवायेत्यस्य वामदेव ऋषिः जगती छन्दः विष्णुर्देवता गुह्ये भस्मोद्धूलने विनियोगः ॥ ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रथमनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ इति गुह्ये ॥ ॐ सद्योजातमित्यस्य सद्योजातऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता पादयोर्भस्मोद्धूलने विनियोगः॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवेभवेनातिभवे भवस्व मां भवोद्भवाय नमः ॥ इति पादयोः ॥ ॐ इति मस्तकादिपादान्तम् ॥ ॐ मानस्तोक इत्यस्य कुत्स ऋषिः जगती छन्दः एको रुद्रो देवता भस्मोद्धूलने विनियोगः ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥ ॐ त्र्यम्बकमित्यस्य वशिष्ठ ऋषिः ७१
अनुष्टुप्छन्दः त्र्यम्बको रुद्रो देवता त्र्यायुषमित्यस्य नारायण ऋषिः उष्णिक् छन्दः

आशीर्देवता भस्मना त्रिपुण्ड्रधारणे विनियोगः ॥ इति स्मृत्वा ॥ यास्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजो भूर्लोकश्चात्मा क्रिया शक्तिः ऋग्वेदः प्रातःसवनं महादेवो देवता यास्य द्वितीया रेखा सा च दाक्षिणरूकारः सत्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यन्दिनं सवनं महेश्वरो देवता यास्य तृतीया रेखा सा आहवनीयो मकारस्तमो द्यौः परमात्मा देवता ज्ञानशक्तिः सामवेदस्तृतीयं सवनं शिवो देवता ॥ ॐ त्र्यम्बकं यजामहे० ॥ ॐ त्र्यायुषं जमदग्ने० ॥ इति शिरसि नेत्रयोर्वक्षसि स्कन्धयोश्च त्रिपुण्ड्रधारणम् ॥ ॐ नमः शिवायेति रुद्राक्षधारणम् ॥ अथ न्यासाः अंगुष्ठानामिकाभ्यां कार्याः ॥ ॐ तिर्यग्बिलाय चमसोर्ध्वबुध्न्याय छन्दःपुरुषाय नमः ॥ शिरसि ॥ ॐ गौतमभरद्वाजाभ्यां नमः ॥ नेत्रयोः ॥ ॐ विश्वामित्रजमदग्निभ्यां नमः मन्त्रावृत्त्या ॥ श्रोत्रयोः ॥ ॐ वशिष्ठकश्यपाभ्यां नमः मंत्रावृत्त्या ॥ नासापुटयोः ॥ ॐ अत्रये नमः ॥ वाचि ॥ ॐ गायत्र्यै छन्दसे नमः अग्नये नमः ॥ इति शिरसि ॥ ॐ उष्णिहे छन्दसे नमः सवित्रे नमः ॥ इति ग्रीवायाम् ॥ ॐ बृहत्यै छन्दसे नमः बृहस्पतये नमः ॥

रु० इत्यनूके ( पृष्ठवंशे ) ॐ बृहद्रथन्तराभ्यां नमः द्यावापृथिवीभ्यां नमः मंत्रावृत्त्या इति प्र०
७२ दक्षिणवामबाह्वोः ॥ ॐ त्रिष्टुभे छन्दसे नमः इन्द्राय नमः ॥ इत्युदरे ॥ ॐ जगत्यै छन्दसे नमः आदित्याय नमः मंत्रावृत्त्या ॥ इति श्रोण्योः ॥ ॐ अतिछन्दसे नमः प्रजापतये नमः ॥ इति लिङ्गे ॥ ॐ यज्ञायज्ञियाय छन्दसे नमः वैश्वानराय नमः ॥ इति गुदे ॥ ॐ अनुष्टुप् छन्दसे नमः विश्वेभ्यो देवेभ्यो नमः मंत्रावृत्त्या ॥ इत्यूर्व्वोः ॥ ॐ पंक्त्यै छन्दसे नमः मरुद्भ्यो नमः मंत्रावृत्त्या ॥ इति जान्वोः ॥ ॐ द्विपदायै छन्दसे नमः विष्णवे नमः मंत्रावृत्त्या ॥ इति पादयोः ॥ ॐ विच्छन्दसे नमः वायवे नमः ॥ इति प्राणेषु ॥ ॐ न्यूनाक्षराय छन्दसे नमः अद्भ्यो नमः ॥ इति मस्तकादिपादान्तम् ॥ ॐ मनोजूतिरित्यस्याङ्गिरसबृहस्पति ऋषिः यजुश्छन्दः विश्वेदेवा देवता हृदयन्यासे विनियोगः ॥ ॐ मनोजूतिर्जुषता० ॥ हृदयाय नमः ॥ ॐ अबोध्याग्निरित्यस्य बुधगविष्ठिरा ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता शिरोन्यासे
विनियोगः ॥ ॐ अबोध्यग्निः समिधाजनानां० ॥ शिरसे स्वाहा ॥ ॐ मूर्द्धानमित्यस्य ७२
भरद्वाजऋषिः त्रिष्टुप्छन्दः वैश्वानरोऽग्निर्देवता शिखान्यासे विनियोगः ॥ ॐ

मूर्द्धानन्दिवो० ॥ शिखायै वषट् ॥ ॐ मर्माणि त इत्यस्य विवस्वान्नृषिः त्रिष्टुप्छन्दः
लिङ्गोक्ता देवता कवचन्यासे विनियोगः ॥ ॐ मर्म्माणितेवर्म्मणा० ॥ कवचाय
हुम् ॥ ॐ विश्वतश्चक्षुरित्यस्य विश्वकर्म्मा भौवनऋषिः त्रिष्टुप्छन्दः विश्वकर्म्मा
देवता नेत्रन्यासे विनियोगः ॥ ॐ विश्वतश्चक्षु० ॥ नेत्रत्रयाय वौषट् ॥
ॐ मानस्तोक इत्यस्य कुत्सऋषिः जगती छन्दः एको रुद्रो देवता अस्त्रन्यासे
विनियोगः ॥ ॐ मानस्तोके० ॥ अस्त्राय फट् ॥ ॐ यातेरुद्र इत्यस्य परमेष्ठी ऋषिः
अनुष्टुप्छन्दः एको रुद्रो देवता शिखान्यासे विनियोगः ॥ यातेरुद्रशिवातनूर-
घोरा० ॥ शिखायाम् ॥ ॐ अस्मिन्महतीत्यस्य परमेष्ठी ऋषिः ॥ अनुष्टुप्छन्दः
बहवो रुद्रा देवता शिरोन्यासे विनियोगः ॥ ॐ अस्मिन्महत्यर्णवेन्तरिक्षे० ॥
शिरसि ॥ ॐ असंख्यातेत्यस्य परमेष्ठी ऋषिः अनुष्टुप्छन्दः बहवो रुद्रो देवता
ललाटन्यासे विनियोगः ॥ ॐ असंख्याता० ॥ ललाटे ॥ ॐ त्र्यम्ब-
कमित्यस्य द्वयोः क्रमेण वशिष्ठप्रजापतिऋषिः अनुष्टुप्छन्दः त्र्यम्बको देवता नेत्र-
१३ न्यासे विनियोगः ॥ ॐत्र्यम्बकं यजामहे० २ ॥ नेत्रयोः ॥ ॐमानस्तोक इति कुत्स-

रु० ऋषिः जगतीछन्दः एको रुद्रो देवता नासिकान्यासे विनियोगः ॥ ॐ मानस्तो- प्र०
७३ केतनये० ॥ नासिकायाम् ॥ ॐ अवतत्येत्यस्य परमेष्ठी ऋषिः अनुष्टुप्छन्दः एको
रुद्रो देवता मुखन्यासे विनियोगः ॥ ॐ अवतत्यधनुष्ट्वꣳ. सह० ॥ मुखे ॥ ॐ
नीलग्रीवा इति द्वयोः परमेष्ठी ऋषिः अनुष्टुप्छन्दः बहवो रुद्रा देवता कण्ठन्यासे
विनियोगः ॥ ॐ नीलग्रीवाः शितिकण्ठा० २ ॥ कण्ठे ॥ नमस्तऽआयुधायेत्यस्य
परमेष्ठी ऋषिः अनुष्टुप्छन्दःएको रुद्रो देवता प्रकोष्ठयोर्न्यासे विनियोगः॥ॐ नमस्तऽ-
आयुधायानातताय धृ० ॥ प्रकोष्ठयोः ॥ ॐ येतीर्थानीत्यस्य परमेष्ठी ऋषिः अनुष्टु-
प्छन्दः बहवो रुद्रा देवता हस्तयोर्न्यासे विनियोगः ॥ ॐ ये तीर्थानि० ॥ हस्तयोः ॥
ॐ नमो वः किरिकेभ्य इत्यस्य परमेष्ठी ऋषिः सामोष्णिक् यजुरुष्णिग्गतिछन्दांसि
बहवो रुद्रा देवता हृदयन्यासे विनियोगः ॥ ॐ नमो वः किरिकेभ्यो० ॥ हृदये ॥ ॐ
नमो हिरण्यबाहव इति परमेष्ठी ऋषिः अत्र्यैकादशाक्षराणां यजुस्त्रिष्टुप् अष्टाक्षराणां ७३
यजुरनुष्टुप् दशाक्षरस्य यजुः पंक्तिः हिरण्यबाह्वादयो मन्त्रवर्णावगता उभयतो
नमस्कारा बहवो रुद्रा देवता नाभिन्यासे विनियोगः ॥ ॐ नमोहिरण्यबाहवे० ॥

नाभौ ॥ ॐ इमा रुद्रायेति कुत्सऋषिः जगतीछन्दः एको रुद्रो देवता गुह्ये न्यासे विनियोगः ॥ ॐ इमारुद्रायतवसे० ॥ गुह्ये ॥ ॐ मानो महान्तमिति कुत्स ऋषिः जगती छन्दः एको रुद्रो देवता ऊर्वोर्न्यासे विनियोगः ॥ ॐ मानो महान्तमुत० ॥ ऊर्वोः ॥ ॐ एष त इत्यस्य प्रजापति ऋषिः सामपंक्तिर्यजुर्जगती छन्दः रुद्रो देवता जान्वोर्न्यासे विनियोगः ॥ ॐ एषते रुद्रभागः० ॥ जान्वोः ॥ ॐ अवरुद्रमित्यस्य प्रजापति ऋषिः पंक्तिश्छन्दः रुद्रो देवता जंघयोर्न्यासे विनियोगः ॥ ॐ अवरुद्रमदी-मह्यवदेवन्त्र्यम्बकं० ॥ जंघयोः ॥ ॐ अध्यवोचदिति परमेष्ठी ऋषिः पंक्तिः छन्दः एको रुद्रो देवता कवचन्यासे विनियोगः ॥ ॐ अध्यवोचदधिवक्ता० ॥ कवचं ॥ ॐ नमो बिल्मिन इत्यस्य परमेष्ठी ऋषिः षडक्षराणां यजुर्गायत्री पंचाक्षरयोर्दैवी पंक्तिः सप्ताक्षरस्य यजुरुष्णिक् इति छन्दांसि बिल्मिनादयो मंत्रवर्णावगता अन्य-तरतो नमस्कारा बहवो रुद्रा देवता उपकवचन्यासे विनियोगः ॥ ॐ नमो बिल्मि-ने च० ॥ उपकवचम् ॥ ॐ नमोस्तु नीलग्रीवायेत्यस्य परमेष्ठी ऋषिः अनुष्टुप्छन्दः एको रुद्रो देवता तृतीयनेत्रन्यासे विनियोगः ॥ ॐ नमोस्तु नीलग्रीवाय० ॥ तृतीयनेत्रम् ॥

६० ॐ प्रमुञ्चेत्यस्य परमेष्ठी ऋषिः अनुष्टुप्छन्दः एको रुद्रो देवता अस्त्रन्यासे विनि- प्र०
७४ योगः ॥ ॐ प्रमुञ्चधन्वनस्त्वमुभयो० ॥ अस्त्रम् ॥ यऽएतावन्तश्चेत्यस्य परमेष्ठी
ऋषिः अनुष्टुप्छन्दः बहवो रुद्रा देवता दिग्बन्धने विनियोगः ॥ ॐ यऽएतावन्तश्च
भूया० ॥ दिग्बंधनम् ॥ दशाक्षरमंत्रस्य प्रजापति ऋषिः विराट् छन्दः रुद्रो देवता
न्यासे विनियोगः ॥ ॐ नमो भगवते रुद्राय ॥ ॐ नमो मूर्ध्नि ॥ ॐ नं नमः शिखा-
याम् । ॐ मों नमो ललाटे ॥ ॐ भं नमः मुखे ॥ ॐ गं नमः कण्ठे ॥ ॐ वं नमः
हृदये ॥ ॐ तें नमः दक्षिणहस्ते ॥ ॐ रुं नमो वामहस्ते ॥ ॐ द्रां नमो नाभौ ॥
ॐ यं नमः पादयोः ॥ ॐ त्रातारमिन्द्रेत्यस्य गर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता
प्राच्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ त्रातारमिन्द्र० ॥ प्राच्यै
नमः ॥ त्वन्नो अग्न इत्यस्य हिरण्यस्तूपआंगिरस ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता
आग्नेय्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ त्वन्नोऽअग्ने० ॥ आग्नेय्यै
नमः ॥ ॥ ॐ सुगन्नुपन्थामित्यस्य प्रजापति ऋषिः त्रिष्टुप्छन्दः यमो देवता दक्षि- ७४
णस्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ सुगन्नुपंथां प्रति० ॥ दक्षिणायै

नमः ॥ ॐ अशुन्वन्तामित्यस्य प्रजापतिऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता नैर्ऋत्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ अशुन्वन्तमयज० ॥ निर्ऋतये नमः ॥ ॐ तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता प्रतीच्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ तत्वायामि० ॥ ॐ प्रतीच्यै नमः ॥ ॐ आनो नियुद्भिरित्यस्य वशिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायव्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ आनोनियुद्भिः ॥ वायव्यै नमः ॥ ॐ वयर्ठ सोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमो देवता उत्तरस्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ वयर्ठ. सोमव्रते० ॥ उदीच्यै नमः ॥ ॐ तमीशानमित्यस्य गौतमऋषिः जगती छन्दः ईशानो देवता ईशान्यां दिशि संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ तमीशानं ॥ ईशान्यै नमः ॥ अस्मे रुद्रा इत्यस्य प्रगर्थ ऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ऊदूर्ध्वायां संपुटीकरणे नमस्कारे च विनियोगः ॥ ॐ अस्मे रुद्रा० ॥ ऊदूर्ध्वायै नमः ॥ ॐ स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तो देवता अधः

रु० सम्पुटीकरणे नमस्कारे च विनियोगः ॥ ॐ स्योनापृथिविनो० ॥ अधरायै नमः ॥ प्र०
७५ ॐ यज्जाग्रत इति षडर्चस्य शिवसंकल्पऋषिः त्रिष्टुप्छन्दः मनो देवता हृदये न्यासे
विनियोगः ॥ ॐ यज्जाग्रतो० ॥ षट् मन्त्राः ॥ हृदयाय नमः ॥ ॐ सहस्रशीर्षेति षोड-
शर्चस्य पुरुषसूक्तस्य नारायणऋषिः आद्यानां पञ्चदशानां अनुष्टुप्छन्दः यज्ञेन यज्ञ-
मित्यस्य त्रिष्टुप्छन्दः जगद्बीजं पुरुषो देवता शिरोन्यासे विनियोगः ॥ ॐ सहस्र-
शीर्षा० साद्ध्याः सन्ति देवाः इति षोडश मन्त्राः ॥ शिरसे स्वाहा ॥ ॐ अद्भ्यः
सम्भृत इति षडर्चस्योत्तरनारायणऋषिः आद्यानां तिसृणां त्रिष्टुप्छन्दः चतुर्थपंच
मयोरनुष्टुप्छन्दः षष्ठस्य त्रिष्टुप्छन्दः आदित्यो देवता शिखान्यासे विनियागेः ॥
ॐ अद्भ्यः सम्भृतः पृथिव्यै० मुम्मऽइषाण सर्व्वलोकम्मऽइषाण इति षट् मन्त्राः ॥
शिखायै वषट् ॥ ॐ आशुः शिशान इति द्वादशानामप्रतिरथऋषिः त्रिष्टुप्छन्दः
इन्द्रो देवता कवचन्यासे विनियोगः ॥ ॐ आशुः शिशानो० सचन्ताम् ॥ इति द्वाद-
श मन्त्राः । कवचाय हुम् ॥ ॐ विभ्राडिति सप्तदशानां विभ्राट् ऋषिः जगतीछन्दः ७५
सूर्यो देवता नेत्रन्यासे विनियोगः ॥ ॐ विभ्राड्० पश्यन् ॥ १७ मन्त्राः ॥ नेत्रत्रयाय

वौषट् ॥ ॐ नमस्त इति षोडशर्चस्य परमेष्ठी ऋषिः नमस्त इत्यस्य गायत्रीछन्दः यात इति तिसृणामनुष्टुप्छन्दः अध्यवोचदिति त्रयाणां पंक्तिश्छन्दः नमोस्त्विति सप्तानां अनुष्टुप्छन्दः मान इति द्वयोः कुत्सऋषिः जगती छन्दः सर्वासां एको रुद्रो देवता अङ्गन्यासे विनियोगः ॥ ॐ नमस्ते रुद्रमन्यव० हवामहे ॥ इति १६ मन्त्राः । अस्त्राय फट् ॥ ॐ एषतेरुद्रभागः० इति योनिमुद्रांप्रदर्शनम् ॥ ॐ नमोहिरण्यबाहवेत्यादीनां श्वपतिभ्यश्चवोनम इत्यन्तानां यजुषां हिरण्यबाहुः सेनानीदिशां च पतिरित्यादि मन्त्रावगता उभयतो नमस्कारा बहवो रुद्रा देवता नमो भवाय च रुद्राय चेत्यन्तानां यजुषां भवादयो मन्त्रलिंगावगता अन्यतरतो नमस्कारा बहवो रुद्रा देवता नमऽ-इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नम इत्यस्य उभयतो नमस्कारा बहवो रुद्रा देवता नमो वः किरिकेभ्य इत्यादीनामग्निर्वायुः सूर्यो हृदयभूतव्याहृतीनामन्यतरतो नमस्कारा बहवो रुद्रा देवता द्रापे इत्यस्य उपरिष्ठाद् बृहतीछन्दः इमारुद्रायेत्यस्याः कुत्सोऽपि जगतीछन्दः यातेरुद्रेत्यस्यानुष्टुप्छन्दः परिनोरुद्रमीढुष्टमिति द्वयोः त्रिष्टुप्छन्दः विकिरिद्रसहस्राणि इति द्वयोरनुष्टुप्छन्दः सप्तानां एको रुद्रो देवता असंख्याते-




त्यादीनां दशानां अनुष्टुप्छन्दः बहवो रुद्रा देवता नमोस्तु रुद्रेभ्य इत्यादित्रयाणां यजुषां धृतिश्च छन्दः बहवो रुद्रा देवता महारुद्रप्रीत्यर्थं होमे विनियोगः ॥ ॐ वयर्ठ० सोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमो देवता एषत इत्यनयोः प्रजापति-ऋषिः सामपंक्तिर्यजुर्जगतीछन्दांसि रुद्रो देवता अवरुद्रमित्यस्य प्रजापतिर्ऋषिः सामपंक्तिश्छन्दः रुद्रो देवता भेषजमित्यस्य प्रजापतिर्ऋषिः ककुप्छन्दः रुद्रो देवता त्र्यम्बकमित्यनयोः क्रमेण वशिष्ठप्रजापतिर्ऋषिः अनुष्टुप्छन्दः त्र्यम्बको देवता एषत इत्यस्य प्रजापतिर्ऋषिः आस्तारपंक्तिश्छन्दः रुद्रो देवता त्र्यायुषमित्यस्य नारायण-ऋषिः उष्णिक् छन्दः आशीर्देवता शिवो नामेत्यस्य प्रजापतिर्ऋषिः प्राजापत्या बृहतीछन्दः क्षुरो देवता निवर्तयामेत्यस्य प्रजापतिर्ऋषिः प्राजापत्या त्रिष्टुप्छन्दः लिङ्गोक्ता देवता महारुद्रप्रीतये पाठे विनियोगः ॥ उग्रश्च मेत्यस्य प्रजापतिऋषिः गायत्रीछन्दः मरुतो देवता अग्निर्ठ० हृदयेनेत्यादीनां यजुषां प्रजापतिर्ऋषिः लि-ङ्गोक्ता देवता आयासायेत्यादीनां प्रजापतिर्ऋषिः गायत्रीछन्दः लिङ्गोक्ता देवता पाठे विनियोगः ॥ वाजश्च म इत्यादीनां वेदस्वाहेत्यन्तानां देवता ऋषिः गायत्रीछन्दः

अग्निर्देवता पाठे विनियोगः ॥ ऋचम्वाचमिति चतुर्विंशतिमन्त्राणां प्रजापतिर्ऋषिः
गायत्रीछन्दः विष्णुर्देवता शान्त्यर्थहोमे विनियोगः ॥

## अथ ध्यानम् ।

शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकम् ॥ गंगाधरं दशभुजं सर्वाभरणभूषि-
तम् ॥ १ ॥ नीलग्रीवं शशांकाङ्कं नागयज्ञोपवीतिनम् ॥ व्याघ्रचर्मोत्तरीयं च वरेण्य-
मभयप्रदम् ॥ २ ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ॥ ज्वलन्तं पिङ्गल-
जटाजूटमुद्योतकारिणम् ॥ ३ ॥ अमृतेन युतं हृष्टमुमादेहार्धधारिणम् ॥ दिव्यसिं-
हासनासीनं दिव्यभोगसमन्वितम् ॥ ४ ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ॥
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ ५ ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपि-
णम् ॥ एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥ ६ ॥ इति देवो भूत्वा
देवं यजेत् ॥

## अथ एकषष्ठ्युत्तरशतधा मन्त्रविभागपक्षेण होमः ।

ॐ यज्जाग्रतोदूरमुदैति० ॥ १ ॥ येनकर्माण्य० ॥ २ ॥ यत्प्रज्ञान० ॥ ३ ॥ येने-

रु० दम्भूतं० ॥ ४ ॥ यस्मिन्नृचः० ॥ ५ ॥ सुषारथिरश्वानिवयं० शिवसङ्कल्पमस्तु स्वाहा प्र०
७७ ॥ ६ ॥ ॐ सहस्रशीर्षा० ॥ १ ॥ पुरुषऽएवेदं० ॥ २ ॥ एतावानस्य० ॥ ३ ॥
त्रिपादूर्द्ध० ॥ ४ ॥ ततोव्विराड्० ॥ ५ ॥ तस्माद्यज्ञात्सर्व्वहुतः ॥ ६ ॥ ॐ तस्मा-
द्यज्ञात्सर्व्वहुतऋचः ॥ ७ ॥ तस्मादश्वा० ॥ ८ ॥ तं यज्ञं बर्हिषि० ॥ ९ ॥ यत्पुरुषं
व्यदधुः० ॥ १० ॥ ब्राह्मणोस्यमुख० ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोः० ॥ १२ ॥
नाभ्याऽआसीदन्त० ॥ १३ ॥ यत्पुरुषेणहविषा० ॥ १४ ॥ सप्तास्यासन्परि० ॥ १५ ॥
यज्ञेनयज्ञमय० देवाः स्वाहा ॥ १६ ॥ २ ॥ ॐ अद्भ्यः सम्भृतः० ॥ १ ॥ वेदाहमे-
तम्पुरुषं० ॥ २ ॥ प्रजापतिश्चरतिगर्भे० ॥ ३ ॥ योदेवेभ्यऽआतपति० ॥ ४ ॥ रुच-
म्ब्राह्मं जनयन्तो० ॥ ५ ॥ श्रीश्चतेलक्ष्मीश्च० लोकम्मऽइषाणस्वाहा ॥ ६ ॥ ३ ॥
ॐ आशुः शिशानोवृष० ॥ १ ॥ सङ्क्रन्दनेनानिमिषेण० ॥ २ ॥ सऽइषुहस्तैः सनिषं०
॥ ३ ॥ बृहस्पतेपरि० ॥ ४ ॥ बलविज्ञायस्थविरः० ॥ ५ ॥ गोत्रभिदं गोविदं० ॥ ६ ॥
अभिगोत्राणि सहसा० ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पति० ॥ ८ ॥ इन्द्रस्यवृष्णो० ॥ ९ ॥ ७७
उद्धर्षयमघव० ॥ १० ॥ अस्माकमिन्द्रः समृते० ॥ ११ ॥ अमीषाञ्चित्तं० सचन्तां

स्वाहा ॥ १२ ॥ ४ ॥ ॐ विभ्राड्बृहत्पिबतु० ॥ १ ॥ उदुत्यञ्जातवेदसं० ॥ २ ॥
येनापावकचक्षसा० ॥ ३ ॥ दैव्यावध्वर्यूऽआ० ॥ ४ ॥ तम्प्रत्नथापूर्वथा० ॥ ५ ॥
अयंव्वेनश्चोदय० ॥ ६ ॥ चित्रन्देवानामुदगा० ॥ ७ ॥ आनऽइडाभि० ॥ ८ ॥
यदद्यकच्च० ॥ ९ ॥ तरणिर्व्विश्श्वदर्शतो० ॥ १० ॥ तत्सूर्यस्य देव० ॥ ११ ॥ तन्मि-
त्रस्य० ॥ १२ ॥ बण्महाँऽअसि० ॥१३॥ बटसूर्य्यश्रवसामहाँ० ॥ १४ ॥ आयन्तऽइव-
सूर्यं० ॥१५॥ अद्यादेवाउदिता० ॥ १६ ॥ आकृष्णेनरजसा० पश्यन् स्वाहा ॥१७॥ ५ ॥
ॐ नमस्ते रुद्र मन्न्यवऽउतोतऽइषवेनमः ॥ बाहुब्भ्यामुत ते नमः स्वाहा ॥ १ ॥
ॐ यातेरुद्रशिवातनूरघोरा पापकाशिनी ॥ तयानस्तन्न्वासन्त मयागिरिशन्ताभि-
चाकशीहि स्वाहा ॥ २ ॥ यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रता-
ङ्कुरुमाहिंᳪसीः पुरुषञ्जगत् स्वाहा ॥ ३ ॥ ॐ शिवेनव्वचसात्वा गिरिशाच्छा
व्वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्मᳪसुमनाऽअसत् स्वाहा ॥ ४ ॥ ॐ अद्ध्यवो-
चदधिवक्ता प्रथमो दैव्योभिषक् ॥ अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्न्यो-
धराचीः परा सुव स्वाहा ॥ ५ ॥ ॐ असौयस्ताम्रोऽअरुणऽउतबभ्रुः सुमङ्गलः ॥

रु० ॐ येचैनᳪरुद्राऽअभितोदिक्षुश्रिताः सहस्रशो वैषाᳪहेडऽईमहे स्वाहा ॥ ६ ॥ प्र०
ॐ असौयोवसर्प्पतिनीलग्ग्रीवोव्विलोहितः ॥ उतैनङ्गोपाऽअदृशन्नदृश्रन्नुदहार्य्यः
७८ सदृष्टो मृडयातिनः स्वाहा ॥ ७ ॥ ॐ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथो-
येऽअस्यसत्वानोहन्तेब्भ्योकरन्नमः स्वाहा ॥ ८ ॥ ॐ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्यो-
र्ज्याम् ॥ याश्चतेहस्तऽइषवः पराताभगवोव्वप स्वाहा ॥ ९ ॥ ॐ विज्ज्यन्धनुः
कपर्द्दिनोव्विशल्ल्योबाणवाँ२उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः स्वाहा
॥ १० ॥ ॐ यातेहेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्श्वतस्त्वमयक्ष्मया
परिभुज स्वाहा ॥ ११ ॥ परितेधन्न्वनोहेतिरस्म्मान्न्वृणक्तुव्विश्वतः ॥ अथोयऽइषु-
धिस्तवारेऽअस्मन्निधेहितम् स्वाहा ॥१२॥ ॐ अवतत्यधनुष्ट्वᳪसहस्राक्षशतेषुधे ॥
निशीर्य्यशल्ल्यानामुखाशिवोनः सुमनाभव स्वाहा ॥ १३ ॥ ॐ नमस्तऽआयुधाया-
नाततायधृष्णवे ॥ उभाब्भ्यामुततेनमो बाहुब्भ्यान्तवधन्न्वने स्वाहा ॥ १४ ॥ ॐ मा-
नोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोव्वधीः पितर- ७८
म्मोतमातरम्मानः प्प्रियास्तन्न्वोरुद्ररीरिषः स्वाहा ॥ १५ ॥ ॐ मानस्तोकेतनये-

मानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरानुद्रभामिनोव्वधीर्हवि-
ष्मन्तः सदमित्वाहवामहे स्वाहा ॥ १६ ॥ ॐ नमो हिरण्यबाहवे सेनान्ये दिशाञ्च

(अथ रुद्राष्टाध्यायस्याष्टभिः प्रकारैर्मन्त्रविभागः १)

तत्र एकधा मन्त्रविभागपक्षः प्रथमः ॥ ॐ नमस्ते रुद्रमन्यव इत्यारभ्य तमेषां जम्भे दध्मः स्वाहा ॥१॥

(अथ त्रेधा मन्त्रविभागपक्षः द्वितीयः २)

ॐ नमस्ते रुद्रमन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा । इतिषड्विंशतिमन्त्राणामेकाहुतिः ॥ १ ॥
ॐ नमस्तक्षभ्यः इत्यारभ्य सुधन्वने च स्वाहा ॥ इति दशमंत्राणामेकाहुतिः ॥ २ ॥
ॐ नमः स्रुत्यायेत्यारभ्य तमेषाञ्जम्भे दध्मः स्वाहा ॥ इति त्रिशन्मन्त्राणामेकाहुतिः ॥ ३ ॥

(अथ षोढा मन्त्रविभागपक्षः तृतीयः ३)

ॐ नमस्ते रुद्रमन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ॥ इति षड्विंशतिमन्त्राणामेकाहुतिः ॥ १ ॥
ॐ नमस्तक्षभ्यः सुधन्वने च स्वाहा ॥ इति दशमन्त्राणामेकाहुतिः ॥ २ ॥
ॐ नमः स्रुत्यायेत्यारभ्य यऽएतावन्तश्च० मसि स्वाहा ॥ इति सप्तविंशतिमन्त्राणामेकाहुतिः ॥ ३ ॥
ॐ नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः तेभ्यो दश प्राची० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ४ ॥
ॐ नमोस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वातऽइषवः तेभ्यो० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ५ ॥
१४ ॐ नमोस्तु रुद्रेभ्यो ये पृथिव्यां येषा मन्नमिषवः तेभ्यो दश प्राची० तमेषां जम्भे दध्मः स्वाहा ॥ ६ ॥

६० पतये नमः स्वाहा ॥ १७ ॥ ॐ नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमः स्वाहा प्र०
७९ ॥ १८ ॥ ॐ नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमः स्वाहा ॥ १९ ॥ ॐ

(अथ षोडशधा मंत्रविभागपक्षः चतुर्थः ४)

ॐ नमस्ते रुद्रमन्यव इत्यारभ्य अर्भकेभ्यश्च वो नमः स्वाहा ॥ इति षड्विंशतिमंत्राणामेकाहुतिः ॥ १ ॥
ॐ नमस्तक्षभ्य इत्यारभ्य सुधन्वने च स्वाहा ॥ इति दशमंत्राणामेकाहुतिः ॥ २ ॥
ॐ नमः स्रुत्यायेत्यारभ्य पराचीनाम्मुखाकृधि इति सप्तदशमंत्राणामेकाहुतिः ॥ ३ ॥
ॐ असंख्याता सहस्राणि ये रुद्राऽअधिभूम्याम् ॥ तेषाᳫं सहस्रयोजनेवधन्वानितन्मसि स्वाहा ॥४॥
ॐ अस्मिन्म्महत्यर्णवेन्तरिक्षेभवाऽअधि । तेषाᳫं सहस्रयोजनेवधन्न्वानितन्म्मसि स्वाहा ॥ ५ ॥
ॐ नीलग्रीवाः शितिकण्ठा दिवर्ठ० रुद्राऽउपश्रिताः ॥ तेषाᳫंसहस्रयोजनेवधन्वानितन्मसि स्वाहा ॥६॥
ॐ नीलग्रीवाः शितिकण्ठाः शर्व्वाऽअधः क्षमाचराः ॥ तेषाᳫंसहस्रयोजनेवधन्न्वानितन्मसि स्वाहा ॥७॥
ॐ येवृक्षेषुशष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः ॥ तेषाᳫंसहस्रयोजनेवधन्न्वानितन्म्मसि स्वाहा ॥८॥
ॐ येभूतानामधिपतयोव्विशिखासः कपर्द्दिनः ॥ तेषाᳫंसहस्रयोजनेवधन्न्वानितन्म्मसि स्वाहा ॥९॥
ॐ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्य्युधः ॥ तेषाᳫं सहस्रयोजनेवधन्न्वानितन्म्मसि स्वाहा ॥१०॥ ७९
ॐ येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाᳫंसहस्रयोजनेवधन्न्वानितन्म्मसि स्वाहा ॥ ११ ॥
ॐ येन्नेषुव्विविद्धयन्तिपात्रेषुपिबतोजनान् ॥ तेषाᳫंसहस्रयोजनेवधन्न्वानितन्म्मसि स्वाहा ॥१२॥

नमोहरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा ॥ २० ॥ ॐ नमोबभ्लुशायव्व्याधिनेन्नानाम्पतये नमः स्वाहा ॥ २१ ॥ ॐ नमोभवस्यहेत्यैजगताम्पतये नमः स्वाहा ॥ २२ ॥ ॐ नमोरुद्रायाततायिने क्षेत्राणां पतये नमः स्वाहा ॥ २३ ॥ ॐ नमः सूतायाहन्त्यै वनानाम्पतये नमः स्वाहा ॥ २४ ॥ ॐ नमो रोहिताय

ॐ यऽएतावन्तश्चभूयाᳪं सश्चदिशोरुद्राव्वितस्थिरे ॥ तेषाᳪं सहस्रयोजनेवधन्न्वानितन्मसि स्वाहा ॥ १३ ॥ ॐ नमोस्तुरुद्रेभ्योयेदिवियेषांव्वर्षमिषवः ॥ तेभ्योदशप्राची० ॥ तेभ्योनमोऽअस्तुतेनोवन्तु० स्वाहा ॥ १४ ॥ ॐ नमोस्तुरुद्रेभ्योयेन्तरिक्षेयेषांव्वातऽइषवः ॥ तेभ्योदशप्राचीर्दश० ॥ तेभ्योनमोऽस्तुतेनोवन्तुतेनो० स्वाहा ॥ १५ ॥ ॐ नमोस्तुरुद्रेभ्योयेपृथिव्व्यांयेषामन्नमिषवः ॥ तेभ्योदशप्राचीर्दश० ॥ तेभ्योनमोऽस्तुतेनोवन्तु० स्वाहा ॥ १६ ॥

( अथ चतुश्चत्वारिंशन्मंत्रविभागपक्षः )

ॐ नमस्ते रुद्रमन्यव० मुततेनमः स्वाहा ॥ १ ॥ ॐ यातेरुद्रशिवा० भिचाकशीहिस्वाहा ॥ २ ॥ यामिषुङ्गिरिशन्त० पुरुषञ्जगत्स्वाहा ॥ ३ ॥ ॐ शिवेनव्वचसा० सुमनाऽअसत् स्वाहा ॥ ४ ॥ ॐ अद्ध्यवोचदधिवक्ता० परासुवस्वाहा ॥ ५ ॥ ॐ असौयस्ताम्रो० ईमहेस्वाहा ॥ ६ ॥ ॐ असौयोवसर्पति० उतैनंगोपा० मृडयातिनः स्वाहा ॥ ७ ॥ ॐ नमोस्तुनीलग्रीवायसहस्राक्षाय० करन्नमः स्वाहा ॥ ८ ॥ ॐ प्रमुञ्चधन्न्वनस्त्वमुभयो० भगवोव्वपस्वाहा ॥ ९ ॥ ॐ विज्ज्यन्धनुः कपर्दिनो० निषङ्गधिः

रु० स्थपतये वृक्षाणाम्पतये नमः स्वाहा ॥ २५ ॥ ॐ नमो भुवन्तयेव्वारिवस्कृता- प्र०
८० यौषधीनाम्पतये नमः स्वाहा ॥ २६ ॥ ॐ नमोमन्त्रिणेव्वाणिजाय कक्षाणाम्पतये नमः स्वाहा ॥ २७ ॥ ॐ नमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनाम्पतये नमः स्वाहा ॥ २८ ॥ ॐ नमः कृत्स्नायतयाधावतेसत्वनाम्पतये नमः स्वाहा ॥ २९ ॥

स्वाहा ॥ १० ॥ ॐ यातेहेतिर्मीढुस्तमहस्ते० परिभुजस्वाहा ॥ ११ ॥ ॐ परितेधन्न्वनोहेति० निधेहिस्वाहा ॥ १२ ॥ ॐ अवतत्यधनुष्ट्वᳪं सहस्राक्ष० सुमनाभवस्वाहा ॥ १३ ॥ ॐ नमस्तऽआयुधाया० धन्न्वनेस्वाहा ॥ १४ ॥ ॐ मानोमहान्त० रीरिषः स्वाहा ॥ १५ ॥ ॐ मानस्तोके० हवामहेस्वाहा ॥ १६ ॥ ॐ नमोहिरण्यबाहवे० ॥ ॐ नमोबभ्लुशाय० ॥ ॐ नमोरोहिताय० ॥ ॐ नमः कृत्स्नायतया० ॥ ॐ नमोधन्वते विकृन्तानाम्पतये नमः स्वाहा ॥ इति पंचमंत्राणामेकाहुतिः ॥ १७ ॥ ॐ नमऽउष्णीषिणे० ॥ ॐ नमोव्विसृजद्भ्यो० ॥ ॐ नमः सभाभ्यः ॥ ॐ नमोगणेभ्यो० ॥ ॐ नमः सेनाभ्यः अर्भकेभ्यश्चवोनमः स्वाहा ॥ इति पंचमंत्राणामेकाहुतिः ॥ १८ ॥ ॐ नमस्तक्षभ्यो० ॥ ॐ नमः श्वभ्यः ॥ ॐ नमः कपर्दिने० ॥ ॐ नमो ह्रस्वाय० ॥ ओं नमऽआशवे० द्वीप्यायचस्वाहा ॥ इति पंचमंत्राणामेकाहुतिः ॥ १९ ॥ ॐ नमोज्ज्येष्ठाय० ॥ ॐ नमः सोभ्याय० ॥ ॐ नमोवन्न्याय० ॥ ॐ नमोबिल्मिने० ॥ ॐ नमोधृष्णवे० ८०
सुधन्न्वनेच स्वाहा ॥ इति पंचमंत्राणामेकाहुतिः ॥ २० ॥ ॐ नमः स्रुत्याय० ॥ ॐ नमः कूप्याय० ॥ ॐ नमोव्वात्याय० ॥ ॐ नमः शङ्गवे० नमस्ताराय स्वाहा ॥ इति मंत्रचतुष्टयस्यैकाहुतिः ॥ २१ ॥ ॐ नमः

ॐ नमः सहमानायनिव्व्याधिनऽआव्व्याधिनीनाम्पतये नमः स्वाहा ॥ ३० ॥ ॐ नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमः स्वाहा ॥ ३१ ॥ ॐ नमो निचेरवे परिचरायारण्यानाम्पतये नमः स्वाहा ॥ ३२ ॥ ॐ नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमः स्वाहा ॥ ३३ ॥ ॐ नमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमः

---

शम्भवाय० शिवतराय च स्वाहा ॥ २२ ॥ ॐ नमः पार्य्याय० ॥ ॐ नमः सिकत्याय० ॥ ॐ नमोब्व्रज्याय० ॥ ॐ नमः शुष्क्याय० ॥ ॐ नमः पर्णाय० आनिर्हतेभ्यः स्वाहा ॥ इति पंचमंत्राणामेकाहुतिः ॥२३॥ ॐ नमो वः किरिकेभ्यो देवानार्ठ. हृदयेभ्यो नमो विचिन्न्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः स्वाहा ॥ २४ ॥ ॐ द्रापेऽअन्धसस्पते० किञ्चनाममत् स्वाहा ॥ २५ ॥ ॐ इमारुद्रायतवसे० अस्मिन्ननातुरम् स्वाहा ॥ २६ ॥ ॐ यातेरुद्रशिवातनूः शिवा० मृडजीवसे स्वाहा ॥ २७ ॥ ॐ परिनोरुद्रस्य० तनयायमृडस्वाहा ॥ २८ ॥ ॐ मीढुष्टमशिवतम० विभ्रदागहिस्वाहा ॥ २९ ॥ ॐ विकिरिद्रविलोहित० पन्तुताः स्वाहा ॥ ३० ॥ ॐ सहस्राणिसहस्रशः० मुखाकृधिस्वाहा ॥ ३१ ॥ ॐ असंख्यातासहस्राणि० नितन्मसिस्वाहा ॥ ३२ ॥ ॐ अस्मिन्महत्यर्णवे० नितन्मसिस्वाहा ॥३३॥ ॐ नीलग्रीवाः शितिकण्ठादिवर्ठ. रुद्रा० नितन्मसिस्वाहा ॥ ३४ ॥ ॐ नीलग्रीवाः शितिकण्ठाः शर्व्वाऽअधः० नितन्मसिस्वाहा ॥३५॥ ॐ येव्वृक्षेषु० नितन्मसिस्वाहा॥३६॥ ॐ येभूतानामधिपतयो० नितन्मसिस्वाहा ॥३७॥ ॐ येपथाम्पथिरक्षऽऐ० नितन्मसिस्वाहा ॥ ३८ ॥ ॐ येतीर्थानि० नितन्मसिस्वाहा ॥ ३९ ॥ ॐ

---

रु० स्वाहा ॥ ३४ ॥ ॐ नमः सृकायिब्भ्योजिघाᳬंसद्भ्यो मुष्णताम्पतये नमः स्वाहा प्र०
८१ ॥ ३५ ॥ ॐ नमोसिमद्भ्योनक्तञ्चरद्भ्योव्विकृन्तानाम्पतये नमः स्वाहा ॥ ३६ ॥ ॐ नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमः स्वाहा ॥ ३७ ॥ ॐ नमऽइषुमद्भ्यो धन्वायिब्भ्यश्च वो नमः स्वाहा ॥ ३८ ॥ ॐ नमऽआतन्न्वानेब्भ्यः प्रति-

---

येन्नेषु० नितन्मसिस्वाहा ॥ ४० ॥ ॐ यऽएतावन्तश्च० नितन्मसिस्वाहा ॥ ४१ ॥ ॐ नमोस्तुरुद्रेभ्योयेदिवि० जम्भेदध्मः स्वाहा ॥ ४२ ॥ ॐ नमोस्तुरुद्रेभ्योयेन्तरिक्षे० जम्भेदध्मः स्वाहा ॥ ४३ ॥ ॐ नमोस्तुरुद्रेभ्योयेपृथिव्यां० जम्भेदध्मः स्वाहा ॥ ४४ ॥

( अथाष्टचत्वारिंशन्मन्त्रविभागपक्षः षष्ठः )

ॐ नमस्ते रुद्रमन्यव० ते नमः स्वाहा ॥ १ ॥ ॐ यातेरुद्रशिवा० भिचाकशीहि स्वाहा ॥ २ ॥ ॐ यामिषुङ्गिरिशन्त० पुरुषं जगत्स्वाहा ॥ ३ ॥ ॐ शिवेनव्वचसात्वागिरिशाच्छा० सुमनाऽअसत्स्वाहा ॥ ४ ॥ ॐ अध्यवोचदधिवक्ता० परासुव स्वाहा ॥ ५ ॥ ॐ असौयस्ताम्रोऽअरुणऽउत० हेडऽईमहे स्वाहा ॥६॥ ॐ असौयोवसर्प्पतिनील० तिनः स्वाहा ॥७॥ ॐ नमोस्तु नीलग्रीवाय सहस्राक्षायमीढुषे० करन्नमः स्वाहा ॥ ८ ॥ ॐ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्यां० भगवोव्वपस्वाहा ॥ ९ ॥ ॐ विज्ज्यन्धनुः कपर्दिनो० निषङ्गधिः स्वाहा ॥ १० ॥ ॐ यातेहेतिर्मीढुष्टमहस्ते० परिभुज स्वाहा ॥ ११ ॥ ॐ परितेधन्न्वनोहेतिरस्मान्न्वृणक्तु० न्निधेहितं स्वाहा ॥ १२ ॥ ॐ अवतत्यधनुष्ट्वर्ठ० सहस्राक्षशते० सुमनाभव स्वाहा ॥१३॥ ८१

दधानेभ्यश्च वो नमः स्वाहा ॥ ३९ ॥ ॐ नमऽआयच्छद्भ्योस्यद्भ्यश्च वो नमः स्वाहा ॥ ४० ॥ ॐ नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमः स्वाहा ॥ ४१ ॥ ॐ नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः स्वाहा ॥ ४२ ॥ ॐ नमः शयानेभ्यऽआसीनेभ्यश्च वो नमः स्वाहा ॥ ४३ ॥ ॐ नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः स्वाहा ॥ ४४ ॥

---

ॐ नमस्तऽआयुधायाना० तवधन्वने स्वाहा ॥ १४ ॥ ॐ मानोमहान्त० रुद्रीरिषः स्वाहा ॥१५॥ ॐ मानस्तोकेतनयेमानऽआयुषि० सदमित्वाहवामहे स्वाहा ॥१६॥ ॐ नमो हिरण्यबाहवे० ॥ ॐ नमो बभ्लुशाय० ॥ ॐ नमो रोहिताय० ॥ ॐ नमः कृत्स्नायतया० ॥ ॐ नमोवञ्चतेपरिवञ्चते० स्पतये नमः स्वाहा ॥ इति पञ्चभिर्मन्त्राणामेकाहुतिः ॥१७॥ ॐ नमऽउष्णीषिणे गिरिचराय० ॥ ॐ नमोव्विसृजद्भ्योविध्यद्भ्यश्च० ॥ ॐ नमः सभाभ्यः सभा० ॥ ॐ नमो गणेभ्यो गणपति० ॥ ॐ नमः सेनाभ्यः सेनानिभ्यश्च० अर्भकेभ्यश्च वो नमः स्वाहा ॥ इति पंचमन्त्राणामेकाहुतिः ॥ १८ ॥ ॐ नमस्तक्षभ्यो रथकारे० ॥ ॐ नमः श्वभ्यः श्वपति० ॥ ॐ नमः कपर्दिने च व्युप्तकेशाय० ॥ ॐ नमो ह्रस्वाय च वामनाय०॥ ॐ नमऽआशवे चाजिराय च० द्वीप्याय च स्वाहा ॥ इति पंचमन्त्राणामेकाहुतिः ॥ १९ ॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय० ॥ ॐ नमः सोभ्याय च प्रतिसर्य्याय च० ॥ ॐ नमो वन्याय च कक्ष्याय च० ॥ ॐ नमो विल्मिने च कवचिने० ॥ ॐ नमो धृष्णवे च प्रमृशाय च० सुधन्वने च स्वाहा ॥ इति पंचमन्त्राणामेकाहुतिः ॥ २० ॥ ॐ नमः स्रुत्याय च पथ्याय च० ॥ ॐ नमः कूप्याय चावट्याय च० ॥ ॐ नमो वात्याय च रेष्म्याय च० ॥

---

रु० ॐ नमः सभाभ्यः सभापतिभ्यश्च वो नमः स्वाहा ॥ ४५ ॥ ॐ नमोऽश्वेभ्योश्वपति- प्र०
८२ भ्यश्च वो नमः स्वाहा ॥ ४६ ॥ ॐ नमऽआव्याधिनीभ्यो व्विविध्यन्तीभ्यश्च वो
नमः स्वाहा ॥ ४७ ॥ नमऽउगणाभ्यस्तृꣳहतीभ्यश्च वो नमः स्वाहा ॥ ४८ ॥
ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमः स्वाहा ॥ ४९ ॥ ॐ नमो व्रातेभ्यो व्रात-

---

ॐ नमः शङ्गवे च पशुपतये च० हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय स्वाहा ॥ इति चतुर्मन्त्राणामेकाहुतिः ॥ २१ ॥ ॐ नमः शम्भवाय० शिवतराय च स्वाहा ॥ २२ ॥ ॐ नमः पार्य्याय च वार्य्याय च० ॥ ॐ नमः सिकत्याय प्रवाह्याय च० ॥ ॐ नमो व्रज्याय च गोष्ठ्याय च० ॥ ॐ नमः शुष्क्याय च हरित्याय च० ॥ नमः पर्णाय च पर्णशदाय च० धनुष्कृद्भ्यश्च वो नमः स्वाहा ॥२३॥ ॐ नमो वः किरिकेभ्यः स्वाहा ॥ २४ ॥ ॐ देवानाꣳ० हृदयेभ्यः स्वाहा ॥ २५ ॥ ॐ नमो विचिन्वत्केभ्यः स्वाहा ॥ २६ ॥ ॐ नमो विक्षिणत्केभ्यः स्वाहा ॥ २७ ॥ ॐ नमऽआनिर्हतेभ्यः स्वाहा ॥ २८ ॥ ॐ द्रापेअन्ध० किंचनाममत् स्वाहा ॥ २९ ॥ ॐ इमारुद्रायतवसे० अस्मिन्ननातुरम् स्वाहा ॥ ३० ॥ ॐ यातेरुद्रशिवा० मृडजीवसे स्वाहा ॥ ३१ ॥ ॐ परिनोरुद्रस्य० तनयायमृड स्वाहा ॥ ३२ ॥ ॐ मीढुष्टमशिवतमशिवो नः
विभ्रदागहि स्वाहा ॥ ३३ ॥ ॐ विकिरिद्र० विवपन्तु ताः स्वाहा ॥ ३४ ॥ ॐ सहस्राणि सहस्र० ८२
मुखाकृधि स्वाहा ॥ ३५ ॥ ॐ असंख्याता० धन्वानितन्मसि स्वाहा ॥ ३६ ॥ ॐ अस्मिन्महत्यर्णवेन्तरिक्षे० नितन्मसि स्वाहा ॥ ३७ ॥ ॐ नीलग्रीवाः शितिकण्ठा० नितन्मसि स्वाहा ॥ ३८ ॥ ॐ नीलग्रीवाः

पतिभ्यश्च वो नमः स्वाहा ॥ ५० ॥ ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः स्वाहा ॥ ५१ ॥ ॐ नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः स्वाहा ॥ ५२ ॥ ॐ नमः सेनाभ्यः सेनानीभ्यश्च वो नमः स्वाहा ॥ ५३ ॥ ॐ नमो रथिभ्योऽरथेभ्यश्च वो नमः स्वाहा ॥ ५४ ॥ ॐ नमः क्षत्तृभ्यः संग्रहितृभ्यश्च वो नमः स्वाहा ॥ ५५ ॥

---

शितिकण्ठाः० नितन्म्मसि स्वाहा ॥ ३९ ॥ ॐ ये वृक्षेषु शष्पिञ्जराः० नितन्मसि स्वाहा ॥ ४० ॥ ॐ ये भूतानामधिपतयो० नितन्म्मसि स्वाहा ॥ ४१ ॥ ॐ ये पथाम्पथि० जनेघधन्म्वानितन्म्मसि स्वाहा ॥ ४२॥ ॐ ये तीर्थानि प्रचरन्ति० नितन्म्मसि स्वाहा ॥ ४३ ॥ ॐ येन्नेषु विविध्यन्ति० नितन्म्मसि स्वाहा ॥ ४४ ॥ ॐ यऽएतावन्तश्च भूयाᳩँसश्च० नितन्म्मसि स्वाहा ॥ ४५ ॥ ॐ नमोस्तु रुद्रेभ्यो ये दिवि० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ४६ ॥ ॐ नमोस्तु रुद्रेभ्यो येन्तरिक्षे० तमेषाञ्जम्भे दध्मः स्वाहा ॥ ४७ ॥ नमोस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्न० तमेषां जम्भे दध्मः स्वाहा० ॥ ४८ ॥

( अथ पञ्चविंशत्युत्तरचतुःशतधा मंत्रविभागपक्षः अष्टमः स्वाहाकारः )

ॐ नमस्ते रुद्रमन्यवे स्वाहा ॥ १ ॥ ॐ उतोतऽइषवे नमः स्वाहा ॥ २ ॥ ॐ बाहुभ्यामुत ते नमः स्वाहा ॥ ३ ॥ ॐ या ते रुद्र शिवा तनूः स्वाहा ॥ ४ ॥ ॐ अघोरा पापकाशिनी स्वाहा ॥ ५ ॥ ॐ तया नस्तन्न्वा शन्तमया स्वाहा ॥ ६ ॥ ॐ गिरिशन्ताभिचाकशीहि स्वाहा ॥ ७ ॥ ॐ यामिषुङ्गिरिशन्त स्वाहा ॥ ८ ॥ ॐ हस्ते विभर्ष्यस्तवे स्वाहा ॥ ९ ॥ ॐ शिवाङ्गिरित्रताङ्कुरु स्वाहा ॥ १० ॥ ॐ माहिᳩँसीः

---

रु० ॐ नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः स्वाहा ॥ ५६ ॥ ॐ नमस्तक्षभ्यो रथ- प्र०

८३ कारेभ्यश्च वो नमः स्वाहा ॥ ५७ ॥ ॐ नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः स्वाहा ॥ ५८ ॥ ॐ नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमः स्वाहा ॥ ५९ ॥ ॐ नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः स्वाहा ॥ ६० ॥ ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो

---

पुरुषञ्जगत् स्वाहा ॥ ११ ॥ ॐ शिवेनव्वचसात्वा स्वाहा ॥ १२ ॥ ॐ गिरिशाच्छाव्वदामसि स्वाहा ॥ १३ ॥ ॐ यथानः सर्व्वमिज्जगत्स्वाहा ॥ १४ ॥ ॐ अयक्ष्मᳩँ० सुमनाऽअसत्स्वाहा ॥ १५ ॥ ॐ अद्ध्यवोचदधिवक्ता स्वाहा ॥ १६ ॥ ॐ प्रथमो दैव्यो भिषक् स्वाहा ॥ १७ ॥ ॐ अहींश्च सर्वाञ्जम्भयन्त स्वाहा ॥ १८ ॥ ॐ सर्व्वाश्च यातुधान्यः स्वाहा ॥ १९ ॥ ॐ अधराचीः परासुव स्वाहा ॥ २० ॥ ॐ असौ यस्ताम्म्रोऽअरुणः स्वाहा ॥ २१ ॥ ॐ उतबभ्रुः सुमङ्गलः स्वाहा ॥ २२ ॥ ॐ येचैनᳩँ० रुद्राऽअभितः स्वाहा ॥ २३ ॥ ॐ दिक्षु श्रिताः सहस्रशः स्वाहा ॥ २४ ॥ ॐ अवैषाᳩँहेडऽईमहे स्वाहा ॥ २५ ॥ ॐ असौ योवसर्प्पति स्वाहा ॥ २६ ॥ ॐ नीलग्ग्रीवो व्विलोहितः स्वाहा ॥ २७ ॥ ॐ उतैनं गोपाऽअदृश्रन्स्वाहा ॥ २८ ॥ ॐ अदृश्रन्नुदहार्य्यः स्वाहा ॥ २९ ॥ ॐ सदृष्टोमृडयाति नः स्वाहा ॥ ३० ॥ ॐ नमोस्तु नीलग्ग्रीवाय स्वाहा ॥ ३१ ॥ ॐ सहस्राक्षाय मीढुषे स्वाहा ॥ ३२ ॥ ॐ अथोयेऽअस्यसत्वानः स्वाहा ॥ ३३ ॥ ८३
ॐ अहन्तेभ्योकरन्नमः स्वाहा ॥ ३४ ॥ ॐ प्रमुञ्चधन्न्वनस्त्वं स्वाहा ॥ ३५ ॥ ॐ उभयोरार्त्न्योर्ज्ज्याᳩँ स्वाहा ॥ ३६ ॥ ॐ याश्चतेहस्तऽइषवः स्वाहा ॥ ३७ ॥ ॐ परीताभगवो व्वप स्वाहा ॥ ३८ ॥ ॐ व्विज्ज्यन्धनुः

नमः स्वाहा ॥ ६१ ॥ ॐ नमो भवाय च रुद्राय च स्वाहा ॥ ६२ ॥ ॐ नमः शर्व्वाय च पशुपतये च स्वाहा ॥ ६३ ॥ ॐ नमो नीलग्ग्रीवाय च शितिकण्ठाय च स्वाहा ॥ ६४ ॥ ॐ नमः कपर्दिने च व्युप्तकेशाय च स्वाहा ॥ ६५ ॥ ॐ नमः सहस्राक्षाय च शतधन्वने च स्वाहा ॥ ६६ ॥ ॐ नमो गिरिशयाय च शिपिविष्टाय च स्वाहा ॥ ६७॥

---

कपर्दिनः स्वाहा ॥ ३९ ॥ ॐ विशल्ल्यो वाणवाँऽउत स्वाहा ॥ ४० ॥ ॐ अनेशन्नस्यया ऽइषवः स्वाहा ॥ ४१ ॥ ॐ आभुरस्यनिषङ्गधिः स्वाहा ॥ ४२ ॥ ॐ यातेहेतिर्मीढुष्टम स्वाहा ॥ ४३ ॥ ॐ हस्तेबभूवते धनुः स्वाहा ॥ ४४ ॥ ॐ तयास्मान्विश्वतस्त्वं स्वाहा ॥ ४५ ॥ ॐ अयक्ष्मयापरिभुज स्वाहा ॥ ४६ ॥ ॐ परितेधन्न्वनोहेतिः स्वाहा ॥ ४७ ॥ ॐ अस्मान्वृणक्तु विश्वतः स्वाहा ॥ ४८ ॥ अथोयऽइषुधिस्तव स्वाहा ॥ ४९ ॥ ॐ आरेऽअस्मन्निधेहितं स्वाहा ॥ ५० ॥ ॐ अवतत्य धनुष्ट्वं० स्वाहा ॥ ५१ ॥ ॐ सहस्राक्षशतेषुधे स्वाहा ॥ ५२ ॥ ॐ निशीर्य्यशल्ल्यानाम्मुखा स्वाहा ॥ ५३ ॥ शिवोनः सुमनाभव स्वाहा ॥ ५४ ॥ ॐ नमस्तऽआयुधाय स्वाहा ॥ ५५ ॥ ॐ अनाततायधृष्णवे स्वाहा ॥ ५६ ॥ ॐ उभाभ्यामुतते नमः स्वाहा ॥ ५७ ॥ ॐ वाहुभ्यान्तवधन्न्वने स्वाहा ॥ ५८ ॥ ॐ मानोमहान्तमुतमानः स्वाहा ॥५९॥ ॐ अर्ब्भकम्मानऽउक्षन्तं स्वाहा ॥६०॥ ॐ उतमानऽउक्षितं स्वाहा ॥६१॥ ॐ मानोव्वधीः पितरं स्वाहा॥६२॥ ॐ मोतमातरम्मानः स्वाहा ॥६३॥ ॐ प्रियास्तन्न्वो रुद्द्ररीरिषः स्वाहा ॥ ६४ ॥ ॐ मानस्तोकेतनयेमानः स्वाहा ॥ ६५ ॥ ॐ आयुषिमानोगोषुमानः स्वाहा ॥ ६६ ॥ ॐ अश्वेषुरीरिषःस्वाहा ॥ ६७ ॥ ॐ

---




ॐ नमो मीढुष्टमाय चेषुमते च स्वाहा ॥ ६८ ॥ ॐ नमो ह्रस्वाय च व्वामनाय च स्वाहा ॥६९॥ ॐ नमो बृहते च व्वर्षीयसे च स्वाहा ॥७०॥ ॐ नमो वृद्धाय च सवृधे च स्वाहा ॥ ७१ ॥ ॐ नमोऽग्ग्रयाय च प्प्रथमाय च स्वाहा ॥ ७२ ॥ ॐ नमऽआशवे चाजिराय च स्वाहा ॥ ७३ ॥ ॐ नमः शीग्घ्र्याय च शीब्भ्याय च स्वाहा ॥ ७४ ॥ ॐ

---

मानोव्वीरान्रुद्द्रभामिनः स्वाहा ॥ ६८ ॥ ॐ व्वधीर्हविष्मन्तः स्वाहा ॥ ६९ ॥ ॐ सदमित्वाहवामहे स्वाहा ॥ ७० ॥ ॐ नमोहिरण्यबाहवे सेनान्ये स्वाहा ॥ ७१ ॥ ॐ दिशाञ्चपतये नमः स्वाहा ॥ ७२ ॥ ॐ नमोव्वृक्षेभ्यो हरिकेशेभ्यः स्वाहा ॥ ७३ ॥ ॐ पशूनाम्पतये नमः स्वाहा ॥ ७४ ॥ ॐ नमः शष्पिञ्जरायत्विषीमते स्वाहा ॥ ७५ ॥ ॐ पथीनाम्पतये नमः स्वाहा ॥ ७६ ॥ ॐ नमो हरिकेशायोपवीतिने स्वाहा ॥ ७७ ॥ ॐ पुष्टानाम्पतये नमः स्वाहा ॥ ७८ ॥ ॐ नमोबभ्लुशायव्याधिने स्वाहा ॥ ७९ ॥ ॐ अन्नानाम्पतये नमः स्वाहा ॥ ८० ॥ ॐ नमोभवस्यहेत्यै स्वाहा ॥ ८१ ॥ ॐ जगताम्पतये नमः स्वाहा ॥ ८२ ॥ ॐ नमो रुद्द्रायाततायिने स्वाहा ॥ ८३ ॥ ॐ क्षेत्राणाम्पतयेनमः स्वाहा ॥ ८४ ॥ ॐ नमः सूतायाहन्त्यै स्वाहा ॥ ८५ ॥ ॐ वनानाम्पतये नमः स्वाहा ॥ ८६ ॥ ॐ नमो रोहितायस्थपतये स्वाहा ॥ ८७ ॥ ॐ वृक्षाणाम्पतये नमः स्वाहा ॥ ८८ ॥ ॐ नमोभुवन्तयेव्वारिवस्कृताय स्वाहा ॥ ८९ ॥ ॐ ओषधीनाम्पतये नमः स्वाहा ॥ ९० ॥ ॐ नमो मन्त्रिणेव्वाणिजाय स्वाहा ॥ ९१ ॥ ॐ कक्षाणाम्पतये नमः स्वाहा ॥ ९२ ॥ ॐ नमऽउच्चैर्घोषायाक्रन्दयते स्वाहा ॥ ९३ ॥ ॐ पत्तीनाम्पतये नमः स्वाहा ॥ ९४ ॥ ॐ नमः


८४

नमऽऊर्म्म्याय चावस्वन्न्याय च स्वाहा ॥ ७५ ॥ ॐ नमो नादेयाय च द्वीप्याय च स्वाहा
॥ ७६ ॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥ ७७ ॥ ॐ नमः पूर्व्वजाय चा-
परजाय च स्वाहा ॥ ७८ ॥ ॐ नमो मद्ध्यमाय चापगल्भाय च स्वाहा ॥ ७९ ॥
ॐ नमो जघन्न्याय च बुध्न्याय च स्वाहा ॥ ८० ॥ ॐ नमः सोभ्याय च प्प्रतिस-

कृन्चायतयाधावते स्वाहा ॥ ९५ ॥ ॐ सत्वनाम्पतये नमः स्वाहा ॥ ९६ ॥ ॐ नमः सहमानायनिव्याधिने स्वाहा ॥ ९७ ॥ ॐ आव्याधिनीनाम्पतये नमः स्वाहा ॥ ९८ ॥ ॐ नमो निषङ्गिणे ककुभाय स्वाहा ॥ ९९ ॥ ॐ स्तेनानाम्पतये नमः स्वाहा ॥ १०० ॥ ॐ नमो निचेरवे परिचराय स्वाहा ॥ १०१ ॥ ॐ अरण्यानाम्पतये नमः स्वाहा ॥ १०२ ॥ ॐ नमोवञ्चतेपरिवञ्चते स्वाहा ॥ १०३ ॥ स्तायूनाम्पतये नमः स्वाहा ॥ १०४ ॥ ॐ नमोनिषङ्गिणऽइषुधिमते स्वाहा ॥ १५ ॥ ॐ तस्कराणाम्पतये नमः स्वाहा ॥ १०६ ॥ ॐ नमः सृकायिभ्यो जिघाᳩसद्भ्यः स्वाहा ॥ १०७ ॥ ॐ मुष्णताम्पतये नमः स्वाहा ॥ १०८ ॥ ॐ नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः स्वाहा ॥ १०९ ॥ ॐ विकृन्तानाम्पतये नमः स्वाहा ॥ ११० ॥ ॐ नमऽउष्णीषिणे गिरिचराय स्वाहा ॥ १११ ॥ ॐ कुलुञ्चानाम्पतये नमः स्वाहा ॥ ११२ ॥ ॐ नमऽइषुमद्भ्यः स्वाहा ॥ ११३ ॥ ॐ धन्वायिभ्यश्च वो नमः स्वाहा ॥ ११४ ॥ ॐ नमऽआतन्वानेभ्यः स्वाहा ॥ ११५ ॥ ॐ प्रतिदधानेभ्यश्च वो नमः स्वाहा ॥ ११६ ॥ ॐ नमऽआयच्छद्भ्यः स्वाहा ॥ ११७ ॥ ॐ अस्यद्भ्यश्च वो नमः स्वाहा ॥ ११८ ॥ ॐ नमो विसृजद्भ्यः स्वाहा ॥ ११९ ॥ ॐ विध्यद्भ्यश्च वो नमः स्वाहा ॥ १२० ॥ ॐ नमः

१५

रु० व्यर्याय च स्वाहा ॥ ८१ ॥ ॐ नमोयाम्याय च क्षेम्याय च स्वाहा ॥ ८२ ॥ ॐ नमः प्र०
८५ श्लोक्याय चावसान्न्याय च स्वाहा ॥ ८३ ॥ ॐ नमऽउर्व्वर्य्याय च खल्ल्याय च
स्वाहा ॥ ८४ ॥ ॐ नमो वन्न्याय च कक्ष्याय च स्वाहा ॥ ८५ ॥ ॐ नमः इश्रवाय च
प्प्रतिश्रवाय च स्वाहा ॥ ८६ ॥ ॐ नमऽआशुषेणाय चाशुरथाय च स्वाहा ॥ ८७ ॥

